सागारधर्मामृतम् ।

माणिकचन्द्रदिगम्बरजैनग्रन्थमाला, द्वितीय पुष्प ।

पण्डितप्रवराशाधरविरचितम्

सागारधर्मामृतम्

स्वोपज्ञ-भव्यकुमुदचन्द्रिका टीकासमेतम् ।

पाढमनिवासिपण्डितमनोहरलालशास्त्रिणा
संशोधितम् ।

प्रकाशिका—
माणिकचन्द्र-दिगम्बर जैनग्रन्थमाला समिति ।


श्रीवीर नि० संवत् २४४२ ।

विक्रमाब्द १९७२ ।



Printed by Crishnarao Sakharam Patker, at the Laxmi
Narayan Press, 402, Thakurdwar, Bombay
Published by Nathuram Premi Honrery Secretary
Manickchandra D. Jains Granth Mala
Hirabag Near C. P. Tank Bombay,





श्रीयुत्त लाला निहाराललजी सी टी
मास्टर ग० हाईस्कूल अमरोहा।

The Jain Vijaya Printing Press Surat

श्रीयुक्त लाला बिहारीलालजी।

आप अग्रवालजातीय दिगम्बर जैन हैं। बुलन्दशहरके रहने वाले हैं और अमरोहाके गवर्नमेंट हाईस्कूलमें मास्टर हैं। बड़े ही योग्य हैं। जैनधर्मके आप अच्छे जानकार हैं। उर्दूके नामी लेखक हैं। सन् १८९७ से १९०५ तक आप 'दिलआराम' नामक उर्दूका पत्र निकालते रहे हैं। उर्दूमें आपने २०-२५ ग्रन्थ लिखे हैं। जैनधर्मका प्रचार करनेकी ओर आपकी बहुत रुचि है। जैनसमाजको आपके द्वारा बहुत लाभ पहुँच रहा है। आपने एक 'जैनधर्मसरक्षिणीसभा' स्थापित कर रक्खी है जो बहुत अच्छा काम कर रही है।

आपके पुत्र चिरंजीव शान्तिचन्द्रजी भी बड़े धर्मप्रेमी और होनहार युवक हैं। आपने धर्मप्रचार करनेके लिए इस ग्रथकी लगभग २५० प्रतियाँ लेनेकी कृपा करके इस संस्थाको बहुत ही उपकृत किया है।

निवेदन।

स्वर्गीय दानवीर सेठ माणिकचन्द हीराचन्दजी जे. पी. के कृती नामको स्मरण रखनेके लिए कौनसा कार्य किया जाय, जिस समय इस विषयपर विचार किया गया उस समय यही निश्चय किया गया कि उनके नामसे एक ग्रन्थमाला निकाली जाय जिसमें संस्कृत और प्राकृतके प्राचीन ग्रन्थोंके प्रकाशित करनेका प्रबन्ध किया जाय। ग्रन्थोंका प्रकाशित करना और उनका प्रचार करना, यह सेठजीका बहुत ही प्यारा कार्य था, अतएव उनके स्मारकमें भी यही कार्य किया जाना सबने पसन्द किया और तदनुसार स्मारकफण्डकमेटीकी सम्मतिसे यह कार्य शुरू कर दिया गया। कमेटीने इस कार्यके लिए एक स्वतन्त्र समिति भी बना दी जिसकी अनुमतिसे ग्रन्थोंका चुनाव, आमद खर्चकी व्यवस्था आदि कार्य सम्पादित होते हैं।

ग्रन्थमालाके दो अङ्क एक साथ ही प्रकाशित किये जाते हैं। मुझे आशा थी कि सागारधर्मामृत जल्दी तैयार हो जायगा, परन्तु कई कारणोंसे इसके प्रकाशित होनेमें देरी हो गई और इसी कारण यह पहले नहीं किन्तु दूसरे अङ्कके रूपमें प्रकाशित होता है। आगेके लिए कवि हस्तिमल्लकृत **विक्रान्त कौरवीय नाटक**, और महाकवि वादिराजसूरिकृत **'पार्श्वनाथचरित'** ये दो ग्रन्थ तैयार कराये जा रहे हैं जो संभवतः दो दो महीनेके अन्तरसे प्रकाशित हो जायँगे।

ग्रन्थमालाका प्रत्येक ग्रन्थ लागतके मूल्यपर बेचा जायगा, यह निश्चय हो चुका है, इसलिए यह आशा नहीं कि ग्रन्थमालामें कुछ मुनाफा रहेगा जिसके द्वारा यह कार्य स्थायीरूपसे चलता रहेगा। इसके सिवाय इसका फण्ड भी इतना नहीं है जिसके ब्याजसे इसका खर्च चलता रहे, अतएव

धर्मात्मा भाइयोंको चाहिए कि एक तो ग्रन्थमालाके फण्डको बढ़ानेका प्रयत्न करें और दूसरे इसके द्वारा प्रकाशित हुए ग्रन्थोंकी सौ सौ पचास पचास, या कमसे कम दस दस पाँच पाँच प्रतियाँ खरीदकर जैनसंस्थाओंको, विद्यार्थियोंको, निर्धनोंको और अन्यधर्मी विद्वानोंको दान कर दिया करें। यदि जैनसमाजके धर्मात्माओंने इस ओर ध्यान दिया, तो हम विश्वास दिलाते हैं कि इस संस्थाके द्वारा सैकड़ों दुष्प्राप्य और दुर्लभ जैनग्रन्थोंका उद्धार हो जायगा और विश्वसाहित्यमें जैनसाहित्य भी एक गणनीय साहित्य समझा जाने लगेगा।

हीराबाग, बम्बई।
कार्तिक सुदी २
सं० १९७२

निवेदक—
नाथूराम प्रेमी।
(ऑनरेरी मंत्री)

पंडितप्रवर आशाधरः।

(हिन्दीभाषात सस्कृतेऽनुवाद कारित)

अथ श्रीविद्वच्छिरोमणि व्याघ्रेरवाल-(बघेरवाल) जातिदिशा निजने जना भूषयाचक्र, अतएवास्य आशाधरेति सार्थक नामास्ति । तस्य पितुर्नाम सल्लक्षणो मातुश्च श्रीरत्नी इति प्रथितम्। जन्म चास्य माण्डलगढे यदस्मिन् समये मेवाडराज्येऽन्तर्गत , ग्यासिलेचनेन्दुमित १०३० विक्रम सवत्सरे निरवर्तिनि कस्मिश्चित्समय बभूव। एकोनपञ्चाशदधिकद्वादशशत (१२४९) विक्रमाब्द गजनापत्तनस्थशहाबुद्दीनगौरीनामकेन तुरुष्कराजन पृथ्वीराजनृपचन्द्र निजबन्धने कृत्वा इन्द्रप्रस्थ (दिल्ली) स्वकीयराजधानी स्थापिता। तदैव च तेन अजमेरराज्यप्रान्ते आक्रमित । यवनाना महदत्याचारेभ्य धर्म नाशभयेन तत्क्षणे पंडितवरस्य पूज्यपितर सकुटुम्ब मालवीयराजधान्या धारापुर्या न्यवसन्। तदा तत्र परमारवंशीयस्य प्रतापिनो विन्ध्यवर्मनृपस्य राज्यमासीत्। एष विन्ध्यनरेन्द्रविजयवर्मेत्याख्याभ्यामपि प्रथित ।

आशाधरस्य पिता सल्लक्षण (सल्लक्षण) भूरि बहुसम्मानित इत्यनु मीयते। अर्जुनवर्मदेवमहाराजस्य द्वासप्तत्यधिकद्वादशशतपरिमित (१२७२) विक्रमाब्दीयमेक दानपत्रमुपलब्धमस्ति यदमरेश्वरतीर्थे समर्पितम्। तदन्ते च "महासान्धिविग्रहिकराजा सल्लखणसमतेन राजगुरुणा मदनेन" इति लिखित मस्ति । अनेन ज्ञायते यत् आशाधरस्य पिता सल्लखणाख्य अर्जुनवर्मदेव नृपस्य सान्धिविग्रहिकमन्त्री (फॉरेन सेक्रेटरी) बभूव त च राजपदवी उप न्धाऽऽसीत्।

अर्जुनवर्मा विन्ध्यवर्मण पौत्र सुभटवर्मणस्तनूज आसीत् । अस्य राज्यसमयो विक्रमीयसप्तषष्ठ्यधिकद्वादशशताब्दत एकद्विवर्षं पूर्वं पश्चाद्वाऽपि इति कल्प्यते।

आशाधरस्य रमणी सरस्वतीति नाम्ना प्रख्याता। तस्या कुक्षित छाहडाख्य सूनुरभवत् यस्य प्रशसा तैरेव स्वयकृता लिखित चास्ति यत् महाराजार्जुनदेवा अपि तद्गुणेऽनुरक्ता आसन्।

यदाऽऽशाधरो धारापुरीं समागतस्तदा तदायुर्विंशतिवर्षपरिमितमासीत्। तैर्जैनेन्द्रव्याकरणस्य जैनन्यायशास्त्राणां चाध्ययनं धारायामेवागत्य कृतमिति धर्मामृतप्रशस्तितोऽवगम्यते। एतानि ग्रन्थानि तेन विदुषा विद्वद्वरमहावीराख्योपाध्यायात् श्रीवादिराजपण्डितधरसेनशिष्यादधीतानि। विषयान्तराणामध्ययनं कुत्र कस्मात्कृतमिति नावगम्यते। विद्याध्ययनानन्तरं तेन संसारयात्रानिर्वाहाय व्यापारं राजसेवा वेत्यादि किं कार्यमनुष्ठितमत्र विषये किमपि न निर्णीयते परमिति त्वनुमीयते यत्तस्यापि जीवनं विद्याव्यसने एव व्यतीतं स्यात्। व्याकरण काव्य कोश-न्याय वैद्यक धर्मशास्त्रादिविषयेषु तस्यासाधारणा गतिरासीत्। एषु अखिलेषु विषयेषु तेन शतानि विद्यार्थिनो निष्णापिता। एतद् ग्रन्थप्रशस्तेर्नवमश्लोके तट्टीकाया च केषाञ्चिन्निजशिष्याणामुल्लेखं करोति कथयति च यदेतादृशा अनेके जना मया विद्वांसोऽनुष्ठिता। यथा-पंडित देवचन्द्रादयो व्याकरणज्ञाः कृता। वादीन्द्रविशालकीर्त्यादीन् षड्दर्शनन्यायज्ञान् विधाय परवादिषु विजयं कारित। भट्टारकदेवचन्द्रविनयचन्द्रादयः धर्मशास्त्रमध्यापयित्वा मोक्षमार्गे प्रवर्तिता। मदनोपाध्यायादीश्च साहित्यज्ञान् विधायार्जुनदेवमहाराजा सदृशनृपाणां प्रतिष्ठाधिकारिणः (राजगुरवः) कारिता। एभिः कारणैः श्रीआशाधरस्य पाण्डित्यमतितरामित्यनुमीयते।

विन्ध्यवर्मणः सान्धिविग्रहिकमन्त्रिणा महाकविना बिल्हणेन एकदा श्रीआशाधरस्य महती प्रशंसा कृता। तेनोक्तं हे आर्य युष्माभिः सह स्वाभाविकं सहोदर्यं भ्रातृत्वं चास्ति, यतो यथा यूयं सरस्वती (शारदा) पुत्रस्तथाहमपि सरस्वती (मातृ) पुत्रोऽस्मि। विक्रमाङ्कचरित कर्णसुन्दरीनाटकादिकर्ता विद्यापतिर्बिल्हण आशाधरप्रशंसाकर्तुरस्माद्बिल्हणकवीशाद्भिन्नोऽस्ति। विद्यापतिबिल्हणेन विक्रमीयसंवत् विंशत्यधिकैकादशशत ११२० मिते काश्मीरनरेशकलशाख्यस्य राज्यसमये काश्मीरदेशस्त्यक्त। अयं च बिल्हणो विन्ध्यवर्मेन्द्रसमये विक्रमीयपञ्चाशदधिकद्वादशशता १२५० ब्दानुमिते जीवित आसीत्। आशाधरेण स्वीयप्रशंसाकर्त्रोरुभयोर्विदुषोर्नामनी अन्येऽपि दत्ते ययोरेक उदयसेनो मुनिर्द्वितीयश्च मदनकीर्तियतिपतिरासीत्। उदयसेनेन स

व्याप्तिरवालरससमर्पणनदम, काव्यामृतोधरमपानमुनुप्तगानः नयविनयचक्षुः फलिकाल्दिाम इतिविरोपणैर्विशेषितः। एव मदनकीर्तिनापि 'प्रज्ञापुञ्ज' इत्युक्त्वा तस्य स्तुतिः कृता। उदयसेनमुनेः कश्चिदपि विशेषपरिचयो न मिलितः, पर तु मदनकीर्तिविषयेऽधुना कतिचित् वृत्तानानि अवग तानि सन्ति। श्वेताम्बराचार्यराजशेखरसूरिणा पत्राधिकचतुर्दशशतविक्रमाब्दे १४०५ निर्मिते 'चतुर्विंशतिप्रबन्ध'स्यैतिहासिकग्रन्थे एको 'मदनकीर्ति प्रबन्धनामकोऽध्यायो वर्तते। तेन ज्ञायते यत् मदनकीर्ति वादीन्द्रविशा लकीर्तेः शिष्य आसीत्। स विद्वद्मणी बभूव। चतसृणामपि दिशाना वादिनः पराजित्य तेन महाप्रामाणिकेति पदमर्जितम्। एकदा स गुरुणा निषिद्धो दक्षिणापथं प्रस्थितः विजयमनुतिष्ठन् कर्णाटकदेशं प्राप्तः। तत्र विज यपुरनरेशः कुन्तिभोजमल्लाडिल्योपरि मोहितो जातः तस्माच्च सकाशात् स्वीयपूर्वजचरितविषयक एको ग्रन्थो निर्मापितवान। मदनकीर्ति पद्यरचनया यदाब्रवीत् तदैव च राजकन्या मदनमञ्जरी अपि पटा न्तरे स्थिता तानि पद्यानि लिखतिस्म। केषुचिद्दिनेषु व्यतीतेषु तयोः परस्पर प्रेमाविर्भूत एको द्वितीय मनसा इच्छतिस्म। नृपेणेद वृत्तमवगत। तेन कुपितेन मदनकीर्तिवधायाज्ञा दत्ता परन्तु तदर्थं कन्यापि मर्तुं सनद्धा तदा विवेकेन राजा स शान्तः, तौ च विवाहसूत्रेण बधितौ। मदनकीर्तिः गृहस्थो भूत्वा स्थितः अवमानावस्थापर्यन्तमपि गृहस्थ एव आसीत्। विशालकीर्ति गुरुणा बहु प्रबोधितः पर किमपि फल न जात। मदनकीर्तेः कीदृशी दशा अभूदित्यनेनास्माकं न किमपि प्रयोजन। अत्र तु तस्य विद्वत्तायाः सद्भावोऽस्ति। अस्मिन् विषये न कोपि सदेहः यत् स दिग्गजविद्वानासीत्। तेन चाशाधरस्य प्रशसा कृताऽऽसीत्। उपरि एकस्मिन् स्थले यस्य मदनोपाध्यायस्योल्लेखः आगत यमाशाधरः काव्यशास्त्रे निपुण कृतवान् स पूर्वोक्तमदनकीर्तितो भिन्न एव। मदनोपाध्यायोऽर्जुनवर्मदेवस्य गुरुरासीत्। तस्योपनाम बालसरस्वती त्यासीत्। अर्जुनवर्मदेवेन स्वकृतामरुशतकटीकायामनेकस्थलेषु लिखित "उक्त चोपाध्यायेन बालसरस्वतीत्यपरनाम्ना मदनेनेति।" आशाधरेणापि

स्वोपज्ञधर्मामृतटीकायां 'स बालसरस्वती महाकविमदन' इति कथितः । तेन निर्मिता 'पारिजातमञ्जरी' नाम्नी एका नाटिकास्ति ।

विक्रमीयपञ्चषष्ट्यधिकद्वादशशतपरिमिताब्दे १२६५ आशाधरेण धारा नगरीं त्यक्त्वा नलकच्छपुरे च गत्वाऽऽवासः कृतः । यमधुना 'नालछा' इति कथयन्ति । नलकच्छपुरं धारातः क्रोशदशक दूरे वर्तते तत्र श्रावकाणां निवासो विपुल आसीत् । तदा मालवप्रान्तस्य नृपोऽर्जुनवर्मदेव आसीत् ।
नलकच्छपुरं गत्वा निवासकरणमाशाधरो जिनप्रशस्ता जिनधर्मोद्योतनेच्छा प्रकटयति । अनेन ज्ञायते यदस्मिन् समये तेन गृहस्थाश्रमात्मनः धस्त्यक्तः । स च कश्चिदुच्चप्रतिमाधारकः श्रावक इव नियमतिस्म । तन्निर्मितजिनसहस्रनाम स्तोत्रस्य निम्नश्लोकैः प्रतीयते यत्स गृहस्थाश्रमादुदासीनो जातः ।—

प्रभो भवाङ्गभोगेषु निर्विण्णो दुःखभीरुकः ।
एष विज्ञापयामि त्वां शरण्यं करुणार्णवम् ॥ १ ॥
सुखलालसया मोहाद् भ्राम्यन्बहिरितस्ततः ।
सुखैकहेतोर्नामापि तव न ज्ञातवान् पुरा ॥ २ ॥
अद्य मोहग्रहावेशशैथिल्यात्किंचिदुन्मुखः ।
अनन्तगुणमाप्तेभ्यस्त्वां श्रुत्वास्तोतुमुद्यतः ॥ ३ ॥

ज्ञायते यदाशाधरोऽन्तिमसमयपर्यन्तं नलकच्छपुरे एव न्यवसत् । तन्निर्मितेषु प्राप्यग्रंथेषु अनागारधर्मामृतस्य टीका निखिलग्रंथेभ्यः पश्चाद्यर्थात् त्रयोदशशत विक्रमाब्दे १३०० रचितास्ति, सा च नलकच्छपुरस्थनेमिनाथचैत्यालये पूर्णता गता । तस्यान्येऽपि प्राप्यग्रन्था तत्पुरे एव रचिता सन्ति ।

आशाधरः त्रयोदशशतविक्रमाब्दतः १३०० पश्चात् कदापर्यन्तं जीवित इति बोद्धुं किमपि साधनं नास्ति । तथापि तेन महदायुः प्राप्तं स्यात् । पूर्वोक्ता व्यवकाले स वृद्ध एव जातः स्यात् । तेन धारागमनानन्तरं मालवदेशे नृपसनके सिंहासनासीनाः दृष्टा भवन् । विन्ध्यवर्मसमये धारा समागतः । विन्ध्यवर्मणस्तनुजः सुभटवर्मा जातः । सुभटवर्मसूनुरर्जुनवर्मणः समये स नलकच्छपुरमागतः ।

अर्जुनवर्मणः कोऽपि पुत्रा नासीत् अनन्तस्य प्रपितामहजयवर्मणो भ्रातुर्लक्ष्मीवर्मणः पौत्रो देवपाल साहसमल्लापराख्यो राजसिंहासनं लब्धवान् । अस्यैव देवपालस्य समये आशाधरेण स्वीयजिनयज्ञकल्प (प्रतिष्ठापाठ) रचयित्वा समाप्तिं नीतम् । देवपालानन्तर तत्पुत्रो जैतुगिदेवो जयसिंहापराख्यो राजा बभूव । सागारधर्मामृतस्य टीका षण्णवत्यधिकद्वादशशततमविक्रमाब्दे १२९६ अना गारधर्मामृतस्य टीका त्रयोदशशततमविक्रमाब्दे १३०० यदा समाप्तिमगात्तदा जैतुगिदेवस्यैव शासनकाल आसीत् । आशाधरो निजग्रथप्रशस्तिषु स्वनिर्मित निम्नलिखितग्रन्थानामुल्लेख करोति—

१ प्रमेयरत्नाकर (न्यायग्रन्थ) ।

२ भरतेश्वराभ्युदयकाव्य—स्वोपज्ञटीकासहित ।

३ धर्मामृतशास्त्र—अस्य द्वौ भागौ स्त । एको अनगारो द्वितीय सागार । द्वावपि भागौ स्वोपज्ञटीकाभ्यामलङ्कृतौ । सागारभागस्यैका पाजकानागी टीकापि स्वोपज्ञास्ति ।

४ अष्टाङ्गहृदयोद्योतिनी टीका—इय वाग्भटसंहिताख्यसुप्रसिद्धवैद्यकग्रन्थस्य टीकाऽस्ति ।

५ आराधनासारटीका ।

६ इष्टोपदेशटीका—इय पूज्यपादकृतेष्टोपदेशस्य टीका ।

७ अमरकोषस्य क्रियाकलापटीका ।

८ भूपालचतुर्विंशतिका टीका ।

९ काव्यालंकारटीका—रुद्रटस्य प्रख्यातालङ्कारग्रन्थस्य टीका ।

१ जिनसहस्रनाम सटीकम् ।

११ जिनयज्ञकल्प सटीकम ।

१२ त्रिषष्टिस्मृतिशास्त्र सटीकम ।

१३ नित्यमहोद्योतम् ।

१४ राजीमतीविप्रलम्भकाव्यं सटीकम्।

१५ अध्यात्मरहस्यं (योगशास्त्र)।

१६ रत्नत्रयविधानम्।

अनेनेति सम्भाव्यते यत् त्रयोदशशताब्दितः पश्चात् तेनान्येषामपि ग्रन्थानां रचना कृता स्यात्। येषामुल्लेख एतत्प्रशस्तिषु नास्ति। पूर्वोक्तेषु ग्रन्थेषु मध्येऽधुना जिनयज्ञकल्प, सागारधर्मामृत, अनगारधर्मामृत, जिनसहस्रनाम, नित्यमहोद्योत, इष्टोपदेश इत्यादयो ग्रन्था उपलभ्यते। शेषग्रन्थानामन्वेषणं भवितव्यं।

आशाधरस्य रचनातीवक्लिष्टास्ति ज्ञायते चात एव तेन प्रायः स्वनिर्मित सकलानामपि ग्रन्थानामुपरि टीका लिखिता मति। एतत्सागारधर्मामृतस्य तु तेन द्वे टीके रचिते तथापि तस्य कृतौ तदसाधारणपाण्डित्यमनुमीयते।

अन्यग्रन्थसदृश तस्यायं ग्रन्थोऽपि अतीव महनीयोऽस्ति, अनेनैव च सार णनाय प्रकाश्यते, भाषाचार्यस्यान्य ईदृग्विस्तृतो निबद्धो ग्रन्थो नास्ति। इति कृत पल्लवितेन।

निवेदक

नाथूरामप्रेमी।

मल्लिखितविद्वद्रत्नमालायामाशाधरविषये एको विस्तृतो लेखोऽस्ति, ये महाशया दिदृक्षवस्ते 'जैनमित्र आफिस, हीराबाग, बम्बई' इति स्थानत आनाय्य पठन्तु।

नमो वीतरागाय।

सटीकं

सागारधर्मामृतम्।

श्रीवर्द्धमानमानम्य मन्दबुद्धिप्रबुद्धये।
धर्मामृतोक्तसागार-धर्मटीकां करोम्यहम् ॥ १ ॥
समर्थनादि यन्नात्र ब्रुवे व्यासभयात्कचित्।
तज्ज्ञानदीपिकाख्यैत त्पञ्जिकायां विलोक्यताम् ॥ २ ॥

अथ चतुर्थाध्याये—

सुदृग्बोधो गलद्वृत्त मोहो विषयनि स्पृह ।
हिंसादेर्विरत कार्त्स्न्या यति स्याच्छ्रावकोंऽशतः ॥

इत्युक्तम्। अतो मध्यमङ्गलविधानपूर्वक विनेयान्प्रति सागारधर्मामृत प्रतिपाद्यतया प्रतिजानीते—

अथ नत्वाऽर्हतोऽक्षूण चरणान् श्रमणानपि।
तद्धर्मरागिणां धर्मः सागाराणां प्रणेष्यते ॥ १ ॥

टीका—प्रणेष्यते प्रतिपादयिष्यतेऽस्माभि । क, '[1]उक्तकर्मतापन्न' धर्म एकदेशविरतिलक्षण चारित्रम्। केषा, सागाराणा वक्ष्यमाणलक्षणाना गृहस्थानाम्। किंविशिष्टानां, तद्धर्मरागिणां तेषा श्रमणानां धर्मे सर्वविरति रूपे चारित्रे रागिणा संहननादिदोषादकुर्वेतामपि प्रीतिमताम्, यतिधर्मानु-रागरहितानामगारिणां देशविरतेरप्यसम्यग्रूपत्वात्। सर्वविरतिलालस खलु देशविरतिपरिणाम । किं कृत्वा प्रणेष्यते, नत्वा शिर प्रह्वीकरणादिना विशुद्धमनोनियोगेन च पूजयित्वा। कान्, अर्हतस्तीर्थंकरपरमदेवान्। किंवि

---

[1] प्रणयनक्रियाकर्मतापन्न ।

शिष्टान्, अक्षुण्णचरणान् अक्षुण्णं सम्पूर्णं सकलमोहक्षयपादाविर्भूतत्वेन नित्यं निर्मलं चरणं यथाख्यातचारित्रं येषां ते अक्षुण्णचरणास्तान् । न केवलमर्हतो नत्वा श्रमणानपि नमस्कृत्य, श्राम्यन्ति बाह्यमाभ्यन्तरं च तपश्चरन्तीति श्रमणा आचार्योपाध्यायसाधवस्तान् । किंविशिष्टान्, अक्षुण्णचरणान् अक्षुण्णं भावनाविशेषबलाद्गलितिचारं चारित्रं क्षायोपशमिकसंयमपरिणामो येषां ते तान् । कथं अथ, अथेतिशब्दो मङ्गलार्थः अधिकारार्थो वा । इतः सागारधर्मोऽभिधीयते इत्यर्थः ॥ १ ॥

किं लक्षणाः सागारा इत्याह—

अनाद्यविद्यादोषोत्थ-चतुःसञ्ज्ञाज्वरातुराः ।
शश्वत्स्वज्ञानविमुखाः सागारा विषयोन्मुखाः ॥ २ ॥

टीका-अत्र भवन्तीति क्रियाध्याहारः । भवन्ति । के, सागारा अगारं गृहं सकलपरिग्रहोपलक्षणं सह अगारेण वर्तन्ते इति सागाराः । एतदेव अनाद्यविद्यादिविशेषणत्रयेण स्फुटयति-किंविशिष्टाः सागारा भवन्ति, शश्वत्स्वज्ञानविमुखाः शश्वत्सर्वदा स्वज्ञाने

"एगो मे सासदो आदा णाणदंसणलक्खणो ।
सेसा मे बाहिरा भावा सव्वे संजोगलक्खणा ॥"

इत्यादिपरमागमप्रसिद्धे स्वात्मावबोधे विमुखाः पराङ्मुखाः, तत्र गुणत्वेनाननुरक्ता इत्यर्थः । पुनः किंविशिष्टाः, विषयोन्मुखाः विषयेष्विष्टेषु स्रक्चन्दनवनितादिष्वनिष्टेषु च दुर्गन्धकटुकर्कशादिषु उन्मुखाः रागात् द्वेषाच्च व्यापृताः उद्युक्ताः । कुत एतदिति हेतुं प्रथमविशेषणेन निर्दिशति । पुनः किंविशिष्टाः, अनाद्यविद्यादोषोत्थचतुःसञ्ज्ञाज्वरातुराः अविद्या अनित्याशुचिदुःखानात्मसु विपरीतख्यातिः, अस्याः पूर्वं नास्ति न आदिः, कालत्रयेऽप्यस्याः सम्भवात्, अनादिश्चासौ अविद्या च अनाद्यविद्या, सैव दोषो वातादिविकारो धीवधः, तस्मादुत्था उद्भूताः, अनाद्यविद्यादोषोत्था येषां ते अनाद्यविद्यादोषोत्थाः, सञ्ज्ञाः आहारादिभिलाषनिमित्तसंस्कारस्वरूपाः, तथा ज्वराः प्राकृताः वैकृताश्चेति द्वौ प्रत्येकं सान्निपातिकाश्चेति ज्वराः, सञ्ज्ञा एव ज्वरा मोहप्रत्ययत्वात् सञ्ज्ञाज्वराः, चत्वारश्च ते सञ्ज्ञाज्वराश्च चतुःसञ्ज्ञाज्वराः, अनाद्यविद्यादोषोत्थाश्च ते चतुःसञ्ज्ञा-

ज्वराश्च अनाद्यविद्यादोषोत्थचतुःसंज्ञाज्वरा तैरातुरा कदर्थिता । यत एवम्भूतास्ततः शश्वत्स्वज्ञानविमुखा । अत एव च नित्यं विषयोन्मुखाः स्वपरप्रकाशात्मकत्वादात्मनो विमुखा ॥ २ ॥

भङ्ग्यन्तरेण तानेवाह—

अनाद्यविद्यानुस्यूतां ग्रन्थसञ्ज्ञामपासितुम् ।
अपारयन्तः सागाराः प्रायो विषयमूर्च्छिताः ॥ ३ ॥

टीका—अत्रापि भवन्तीति क्रियाध्याहारः । एवमश्रूयमाणं क्रियापदं पुरस्तादप्यध्याहार्यम् । भवन्ति । के ते, सागारा । किंविशिष्टा विषयमूर्छिता, कामिन्यादिविषयेषु ममेदं भोग्यमहमस्य स्वामीत्येवं ममकाराहङ्कारविकल्पपरतन्त्रतयाऽध्यवसिता । कथं प्रायो, बाहुल्येन सुदृष्टयोऽपि चारित्रावरणकर्मोदयवशादेव पर्यवसन्ना सम्यग्दृष्टय । ये तु केचिज्जन्मान्तराभ्यस्ततरत्नत्रयानुभावात्साम्राज्यादिश्रियमप्यनुभवन्तोऽसतीनाथोपभोगन्यायेन तत्त्वज्ञानदेशसमयप्रणिधानपरत्वेन भुञ्जाना अप्यभुञ्जानवदवभासन्ते तद्व्यभिचारप्रदर्शनार्थं प्राय इत्युच्यते । किं कुर्वन्तस्ते तथा भवन्तीत्याह-अपारयन्त अशक्नुवन्त । किं कर्तुं, अपासितुं निराकर्तुं । का, ग्रन्थसञ्ज्ञां ग्रन्थे परिग्रहे सञ्ज्ञा ममेदमिति मूर्च्छापरिणामस्ता । किंविशिष्टां, अनाद्यविद्ययाऽनुस्यूता बीजाङ्कुरन्यायेन सन्ततया प्रवर्तमाना ताम् ॥ ३ ॥

एवं सागारान् लक्षयित्वा तद्भावाभावनिदानयोरविद्याविद्ययोर्बीजोपदेशार्थमिदमाह—

नरत्वेऽपि पशूयन्ते मिथ्यात्वग्रस्तचेतसः ।
पशुत्वेऽपि नरायन्ते सम्यक्त्वव्यक्तचेतनाः ॥ ४ ॥

टीका—पशूयन्ते हिताहितविवेकविकलतया पशव इवाचरन्ति । के ते, मिथ्यात्वग्रस्तचेतस मिथ्यात्वेन विपरीताभिनिवेशेन ग्रस्तमाविष्टं चेतो

१ धात्रीबालासतीनाथ पद्मिनीदलवारिवत् ।
दग्धरज्जुवदाभाति भुञ्जानोऽपि न पापभाक् ॥

२ वपुर्गृहं धनं दारा पुत्रमित्राणि शत्रव ।
सर्वथान्यस्वभावानि मूढः स्वानि प्रपद्यते ॥

मनो येषां ते । क सति, नरत्वेऽपि, नरा हि प्रायो विचारचतुरचेतसः किल भविष्यज्जन्मत्वेऽपि सति किं पुनस्तिर्यगादिभवे इत्यपिशब्दार्थः । एवमविद्यामूलकारणं मिथ्यादर्शनं विभाव्य विद्यामूलकारणं सम्यग्दर्शनं भावयितुमाह-पशुत्वेऽपीत्यादि, नरायन्ते हिताहितविचारचतुरतया नराः इवाचरन्ति । के ते, सम्यक्त्वप्रवणचेतसः. सम्यक्त्वेन तत्त्वार्थश्रद्धानलक्षणेन सम्यग्दर्शनपरिणामेन प्रवणा प्रशमसंवेगानुकम्पास्तिक्यानुभावैः प्रागितयोग्या कृता चेतना चित्तमन्यमनस्क येषां ते । क सति, पशुत्वेऽपि, पशुपर्यायप्राप्ते ऽत्र सत्यपि एव । अस्य तिर्यग्भावेऽपि सति सम्यक्त्वमाहात्म्यात् देवोपादेयतावन्तः पशवोऽपि भवन्ति किं पुनर्मनुष्यादय इत्यपिशब्दार्थः ॥ ४ ॥

एवं सामान्यतो मिथ्यात्वानुभावं प्रदर्श्येदानीं तस्य त्रिविधस्याप्यनुभावमुपमानैरनुभावयितुमाह—

केषांचिदन्धतमसायतेऽगृहीतं ग्रहायतेऽन्येषाम् ।
मिथ्यात्वमिह गृहीतं शल्यति सांशयिकमपरेषाम् ॥५॥

टीका—अन्धतमसायते घोराज्ञानविवर्तहेतुतया निबिडान्धकारवदाचरति । किं तत्, मिथ्यात्वं । किंविशिष्टमगृहीतं परोपदेशमन्तरेण प्रवृत्त्यादनुगतं अनादिसन्तत्या प्रवर्तमानतत्त्वार्थाश्रद्धानपरिणाम इत्यर्थः । केषां कस्यापि केषांचित् एकेन्द्रियादिसंज्ञिपञ्चेन्द्रियपर्यन्तानां । क, इह संसारे । तथा ग्रहायते विविधाकारकारितया ग्रहवदाचरति भूतावेशवद्विपर्ययेण इत्यर्थः । किं तत्, मिथ्यात्वं । किंविशिष्टं, गृहीतं परोपदेशात्तत्त्वमतत्त्वाभिनिवेशलक्षणं

---

१ रागादिषु च दोषेषु चित्तवृत्तिनिबर्हणम् ।
तं प्राहुः प्रशमं प्राज्ञाः समस्तव्रतभूषणम् ॥

२ शारीरमानसागन्तुवेदनाप्रभवाद्भवात् ।
स्वप्नेन्द्रजालसंकल्पाद्भीतिः संवेग उच्यते ॥

३ सत्त्वे सर्वत्र चित्तस्य दयार्द्रत्वं दयालवः ।
धर्मस्य परमं मूलमनुकम्पां प्रचक्षते ॥

४ आप्ते श्रुते व्रते तत्त्वे चित्तमस्तित्वसंस्तुतम् ।
आस्तिक्यमास्तिकैरुक्तं मुक्तियुक्तिधरे नरे ॥

विद्वंकृतं । केषां, अन्येषां सञ्ज्ञिपञ्चेन्द्रियाणां। तथा शल्यति बहुदु खहेतुत्वा-च्छरीरान्त.प्रविष्टकाण्डादिवदाचारति । किं तत्, मिथ्यात्वं । किमाख्यं, सांश-यिकं मिथ्यात्वकर्मोदये सति ज्ञानावरणोदयविशेषवशात् किमिदं जीवादि वस्तु यथा जैनैरनेकान्तात्मकमुच्यते तथा स्यादुतस्विदन्यथेति चलिता प्रतीतिः संशयः, संशये भव सांशयिकं क्वचिद्प्रासनिश्चयमात्मस्वरूपं । केषां तत्तथा स्यादित्याह–परेषाम् इन्द्राचार्यादीनाम् ॥ ५ ॥

नन्वविद्यामूलमिथ्यात्वनिर्मथनसमर्थस्य सम्यक्त्वपरिणामस्य कतमा प्रादुर्भावनसामग्रीत्यनुयोगे सतीदमुच्यते—

आसन्नभव्यताकर्म-हानिसञ्ज्ञित्वशुद्धिभाक् ।
देशनाद्यस्तमिथ्यात्वो जीवः सम्यक्त्वमश्नुते ॥ ६ ॥

टीका—अश्नुते प्राप्नोति । कोऽसौ, जीव आत्मा । किं तत्, सम्यक्त्वं तत्त्वार्थश्रद्धानं । किंविशिष्ट सन्, आसन्नभव्यताकर्महानिसञ्ज्ञित्वशुद्धि भाक्, भव्यो रत्नत्रयाविर्भावयोग्यो जीव , आसन्न. कतिपयभवप्राप्यनिर्वा-णपद , आसन्नश्चासौ भव्यश्चासन्नभव्यस्तस्य भाव आसन्नभव्यता, कर्म-हानिर्मिथ्यात्वादीनां सम्यक्त्वप्रतिबन्धककर्मणां यथासम्भवमुपशमः क्षयो-पशम क्षयो वा, सञ्ज्ञा शिक्षाक्रियालापोपदेशग्राहित्व सञ्ज्ञाऽस्यास्तीति सञ्ज्ञी सञ्ज्ञिनो भावः सञ्ज्ञित्वं,

मनोऽवष्टम्भत शिक्षा क्रियालापोपदेशवित् ।
येषां ते सञ्ज्ञिनो मर्त्या वृषकीरगजादय ॥ इति ।

शुद्धिर्विशुद्धपरिणाम , आसन्नभव्यता च कर्महानिश्च सञ्ज्ञित्व च शुद्धिश्चेतीत-रेतरयोगे द्वन्द्वे सति ताश्चतस्रो भजते सेवते ततो नापैतीति तद्भागन्तरङ्गस-म्यग्दर्शनादिभावकारणसम्पन्न इत्यर्थ । पुनः किंविशिष्ट , देशनाद्यस्तमि-थ्यात्व. देशना सम्यग्गुरूपदेशः सा आदिर्यस्य जातिस्मरणजिनप्रतिमादर्श-नादेर्बहिरङ्गकारणकलापस्य स देशनादि तेन अस्तं निराकृतमुपशमाद्यवस्थां नीतं मिथ्यात्वं दर्शनमोहाख्यं कर्म तद्धेतुको वा सर्वथैकान्ताभिनिवेशो यस्य स तथोक्त. ॥ ६ ॥

साम्प्रतं योऽयं सम्यक्त्वसामग्र्यां सत्यां सम्यग्गुरूपदेशोऽत्यन्तमुपयुक्त-स्येदानीमत्र सदुपदेष्टॄणां प्रविरलत्वानुशोचनद्वारेण दुर्लभत्वं दर्शयति—

कलिप्रावृषि मिथ्यादिङ्मेघच्छन्नासु दिक्ष्विह ।
खद्योतवत्सुदेष्टारो हि द्योतन्ते क्वचित्क्वचित् ॥ ७ ॥

टीका—द्योतन्ते प्रकाशन्ते भासमानं दर्शयन्ति दृश्यन्ते इत्यर्थः । के ते, सुदेष्टारः सु शोभनं निर्बाधं सम्पूर्णं वा जीवादितत्त्वं दिशन्त्युपदिशन्तीति सुदेष्टारः सम्यग्गुरवः । क्वचित्क्वचित्, क्वापि क्वापि न सर्वत्र । कस्मिन्, इह भरतक्षेत्रे । किंवत्, खद्योतवत् ज्योतिरिङ्गणा यथा । कासु सतीषु, दिक्षु सदुपदेशेषु ककुप्सु च । किंविशिष्टासु, मिथ्या सर्वथैकान्तविषयत्वादसत्या दिशो बौद्धादिशास्त्रोपदेशास्ता एव मेघा दिशामिवानेकान्तोपदेशस्याच्छादकत्वात् तैश्छन्नासु छादितासु प्रतीतविपरीतीकृतासु । कदा, कलिप्रावृषि कलिः दुष्षमाख्यः पञ्चमकालः स एव प्रावृड् वर्षाकालस्तत्र । अयमर्थः—यथा वर्षाकाले मेघाच्छादितासु दिक्षु सूर्यादिप्रकाशाभावे क्वचित्क्वचित्प्रदेशे खद्योता द्योतन्ते तथेह दुष्षमायां क्वचित्क्वचित्प्रदेशे सदुपदेष्टारः प्रकाशन्ते न पुनः कृतयुगादिवत्प्रचुरप्रचुरतया केवलिनः श्रुतकेवलिनो वा दृश्यन्ते इति । हि शब्देन कष्टार्थं नान्यस्तामभिव्यनक्ति ।

इह दुष्षमायामपि सामर्थ्यातिशयवत्स्वपि दर्शनमोहोदयात्कान्तविना तथा देशनानर्हत्वात्प्रायो भद्रका अपि पुरुषा देशनायां भूयासुरित्याशास्ते—

नाथामहेऽद्य भद्राणामप्यत्र किमु सद्दृशाम् ।
हेम्न्यलभ्ये हि हेमाश्मलाभाय स्पृहयेन्न कः ॥ ८ ॥

टीका—नाथामहे भद्रका अपि जीवा देशनायां भूयासुरित्याशास्महे । के, वयं । केषां, भद्राणामपि । किमु, किं पुनः । सद्दृशां सम्यग्दृष्टीनां विशेषतो

१ विद्वन्मन्यतया सदस्यतितरामुद्दण्डवाग्डम्बराः
शृङ्गारादिरसैः प्रमोदजनकं व्याख्यानमातन्वते ।
ये ते च प्रतिसद्म सन्ति बहवो व्यामोहविस्तारिणो
येभ्यस्तत्परमात्मतत्त्वविषयं ज्ञानं तु ते दुर्लभाः ॥

नायामह इत्यर्थ । अ, अत्र क्षेत्रे । कदा, अद्य अस्मिन्काले । अमुमेवार्थमुत्तरा र्देन समर्थयते । हि यस्मादर्थे । को न स्पृहयेत् नाभिलषेत् । कस्मै, हेमा-श्मलाभाय सुवर्णोपलप्राप्त्यर्थं । क सति हेम्नि सुवर्णे । किंविशिष्टे, अलभ्ये रुब्धुमशक्ये ॥ २ ॥

भद्रकस्य लक्षणमुक्त्वा तस्यैव द्रव्यतया देशनार्हत्वमाह—

कुधर्मस्थोऽपि सद्धर्मं लघुकर्मतयाऽद्विषन् ।
भद्रः स देश्यो द्रव्यत्वान्नाभद्रस्तद्विपर्ययात् ॥ ९ ॥

टीका-भण्यते । कोऽसौ, भद्र । किं कुर्वन् अद्विषन् द्वेषविषयमकुर्वन । क, सद्धर्मं सन् समीचीन प्रमाणोपपन्नो धर्मोऽभ्युदयनि श्रेयसोपायस्तम् । कया, लघुकर्मतया लघु अल्प कर्म सद्धर्मद्वेषनिमित्त मिथ्यात्व यस्य सोय लघुकर्मास्तस्य भावस्तत्ता तया लघुकर्मतया । किंविशिष्टोऽपि, कुधर्मस्थे प्रमाणबाधिते धर्मे आसक्त, न केवलमुभयोर्मध्यस्थ इत्यपिशब्दार्थ । किं पुनरमाविस्याह—देश्य धर्मे व्युत्पादनीय । कोऽसौ स भद्र । कस्मात् द्रव्यत्वात् आगामिसम्यक्त्वगुणयोग्यत्वात् । न पुनर्देश्य । कोऽसौ अभद्र कुधर्मस्थ सद्धर्मं गुरुकर्मतया द्विषन् कस्मात्, आगामिसम्यक्त्वगुणयोग्यत्वाभावात् ।

इदानीमाप्तोपदेशसम्पादितशुश्रूषादिगुण सम्यक्त्वहीनोऽपि तद्वानिव सद्भूतव्यवहारभाजा प्रतिभासते इति निदर्शनेन व्यक्तीकरोति—

शलाकयेवाप्तगिराऽऽप्तसूत्र-
प्रवेशमार्गो मणिवच्च य स्यात् ।
हीनोऽपि रुच्या रुचिमत्सु तद्वद्
भूयादसौ सांव्यवहारिकाणाम् ॥ १० ॥

टीका-य पुरुष स्यात भवेत् । किंविशिष्ट, आप्तसूत्रप्रवेशमार्ग एव । चशब्दस्यात्रावधारणार्थस्य योजनात् । सूत्र परमागम , प्रवेशमार्ग शुश्रूषा दिगुण , सूत्रस्य प्रवेशमार्गोऽन्तस्तत्त्वपरिच्छेदनोपाय सूत्रप्रवेशमार्ग , आप्त प्राप्त सूत्रप्रवेशमार्गो येन स तथोक्त । कया, आप्तगिरा सद्गुरुवाचा। कयेव, शलाकयेव छिद्रकरवज्रसूचिकया यथा । किंवत्, मणिवत् यथा मणि शला कया आप्तप्रवेशमार्ग स्यात्, आप्त प्राप्त सूत्रस्य तन्तो प्रवेशमार्ग छिद्र येन स

तथोक्तः । असौ भूयात् प्रतिभासेत । किंवत्, तद्वत् रुचिमानिव । केषां सांव्यवहारिकाणां सुनयप्रयोक्तृणाम् । केषु मध्ये, रुचिमत्सु सुदृष्टिषु दीप्तिमत्सु मणिषु च मध्ये । किंविशिष्टोऽपि हीनोऽपि रिक्तोऽल्पो वा । कया, रुच्या शुभ्रया दीप्त्या किं पुना रुचिसम्पन्न इत्यपिशब्दार्थः । एतेनाव्युत्पन्नसम्यक्त्वानां सुदृष्टिषु च मध्ये गणनीयतोपदिष्टा । सुदृष्टिवत्तेऽपि सतां मान्या भवन्तीति भावः ।

एवं देशयदेशाकौ व्यवस्थाप्य सागारधर्मधारिणमगारिणं लक्षयितुमाह—

न्यायोपात्तधनो यजन् गुणगुरून् सद्गीस्त्रिवर्गं भज–
न्नन्योन्यानुगुणं तदर्हगृहिणीस्थानालयो ह्रीमयः ।
युक्ताहारविहार आर्यसमितिः प्राज्ञः कृतज्ञो वशी
शृण्वन् धर्मविधिं दयालुरघभीः सागारधर्मं चरेत् ॥११॥

टीका—अत्र 'पूज्याश्चार्हे' इत्यनेनार्हे सप्तमी । चरितुमर्हतीत्यर्थः । विधौ वा, यथोक्तगुणेन गृहिणा सागारधर्मश्चरितव्य इत्यर्थः । अत्र पूर्वो भद्रक उत्तरो द्रव्यपाक्षिक इति विभागः । चरेत् अनुतिष्ठेत् । कोऽसौ, 'न्यायोपात्तधन' इत्यादिविशेषणैश्चतुर्दशभिः समस्तैर्व्यस्तैर्वा विशिष्टो गृही । कं, सागारधर्ममिति वाक्यार्थः । इतो विशेषणानि व्याख्यायन्ते । न्यायोपात्तधनः, स्वामिद्रोहमित्रद्रोहविश्वसितवञ्चनचौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्ववर्णानुरूपः सदाचारो न्यायः तेनोपात्तमुपार्जितमागमसात्कृतं धनं विभवो येन स तथोक्तः । यजन्, गुणगुरून्, गुणाः सदाचारमौनत्वौदार्यदाक्षिण्यधैर्यप्रियपूर्वकप्रथमाभिभा-

---

१ सर्वत्र शुचयो धीराः सुकर्मबलगर्विताः ।
स्वकर्मनिहितात्मानः पापाः सर्वत्र शङ्किताः ॥
अन्यायोपार्जितं वित्तं दशवर्षाणि तिष्ठति ।
प्राप्ते चैकादशे वर्षे समूलं च विनश्यति ॥
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥

२ लोकापवादभीरुत्वं दीनाभ्युद्धरणादरः ।
कृतज्ञता सुदाक्षिण्यं सदाचारः प्रकीर्तितः ॥

षणादय स्वपरोपकारिण आत्मधर्मास्तान् पूजयन् बहुमानप्रशसासाहाय्य-करणादिना समुल्लासयन्, तथा गुरवो मातापितरावाचार्यश्च तानपि पूजयन् त्रिसन्ध्यप्रणामकरणादिनोपचरन्, तथा गुणैर्ज्ञानसयमादिभिर्गुरवो महान्तो गुणगुरवस्तानपि यजन् सेवाञ्जल्यासनाभ्युत्थानादिकरणगणेन मानयन्, गुणाश्च गुरवश्च गुणगुरवश्चेति विगृह्यैकशेषेण गुणगुरवस्तान् । सद्वी, सती प्रशस्ता परावर्णवादपारुष्यादिदोषरहिता गीर्वाग्यस्यासौ सद्वी । त्रिवर्ग *भजन्नन्योन्यानुगुण*, परस्परानुपघातक त्रिवर्ग धर्मार्थकामान् भजन् सेवमान । तदर्हगृहिणीस्थानालय, गृहिणी कौलीन्यादिगुणालङ्कृता पत्नी, स्थान पुरग्रामादि वास्तु च, आलया गृह, गृहिणी च स्थान च आलयश्च गृहिणीस्थानालया, तदर्हास्त्रिवर्गयोग्या गृहिणीस्थानालया यस्य स तथा-क्त । न्हीमय, लज्जाया निवृत्त इव लज्जाभूयिष्ठो वा । युक्ता हारविहार, युक्तौ शास्त्रविहितावाहारविहारौ भोजनविचरणे यस्य स ।

---

१ यन्मातापितरौ क्लेश सहेते सम्भवे नृणाम् ।
न तस्य निष्कृति शक्या कर्तुं वर्षशतैरपि ॥

२ यदिच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गा चरन्तीं निवारय ॥
परपरिभवपरिवादा दात्मोत्कर्षाच्च बध्यते कर्म ।
नीचैर्गोत्र प्रतिभव मनेकभवकोटिदुर्मोचम् ॥

३ *यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ।*
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥
पादमायान्निधिं कुर्यात्पाद वित्ताय खट्वयेत् ।
धर्मोपभोगयो पाद पाद भर्तव्यपोषणे ॥
आयार्द्धं च नियुञ्जीत धर्मे समधिक तत ।
शेषेण शेष कुर्वीत यत्नतस्तुच्छमैहिकम् ॥

४ अभ्युत्थानमुपागत गृहपतौ तद्भाषणे नम्रता
तत्पादार्पितदृष्टिरासनविधौ तस्योपचर्या स्वय ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति
प्राच्यै पुत्रि निवेदिता कुलवधूसिद्धांतधर्मा इमे ॥

आर्यसमिति, आर्येषु सदाचारेषु कृतप्रणेषु न तु विनयभ्रष्टविटभट्टभण्डवादिषु, समिति संगतिर्यस्यासौ । प्राज्ञ, ऊहापोहात्मकमतिज्ञानातिशयवान् । कृतज्ञ, कृतं परोपकृतं जानाति न निह्नुते । वशी, इष्टेष्वर्थेष्वनासक्त्या विरुद्धे चाऽप्रवृत्त्या स्पर्शनादीन्द्रियविकारनिरोधकान्तरङ्गादिषड्वर्गनिग्रहपरश्च । शृण्वन् धर्मविधि, धर्मस्याभ्युदयनिःश्रेयसहेतोर्विधिं युक्त्यागमाभ्यां प्रतिष्ठां तं शृण्वन् प्रत्यहमाकर्णयन् । दयालु, दु ःखितदुःखप्रहाणेच्छालक्षणां दयां शीलयन्, 'धर्मस्य मूलं दयेति'

१　यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि ।
　अथ सज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥

२　इदं फलमियं क्रिया करणमेतदेष क्रमो
　व्ययोऽयमनुषङ्गजं फलमिदं दशेयं मम ।
　अयं सुहृदयं द्विषन्प्रयतदेशकालाविमा—
　विति प्रतिवितर्कयन्प्रयतते बुधो नेतर ॥
　प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मन ।
　किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति ॥

३　विचित्सुरेनं तदिहाप्यवश्यं कृतप्रणामः समुपैहि पापम् ।
　गुणैरपेतोऽप्यखिलै कृतघ्न समस्तमुद्वेजयते हि लोकम् ॥

४　भव्य किं कुशलं ममेति विमृशन्दुःखाद्भृशं भीतवान्
　सौख्यैषी श्रवणादिबुद्धिविभव श्रुत्वा विचार्य स्फुटम् ।
　धर्मं शर्मकरं दयागुणमयं युक्त्यागमाभ्यां स्थितं
　गृह्णन्धर्मकथाश्रुतावधिकृत शास्यो निरस्ताग्रह ॥

५　प्राणा यथाऽऽत्मनोऽभीष्टा भूतानामपि ते तथा ।
　आत्मौपम्येन भूतानां दयां कुर्वीत मानव ॥
　श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
　आत्मन प्रतिकूलानि परेषां न समाचरेत् ॥
　अकृत्रिम्यापि[illegible]-मनुष्ठेय दानिम ।
　आत्मवन्मननं परे यदि [illegible] ॥

भेतस्तामवश्यं कुर्वाण । अघभी, अघात्पापात् दृष्टादृष्टापायफलाल्कर्मणश्चौर्यादेर्मद्यपानादेश्च बिभ्यत् पापभीरुरित्यर्थ । एषा सक्षेपतो व्याख्याऽत्र कृता। विस्तरतो धर्मामृतपञ्जिकायां ज्ञानदीपिकासञ्ज्ञिकायां कृता, सा सर्वोऽत्र द्रष्टव्या ॥ ११ ॥

साम्प्रतं मन्दमतिविनेयानां सुखस्मृत्यर्थं सकलसागारधर्मं सङ्गृह्णाति—

> सम्यक्त्वममलममला-
> न्यणुगुणशिक्षाव्रतानि मरणान्ते ।
> सल्लेखना च विधिना
> पूर्णः सागारधर्मोऽयम् ॥ १२ ॥

टीका—भवति । अय श्रूयमाण सागारधर्म । किंविष्ट', पूर्ण समग्र । किं किमित्याह—सम्यक्त्व तावत्किंविशिष्ट, अमल शङ्कादिदोषरहितं । तथा अणुगुणशिक्षापूर्वाणि व्रतानि अणुगुणशिक्षाव्रतानि अणुव्रतानि गुणव्रतानि शिक्षाव्रतानि च । किंविशिष्टानि, अमलानि निरतिचाराणि । न केवल निरतिचारतत्त्वार्थश्रद्धानपूर्वाणि निरतिचाराणुव्रतादीनि किं तर्हि, मरणान्ते विधिना सल्लेखना चेत्यय सम्पूर्ण श्रावकधर्म । शेषविशेषणाना यथास्वमत्रैवान्तर्भावादनुक्तसमुच्चयार्थेन चशब्देन समुच्चयनाच । तत्र मरणमेवान्तो मरणान्तस्तत्तद्भवमरण, न त्वावीचिमरण तस्य प्रतिक्षणं सर्वप्राणिषु भावात्। सल्लेखना सम्यक् लाभाद्यनपेक्षत्वेन लेखना, बाह्येनाभ्यन्तरेण च तपसा कायकषायाणां कृशीकरणम्। विधिस्तु सप्तदशाध्याये वक्ष्यते। (यत्प्रतिसमयमायुष' कर्मणो निषेकस्योदयपूर्विका निर्जरा भवति तदावीचिमरणम्)

असंयमिनोऽपि सम्यग्दृश कर्मक्लेशापकर्षो भवतीत्युपदेशार्थमिदमाह—

> भूरेखादिसदृक्कषायवशगो यो विश्वदृश्वाज्ञया
> हेयं वैषयिकं सुखं निजमुपादेयं त्विति श्रद्दधत् ।
> चौरो मारयितुं धृतस्तलवरेणेवाऽऽत्मनिन्दादिमान्
> शर्माक्षं भजते रुजत्यपि परं नोत्तप्यते सोऽप्यघैः॥१३॥

दुर्निवारत्वात्स्वकाले विपच्यमानस्य कर्मणः। एतेन सम्यक्त्वग्रहणात्पूर्वमब-द्धायुषोऽसंयतस्यापि सम्यग्दृष्टेः सुदेवत्वसुमानुषत्वव्यतिरेकेण सकलसंसार-संहरणात् कर्मक्लेशापकर्षः। बद्धायुषस्तु पश्चादगृहीतसम्यक्त्वस्य नरकगतेरपि रत्नप्रभायां जघन्यस्थित्यैवानुभवनसम्भवात् बहुदुःखोपरमश्च प्रतिपादितः प्रतिपत्तव्यः। ततः सयमलब्धिकालात्पूर्वं संसारभीरुणा भव्येन सम्यग्दर्शना-राधनायां नित्यं यतितव्यमिति विधौ पर्यवसन्नमेतत्सूत्रमधिगन्तव्यम्॥

इदानीं धर्मशर्मवद्यशोऽपि मनःप्रसत्तिनिमित्तत्वात् शिष्टैरवश्यं सेव्यमि-त्युपदेष्टुमाह—

धर्मं यशः शर्म च सेवमानाः
केऽप्येकशो जन्म विदुः कृतार्थम्।
अन्ये द्विशो विद्म वयं त्वमोघा-
न्यहानि यान्ति त्रयसेवयैव॥ १४॥

टीका—विदुः जानन्ति। के, केऽपि लौकिकाः। किं तत्, जन्म मनुष्यभव-ग्रहणम्। किंविशिष्टं, कृतार्थं कृतः साधितोऽर्थः प्रयोजनं साध्यं यस्य तत्। किंकुर्वाणाः, सेवमानाः कर्तव्यतानुरक्तबुद्ध्या साधयन्तः। कं, धर्मं सुकृतम्, यशः कीर्तिम्, शर्म सुखम्। कथम्, एकशः एकैकम्। केचिद्धर्ममात्रं केचिद्यशोमात्रं केचिच्च सुखमात्रं साधयन्तो वयं प्राप्तमनुष्यजन्मफला इति मन्यन्ते, नानारुचित्वाल्लोकस्य। तथा अन्ये लोकच्छन्दानुवर्तिनः शास्त्रज्ञम्मन्या विदुः। किं, जन्म। किम्भूतं, कृतार्थम्। किं कुर्वाणाः, धर्मं यशः शर्म च सेव-मानाः। कथं, द्विशः द्वे द्वे। केचिद्धर्मयशसी केचिद्धर्मशर्मणी केचिद्यशःशर्मणी च साधयन्तो जन्म फलवन्मन्यन्त इत्यर्थः। तर्हि युष्माकं किं मतमित्यत्राह-

१ दुर्गतावायुषोबन्धात्सम्यक्त्वं यस्य जायते।
गतिच्छेदो न तस्यास्ति तथाप्यल्पतरा स्थितिः॥

२ जन्मोन्माज्यँ भजतु भवतः पादपद्मं न लभ्यं
तच्चेत्स्वैरं चरतु न च दुर्देवतां सेवतां सः।
अश्नात्यन्नं यदिह सुलभं दुर्लभं चेन्मुधाऽऽस्ते
क्षुद्व्यावृत्त्यै कवलयति कः कालकूटं बुभुक्षुः॥

नुविशेषे । विद्म जानीम । के ते, वय लौकिकशास्त्रज्ञपरितोषकारिण । कानि, अहानि दिनानि अर्थान्नृजन्मसम्बन्धीनि । किं कुर्वन्ति, यान्ति गच्छन्ति । किंविशिष्टानि,अमोघानि सफलानि । कया, त्रयसेवया धर्मयशःशर्मसाधनया, न पुनरेकैकस्य द्वयोर्द्वयोर्वा निर्वर्तनयेत्येवकारार्थ । एतेनाहरहर्यथाशक्ति- धर्मादित्रय साध्यमिति विधि प्रत्येय ॥ १४ ॥

एव भावितसम्यक्त्वस्य सयतत्वसामग्रीविरहे कालादिलब्धिलाभादवश्या- रोहणीय सँयतासँयतत्वपद निर्देष्टुमाह—

मूलोत्तरगुणनिष्ठा-
मधितिष्ठन्पञ्चगुरुपदशरण्यः ।
दानयजनप्रधानो
ज्ञानसुधां श्रावकः पिपासुः स्यात् ॥ १५ ॥

टीका-स्यात् भवेत् । कोऽसौ, श्रावक शृणोति गुर्वादिभ्यो धर्ममिति श्रावक । किं कुर्वन्, अधितिष्ठन् उपयुञ्जान । कां, मूलोत्तरगुणनिष्ठां मूलानि उत्तरगुणप्ररोहणनिमित्तत्वात् सँयमार्थिभि प्रागनुष्ठेयत्वाच्च उत्तरे मूलगुणान न्तरसेव्यत्वादुत्कृष्टत्वाच्च, मूलानि च उत्तरे च मूलोत्तरास्ते च ते गुणाश्च सयमविकल्पा तेषा निष्ठा निर्वाहो दृष्टफलनिरपेक्षतया निराकुल वहन् । किम्भूतो भूत्वेत्याह—पचगुरुपदशरण्य , पचानां गुरूणामर्हदादीनां पदानि चरणा शरण्यानि शरणे आर्तिहरणे स्वात्मसमर्पणे वा साधूनि योग्यानि यस्य स तथोक्त । एव सम्यग्दर्शनपूर्वक देशसँयममधितिष्ठतो दानयजना- ध्ययनलक्षणमाचार कर्तव्यतया दानेत्यादिना निर्दिशति—कीदृशस्तथाभूत श्रावक स्यात्, दानयजनप्रधान दान—पात्रादिभिश्चतुर्धा, यजन—नित्य- महादियज्ञ पचधा, दान च यजन च दानयजने प्रधाने मुख्ये यस्यासौ ।

---

१ जो तसवहादु विरदो अविरदओ तह य थावरवहादो ।
एक्कसमयम्हि जीवो विरदाविरदो जिणेक्कमइ ॥

२ ध्यानेन शोभते योगी सयमेन तपोधन ।
सत्येन वचसा राजा गेही दानेन शोभते ॥

वार्ता तु श्रावकस्य गौणीति प्रधानमहणाल्लक्षयति। किं चैरिदणु श्रावक स्यात्, पिपासु. पातुमिच्छु उपयोक्तकाम ।कां, ज्ञानसुधां स्वपरान्तरज्ञानामृतम् ।

एव पञ्चमगुणस्थानं निर्दिश्य तद्विकल्पानां भावद्रव्यात्मनामेकादशाना मुपासकपदानां मध्येऽन्यतमं विशुद्धदृष्टिर्महाव्रतपरिपालनलालसो यथात्मशक्ति य प्रतिपद्यते तमभिनन्दति—

रागादिक्षयतारतम्यविकसच्छुद्धात्मसंवित्सुख-
स्वादात्मस्वबहिर्बहिस्त्रसवधाद्यंहोव्यपोहात्मसु ।
सद्दृग्दर्शनिकादिदेशविरतिस्थानेषु चैकादश-
स्वेकं यः श्रयते यतिव्रतरतस्तं श्रद्दधे श्रावकम् ॥१६॥

टीका—श्रद्दधे साधु करोम्ययमिति प्रतिपद्येऽहम् । कं, तं श्रावकं । यः किं, य श्रयते स्वीकुरुते । किं तत्, एक पद । केषु मध्ये, दर्शनिकादिदेशविरतिस्थानेषु एकादशसु वक्ष्यमाणेषु । कथम्भूतो भूत्वा, सद्दक् सम्यग्दर्शनशुद्ध । पुन किंविशिष्ट, यतिव्रतरत यतीनामनगाराणा व्रतानि सर्वहिंसादिविरतिपरिणामास्तेषु रत आसक्त, सर्वविरतिकलशारोपणो हि श्रावकधर्मप्रासाद ।किंविशिष्टेषु भावतस्तेष्वित्याह–रागादिक्षयतारतम्येत्यादि, क्षय सर्वघातिस्पर्द्धकानामुदयाभाव अर्थाद्देशघातिस्पर्द्धकानामुदय, तारतम्यं यथोत्तरमुत्कर्ष, रागादीनां रागद्वेषमोहानां क्षयतारम्येन विकसन्ती आविर्भवन्ती चासो शुद्धात्मसंविच्च निर्मलचिद्रूपानुभूति सैव तदुत्थ वा सुखमानन्दस्तस्य स्वाद स्वसंवित्याऽनुभव स एवात्मा स्वरूपं येषा तानि तदात्मानि तेषु ।क, एवभूतेषु अबहिरध्यात्मं । तर्हि द्रव्यत किंरूपेष्वित्याह- बहि शरीरे वाचि मनसि च त्रसवधं आदिर्येषां स्थूलादीनां तानि त्रसवधादीनि तान्येव अंहांसि पापानि तत्फलत्वात्तेभ्यो व्यपोहो विधिपूर्वकं देवगुरुसधर्मसाक्षिकमपोहो विरति सैवात्मा एषा तानि तेषु । 'च' शब्दस्यात्र भिन्नक्रमस्य योजनात्॥ १६ ॥

---

१ आयुःश्रीवपुरादिकं यदि भवेत्पुण्यं पुरोपार्जितं
स्यात्सर्वं न भवेन्न तच्च नितरामायासितेऽप्यात्मनि ।
इत्यार्या सुविचार्य कार्यकुशला कार्येऽत्र मंदोद्यमा
द्रागागामिभवार्थमेव सततं प्रीत्या यतन्ते तराम् ॥

किं रुक्षणास्ते दर्शनिकादयो भवन्तीत्युद्दिशति—

दृष्ट्या मूलगुणाष्टकं व्रतभरं सामायिकं प्रोषधं
सचित्तान्नदिनव्यवायवनितारम्भोपाधिभ्यो मतात्।
उद्दिष्टादपि भोजनाच्च विरतिं प्राप्ताः क्रमात्प्राग्गुण-
प्रौढ्या दर्शनिकादयः सह भवन्त्येकादशोपासकाः ॥१७॥

टीका—भवन्ति। के, उपासका श्रावका। कति, एकादश। किन्नामान दर्शनिकादय। दर्शनिकोऽथ व्रतिक इत्यादिना वक्ष्यमाणा। किं विशिष्टा-सन्त, प्राप्ता प्रतिपन्ना। किं तत्, दृष्ट्या मूलगुणाष्टकमित्यादिविरतिमित्यन्तं देशसंयमं।तथा हि-सम्यक्त्वेन विशिष्टं मूलगुणाष्टकं प्राप्तो दर्शनिक, स एव च व्रतभरं निरतिचाराण्यणुव्रतादीनि प्राप्तो व्रतिक। एवमुत्तरेष्वपि सम्बन्ध कर्तव्य। व्यवायो मैथुनम्, वनिता स्त्री, उपाधि परिग्रह, मतात् मदर्थं साधुकृतमनेनेदमित्यनुमोदितात्, अपि भोजनात् मतादुद्दिष्टाच्च भोजनादपि विरतिं प्राप्तोऽनुमतविरत उद्दिष्टविरतश्च, योऽनुमतमुद्दिष्टं च भोजनपि न कुर्यात् स किमां न्यत्रारम्भादौ पापकर्मण्यनुमति दद्यात्, उद्दिष्ट च वसत्याच्छादनादिकमुपयुञ्जी-तेत्यपिशब्दाल्लभ्यते। कथ ते तत्तत्पदं प्राप्ता, सह सार्धम्। कया, प्राग्गुणप्रौढ्या दृष्टिमूलगुणाष्टकप्रकर्षेण सह व्रतभरं, तत्त्रयप्रकर्षेण सामायिकमित्यादियुक्त्या ते तथा भवन्तीत्यर्थ। कस्मात्तथा भवन्ति, क्रमात् अनादिविषयाभ्यासासयमभग्नमनस्कतया युगपत्तत्रासामर्थ्यात्।

साम्प्रतं दुरितापचयनिमित्तेज्यादिधर्मकर्मसिध्यर्थं कृष्यादिषट्कर्मलक्षण वार्तामाचरतो गृहस्थस्यावश्यभावी सावद्यलेश प्रायश्चित्तेन पक्षादिभिश्च निराकार्य इत्युपदेशार्थमाह—

नित्याष्टाह्निकसच्चतुर्मुखमहः कल्पद्रुमैन्द्रध्वजा-
विज्याः पात्रसमक्रियान्वयदयादत्तीस्तपःसयमान्।
स्वाध्याय च विधातुमादृतकृषीसेवावणिज्यादिकः
शुध्याऽऽप्तोदितया गृही मललवं पक्षादिभिश्च क्षिपेत्॥

टीका—क्षिपेत् निराकुर्यात्। कोऽसौ, गृही गृहस्थ। कं, मलल्व पापले-श. कया, शुध्या प्रायश्चित्तेन। किंविशिष्टया, आप्तोदितया। न केवल तया

पक्षादिभिश्च पक्षचर्यासाधनैस्त्रिभि । किंविशिष्ट सन्, आहतकृषीमेवावणिज्यादिक आहतानि यथास्व प्रवर्तितानि कृषीमेवावणिज्यानि आदिशब्दान्मषीविद्यादिरूपानि च षडाजीवनकर्माणि येन स आहतकृषीमेवावणिज्यादिक । किं कर्तुं, विधातु कर्तुं करिष्याम्यहमिज्यादीनि जिनागमप्रसिद्धानि पञ्च धर्मकर्माणीति अध्यवसाय । कानि तानीत्याह-नित्येत्यादि, नित्यमह *अष्टाह्निकमह सचतुर्मुखमह कल्पद्रुम ऐन्द्रध्वजश्चेति पञ्चार्हत्पूजाविशेषा इज्या । चतुर्मुखस्य सदिति विशेषणाद्ग्रेशर्नामयमेव परमोत्कृष्ट कल्पवृक्षस्यासम्भवादिति प्रकाशयति । अत एवैन्द्रध्वजेन सह समस्यैष निर्दिष्ट । पात्रे-

उक्त च आर्षे भगवज्जिनसेनपादै –
प्रोक्ता पूजार्हतामिज्या सा चतुर्धा सदार्चनम् ।
चतुर्मुखमह कल्प द्रुमश्चाष्टाह्निकोऽपि च ॥
१ तत्र नित्यमहो नाम शश्वज्जिनगृह प्रति ।
स्वगृहान्नीयमानाऽर्चा गन्धपुष्पाक्षतादिका ॥
चैत्यचैत्यालयादीना भक्त्या निर्मापण च यत् ।
शासनीकृत्य दान च ग्रामादीना सदार्चनम् ॥
या च पूजा मुनीन्द्राणा नित्यदानानुषङ्गिणी ।
स च नित्यमहो ज्ञेयो यथा शक्त्युपकल्पित ॥
* अष्टाह्निको मह सार्व जनिको रूढ एव स ।
२ महामकुटबद्धैस्तु क्रियमाणो महामह ।
चतुर्मुख स विज्ञेय सर्वतोभद्र इत्यपि ॥
३ दत्त्वा किमिच्छुक दान सम्राड्भिर्य प्रवर्त्यते ।
कल्पवृक्षमह सोऽय जगदाशाप्रपूरण ॥
४ महानैन्द्रध्वजोऽन्यस्तु सुरराजै कृतो मह ॥
बलिस्नपनमित्यन्य त्रिसंध्यासेवया समम् ।
उक्तेष्वेव विकल्पेषु ज्ञेयमन्यच्च तादृशम् ॥
एव विधविधानेन या महेज्या जिनेशिनाम् ।
विधिज्ञास्तामुशन्तीज्यां वृत्ति प्राथमकल्पिकीम् ॥
वार्ता विशुद्धवृत्त्या स्या कृष्यादीनामनुष्ठिति ।

त्यादि, समा आत्मना समाना क्रिया आधानादिका उपलक्षणान्मन्त्रव्रतादयश्च यस्यासौ समक्रिय , पात्रं च समक्रियश्च अन्वयश्च दया च पात्रसमक्रियान्वयदयास्तदाश्रया दत्तयो दानानि तद्दत्तयस्ता , पात्रदत्तिं समानदत्तिमन्वयदत्तिं दयादत्तिं च । तपोऽनशनादि संयमं व्रतधारणं । स्वाध्यायं श्रुतभावनाम् ।

किमेतत्पक्षादित्रयमित्याह--

स्यान्मैत्र्याद्युपबृंहितोऽखिलवधत्यागो न हिंस्यामहं
धर्माद्यर्थमितीह पक्ष उदितं दोषं विशोध्योज्झतः ।
सूनौ न्यस्य निजान्वयं गृहमथो चर्या भवेत्साधनं
त्वन्तेऽन्नेहतनूज्झनाद्विशदया ध्यात्यात्मनः शोधनम् ॥

टीका--स्यात् भवेत् । कोऽसौ, पक्ष अहिंसापरिणामत्व । किंभारमा, अखिलवधत्याग अखिलोऽनृतादिसहितो वध प्राणातिपात , स चेह सागारधर्मप्रम मान्त्रसवधविषय एव तस्य त्यागो वर्जन । किंविशिष्ट , मैत्र्याद्युपबृंहितो मैत्रीप्रमोदकारुण्यमाध्यस्थ्यभावनाभिरुपचित । केन, न हिंस्यामहं

१ चतुर्धा वर्णिता दत्ति-र्दयादानसमाऽन्वयैः ॥
सानुकम्पमनुग्राह्ये प्राणिवृन्देऽभयप्रदा ।
त्रिशुद्ध्यानुगता सेयं दयादत्तिर्मता बुधैः ॥
महातपोधनायार्च्या प्रतिग्रहपुरःसरम् ।
प्रदानमशनादीनां पात्रदानं तदिष्यते ॥
समानायात्मनाऽन्यस्मै क्रियामन्त्रव्रतादिभिः ।
निस्तारकोत्तमायेह भूहेमाद्यतिसर्जनम् ॥
समानदत्तिरेषा स्यात् पात्रे मध्यमतामिते ।
समानप्रतिपत्त्यैव प्रवृत्ता श्रद्धयाऽन्विता ॥
आत्मान्वयप्रतिष्ठार्थं सूनवे यदशेषत ।
समं समयवित्ताभ्यां स्ववर्गस्यातिसर्जनम् ॥
सैषा सकलदत्तिः स्यात् स्वाध्यायः श्रुतभावना ।
तपोऽनशनवृत्त्यादि संयमो व्रतधारणम् ॥

धर्मार्थमित्येतस्मात्प्रकारेण सङ्कल्पेन धर्मार्थं देवतार्थं मन्त्रसिद्ध्यर्थमौषधार्थमाहारार्थं वा प्राणिघातं न कुर्यामिति प्रतिज्ञाय। अयं हि मन्दकषायोऽपि गृहवासमेवनरतत्वेन प्रवर्तितारम्भत्वादनारम्भजामेव साङ्कल्पिकीं हिंसां परिहर्तुं शक्नोति, न पुनरारम्भानुबन्धिनीम्, तस्या गृहिणोऽवश्यम्भावात्। क्व पक्ष स्यात्, इह एतेषु पक्षादिषु मध्ये। तथा भवेत्। कोऽसौ, चर्यां दर्शनिकाद्यारम्यानुमतिविरतं यावद्गुणामकाचार.। कस्य गृहिणः। किं कुर्वन्, उज्झनस्त्यजन.। किं तत्, गृहं। किं कृत्वा, न्यस्य स्थापयित्वा। कं, निजान्वयं स्व पोष्यवर्गं धनं धर्म्यं च। क्व, सूनौ पुत्रे। तदसम्भवे तत्तुल्ये वंश्येऽपि। किं कृत्वा, विशोध्य विधिपूर्वकं प्रायश्चित्तेन शास्त्रोक्तविधानेन निराकृत्य। कं, दोषं हिंसादिकं। किंविशिष्ट,-मुदित कृष्यादिद्वारेणोत्पन्नं। कथम्भूतो, पक्षसंस्कारानन्तरं वैराग्यपरिणामे सत्यहमारोहति सतीत्यर्थः। तथा भवेत्। किं सत्, साधनं। किं, शोधनं शुद्धी रागादिदोषापनयनं। कस्य, आत्मन चिद्रूपस्य। कया, ध्यात्या ध्यानेन। कि विशिष्टया, विशदया शुद्धया। कस्मात्, अत्रेहतनूज्झनात् अन्न चाहार ईहश्च शरीरचेष्टा तनुश्च शरीरमत्रेहतनवस्तासामुज्झनं नियतकालं यावज्जीवं च यथोचितं परित्यागस्तस्मात्। क्व,अन्ते गृहत्यागावसाने मरणे चासन्ने। 'मु'शब्दादुदितं दोषं विशोध्येत्यनुवृत्यात्रापि योज्यम् ॥१९॥

इदानीं पक्षादिकल्पनाद्वारेण कृतावतारान् श्रावकस्य त्रीन् प्रकारानुद्दिश्य संक्षेपेण लक्षयन्नाह—

पाक्षिकादिभिदा त्रेधा श्रावकस्तत्र पाक्षिकः।
तद्धर्मगृह्यस्तन्निष्ठो नैष्ठिकः साधकः स्वयुक् ॥२०॥

टीका—भवति। कोऽसौ, श्रावक। कतिधा, त्रेधा त्रिविध। कया, पाक्षिकादिभिदा पक्षेण चरति दीव्यति जयति वा, पाक्षिक आदिर्यस्यासौ पाक्षिकादि, पाक्षिको नैष्ठिकः साधकश्चेति स एव तेन वा भिद् भेदो विकल्पस्थनं पाक्षिकादिभिद् तया। तानेव लक्षणतो दर्शयति– तत्रेत्यादि, तत्र तस्यां पाक्षिकादिभिदि। भवति। कोऽसौ, पाक्षिक। किरूप, तद्धर्मगृह्य. तस्य श्रावकस्य धर्मं एकदेशहिंसाविरतिरूपं मत गृह्यं पक्ष प्रतिज्ञा-

विषयो यस्यासौ प्रारब्धदेशसंयम श्रावकधर्मस्वीकारपर इत्यर्थ । तथा भवति । कोऽसौ, नैष्ठिक निष्ठया चरति तत्र वा भव । किंविशिष्ट, तन्निष्ठ तत्र धर्मे निष्ठा निर्वहण यस्यासौ घटमानदेशसयमो निरतिचारश्रावकधर्म-निर्वाहपर इत्यर्थ । तथा भवति । कोऽसौ, साधक समाधिमरण साधयतीति साधक । किंविशिष्ट, स्वयुक् स्वस्मिन्नात्मनि युक् समाधिर्यस्यासौ निष्पन्न-देशसमय आत्मध्यानतत्पर इति भद्रम् ॥ २० ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितो दशम
प्रकरणाच प्रथमोऽध्याय ।

द्वितीयोऽध्यायः ।

एव सागारधर्मं सूचयित्वा पाक्षिकाचारं प्रपञ्चयितुकाम प्रथम तावदा-दशस्य भव्यस्य सागारधर्माभ्युपगमो धर्माचार्यैरभ्यनुज्ञायते तादृश त दर्शयन्नाह—

त्याज्यानजस्रं विषयान् पश्यतोऽपि जिनाज्ञया ।
मोहात्त्यक्तुमशक्तस्य गृहिधर्मोऽनुमन्यते ॥ १ ॥

टीका—अनुमन्यते नियतामित्यनुज्ञायते धर्माचार्यै[१] । कोऽसौ, गृहिधर्म । कस्य, अर्हतस्य असमर्थस्य । किं कर्तु, त्यक्तु । कान्, विषयान् इष्टकामिन्या-दीन् । कस्मात्, मोहात् प्रत्याख्यानावरणलक्षणचारित्रमोहोदयोद्रेकात् । किं कुर्वतोऽपि, पश्यतोऽपि प्रतिपद्यमानस्य, न पुनरनन्तानुबन्धिरागादिपरतन्त्रत्व-स्सेव्यतयाऽभ्युपगच्छत इत्यपिशब्दार्थः । कान्, विषयान् । किंविशिष्टान्, त्याज्यान् असेव्यान् । कथम्, अजस्र शश्वत् । कया, जिनाज्ञया वीतरागसर्व-ज्ञानुलंघ्यशासनेन सम्यग्दर्शनशुद्धस्य सत इत्यर्थ । इदमत्र तात्पर्यं, एकदेश-

---

१ विषयविषमाशनोत्थित-मोहज्वरजनिततीव्रतृष्णस्य ।
नि शक्तिकस्य भवत प्राय पेयाद्युपक्रम श्रेयान् ॥

विरतिमहं करिष्यामीति प्रतिपद्यमानो गृही सूरिभिरोमित्यनुज्ञायते । एतेन स्थावरवधानुमतिदोषानुषंगोऽप्याचार्याणां परिहृतो भवति ॥ १ ॥

अधुना पाक्षिकं दर्शनविशुद्धिमभ्यासीनमहिमाभिध्यर्थं मद्यादिविरतौ नियुङ्क्ते–

तत्रादौ श्रद्दधज्जैनी-माज्ञां हिंसामपासितुम् ।
मद्यमांसमधून्युज्झे-त्पञ्च क्षीरिफलानि च ॥ २॥

टीका–उज्झेत् त्यजेत् । कोऽसौ, देशसंयमोन्मुखो गृही । कानि, मद्यमांस-मधूनि, न केवलमेतानि पञ्च क्षीरिफलानि च क्षीरिणां पिप्पलादीनां पञ्चानां फलानि । च-शब्दान्नवनीतरात्रिभुक्त्यगालितपानीयादिकमप्युत्सृजेदित्यनुक्तं समुच्चितं प्रतिपत्तव्यम् । किं कर्तुं, अपासितुं त्यक्तुं । कां, हिंसां भावतो मद्यादिविषयरागरूपां द्रव्यतश्च तद्गतप्राणिप्राणव्यपरोपणलक्षणाम् । किं कुर्वन्, श्रद्दधत् । कां, आज्ञां । किंविशिष्टां, जैनीं जिनागममित्यर्थं । क, आदौ प्रथमतः । क, तत्र गृहिधर्मे । एतेनेदमुक्तं भवति, तादृग्जिनाज्ञाश्रद्धानेनैव मद्यादिविरतिं कुर्वन् देशव्रती स्यात् न कुलधर्मादिबुध्या ॥ २ ॥

अथ स्वमतपरमताभ्यां मूलगुणान् विभजते–

अष्टैतान् गृहिणां मूल-गुणान् स्थूलवधादि वा ।
फलस्थाने स्मरेद् द्यूतं मधुस्थान इहैव वा ॥ ३ ॥

टीका–स्मरेत् स्मृतिविषयीकुर्यात् । कोऽसौ, मूलगुणस्थापनोद्यतः सूरिः । कान्, मूलगुणान् । केषां, गृहिणां । किंविशिष्टान्, एतान् उपासकाध्ययनादि-

१ सर्वविनाशी जीवस्त्रसहनने त्यज्यते यतो जैनैः ।
स्थावरहननानुमतिस्तत कृता तैः कथं भवति ॥

२ मांसाशिषु दया नास्ति न सत्यं मद्यपायिषु ।
आनृशंस्यं न मर्त्येषु मधूदुम्बरसेविषु ॥

शास्त्रानुसारिभिः पूर्वमनुष्ठेयतयोपदिष्टान्। कानि, अष्ट मद्यमांसमधुपञ्चोदुम्बरफलविरतिरूपान्। वा शब्दः पक्षान्तरसूचने। स्वामिसंमतभद्रमते पुनः सूरिः स्मरेत्। किं तत्, स्थूलवधादि स्थूलहिंसानृतस्तेयमैथुनग्रन्थपञ्चकम्। क्व, फलस्थाने पञ्चोदुम्बरफलप्रसङ्गे तन्निवृत्तौ वा मद्यमांसमधुविरतित्रयं पञ्चाणुव्रतानि चाष्टौ मूलगुणान् स्मरेदित्यर्थः। पुनर्वाशब्दः पक्षान्तरसूचने। महापुराणमते तु-स्मरेत्। किं तत्, द्यूतं। क्व, मधुस्थाने। कस्मिन् इहैव अस्मिन्नेव स्वाम्युक्ताष्टमूलगुणपक्षे मद्यमांसद्यूतविरतित्रयं पञ्चाणुव्रतानि चाष्टौ मूलगुणान् स्मरेदित्यर्थः। स्मरेदित्यनेन न च सर्वत्र यमनियमादौ भुक्त्यगे स्मरणपरेण भवितव्यमिति लक्षयति ॥

सम्प्रति मद्यस्य जन्तुभूयिष्ठतानुवादपुरस्सरमुपयोक्तॄणामुभयलोकबाधकत्वमुपदर्शयन्नवश्यत्याज्यतामभिधत्ते—

> यदेकबिन्दोः प्रचरन्ति जीवा-
> श्चेत्तत् त्रिलोकीमपि पूरयन्ति ।
> यद्विक्लवाश्चेममं च लोकं
> यस्यन्ति तत् कश्यमवश्यमस्येत् ॥ ४ ॥

टीका—अस्येत् त्यजेत्। कोऽसौ, स्वहितैषी। किं तत्, कश्यं मद्यं। कथ, अवश्यं नियमेन मद्यविरतिव्रतं स्वीकुर्यादित्यर्थः। यतः पूरयन्ति

---

१ मद्यमांसमधुत्यागैः सहोदुम्बरपञ्चकैः ।
अष्टावेते गृहस्थानामुक्ता मूलगुणाः श्रुते ॥
(सोमदेव)

२ मद्यमांसमधुत्यागैः सहाणुव्रतपञ्चकम् ।
अष्टौ मूलगुणानाहुर्गृहिणां श्रमणोत्तमाः ॥
(समन्तभद्र)

३ हिंसासत्यस्तेयाद्ब्रह्मपरिग्रहाच्च बादरभेदात् ।
द्यूतान्मांसान्मद्याद्विरतिर्गृहिणोऽष्ट सन्त्यमी मूलगुणाः ॥

४ मनोमोहस्य हेतुत्वा निदानत्वाच्च दुर्गतेः ।
मद्यं सद्भिः सदा त्याज्यमिहामुत्र च दोषकृत् ॥
विवेकः संयमो ज्ञानं सत्यं शौचं दया क्षमा ।
मद्यात्प्रलीयते सर्वं तृण्या वह्निकणादिव ॥

भरन्ति। के ते, जीवा । कां त्रिलोकीमपि समस्तविश्वमपि । क्य, तत् तत्र । चे, यदि । प्रचरन्ति सचरन्ति । के, जीवा । कस्मात् यदेकबिन्दो यस्य मद्यस्यैकस्माद् बिन्दो पृषत सकाशात्, तज्जा प्राणिनो यदि विचरेयुरि त्यर्थ । यतश्च गरयन्ति भ्रशयन्ति श्रेयो, ऽहित कुर्वन्तीत्यर्थ । के ते, यद्विक्लवा येन मद्येन मोहितमतय । क, लोक । किंविशिष्ट, ममु, न केवलममु च तद्भवमुत्तरभव च दु समय कुर्वन्तीत्यर्थ ॥ ४ ॥

इदानीं मद्यपानस्य द्रव्यभावहिंसानिदानत्वमनूद्य तन्निवृत्तिप्रवृत्तिशीलाना गुणदोषौ दृष्टान्तद्वारेण स्पष्टयन्नाह—

पीते यत्र रसाङ्गजीवनिवहाः क्षिप्रं म्रियन्तेऽखिलाः
कामक्रोधभयभ्रमप्रभृतय सावद्यमुद्यन्ति च ।
तन्मद्यं व्रतयन्न धूर्तिलपरास्कन्दीव यात्यापद
तत्पायी पुनरेकपादिव दुराचारं चरन्मज्जति ॥ ५ ॥

टीका—न याति न प्राप्नोति । कोऽसौ, पुरुष । कां, आपद विपद । किं कुर्वन्, व्रतयन् व्रत कुर्वन् अमद्यपकुलजातोऽपि देवादिसाक्षिक निवर्तयन्नित्यर्थ । किं तत्, तन्मद्यमुक्त विनिपातप्राय मद्यम् । क इव धूर्तिलपरास्कन्दीव धूर्तिलनामा चोरो यथा। तत्पायी पुनर्मद्यपानशीलो मज्जति दुर्गतिदु खे मजति। किं कुर्वन्, चरन् अनुतिष्ठन् । क, दुराचार अगम्यगमनाभक्ष्यभक्षणापेयपानादिक । क इव, एकपादिव एकपाद्नामपरिव्राजको यथा । यत्र किं, यस्मिन्मद्ये पीते सति । म्रियन्ते विपद्यन्ते । के ते, रसाङ्गजीवनिवहा रसोऽङ्ग कारण येषा ते रसागा रसजा इत्यर्थ, तथा रसस्यागानि कारणानि रसागानि मद्ये रसजनका इत्यर्थ, रसागाश्च ते जीवाश्च रसागजीवास्तेषां निवहा सघाता । किंवि

१ रसजानां च बहूना जीवानां योनिरिष्यते मद्यम् ।
मद्य भजतां तेषा हिंसा सजायतेऽवश्यम् ॥
समुत्पद्य विपद्येह देहिनोऽनेकश किल ।
मद्ये भवन्ति कालेन मनोमोहाय देहिनाम् ॥

शिष्टा, अखिला समस्ता। कथं, क्षिप्रं पानानन्तरमेव। तथा उद्यन्ति उत्पद्यन्ते। के ते, कामादयः। क्व सति, यत्र पीते सति। कथं, सावद्यं पापेन निन्दया वा सह। कामो योन्यादौ रिरंसा, भ्रमो मिथ्याज्ञानं चक्रारूढस्येव शरीरभ्रमणं, कामश्च क्रोधश्च भयं च भ्रमश्च कामक्रोधभयभ्रमा ते प्रभृतयः प्रमुखा येषामभिमानहास्यारतिशोकादीनां ते ॥ ५ ॥

अथाचारविशुद्धिगर्वितानां पिशिताशनं गर्हमाणः प्राह—

स्थानेऽश्नन्तु पलं हेतोः स्वतश्चाशुचि कश्मलाः।
श्वादिलालावदप्यद्युः शुचिम्मन्याः कथं नु तत् ॥६॥

टीका—अश्नन्तु भक्षयन्तु। के ते, कश्मला जातिकुलाचारमलिना। किं तत्, पलं मांसं। किंविशिष्टं, अशुचि। कस्मात्, हेतोः शुक्रशोणितलक्षणात् कारणात्, न केवलं हेतोः स्वतश्च स्वभावेन अमेध्यबीजममेध्यस्वभावं चेत्यर्थः। कथं, स्थाने युक्तं कश्मलानां तथाप्रवृत्त्युपपत्तेः। नु अहो। कथमद्युः *कथं खादेयुः गर्हामहे। अन्याय्य (अनार्य) मेतत्। गर्हे सततस्य विधानात्।* के ते, शुचिम्मन्या आचारविशुद्धमात्मानं मन्यमानाः। किं तत्, पलं। किंविशिष्टं, श्वादिलालावदपि श्वादीनां कुक्कुरचित्रकश्येनादीनां लाला मुखस्रावः श्वादिलाला सा अस्मिन्नस्तीति श्वादिलालावत्, अथवा श्वादिलालया तुल्यं श्वादिलालवत् कुक्कुरादिलालायुक्तं तत्तुल्यं वा। अपि विस्मये ॥ ६ ॥

*साम्प्रतं स्वयमेव पक्वस्य मांसस्य पञ्चेन्द्रियस्य मत्स्यादेर्भक्षणमदूषणमुत्प्रे*क्षमाणान् प्रत्याह—

हिंस्रः स्वयम्मृतस्यापि स्यादश्नन् वा स्पृशन्पलम्।
पक्वापक्वा हि तत्पेश्यो निगोदौघसुतः सदा ॥ ७ ॥

१ भक्षयन्ति पलमस्तचेतना सप्तधातुमयदेहसंभवम्।
यद्वदन्ति च शुचित्वमात्मनः किं विडम्बनमतः परं बुधाः ॥
यतो मांसाशिनः पुंसो दमो दानं दयार्द्रता।
सत्यशौचव्रताचारा न स्युर्विद्यादयोऽपि च ॥

टीका—स्यात् भवेत् । कोऽसौ, पुमान् । किंविशिष्ट, हिंस्रे द्रव्यहिंसाशील । भावहिंसायास्तु मांसभक्षणे दर्पकरतरत्वेन वक्ष्यमाणत्वात् । किं कुर्वन्, अश्नन् खादन् स्पृशन् वा हस्तादिना संयोजयन् । किं तत्, पलं मांसं । कस्य, स्वयमृतस्यापि मीनादेः प्रयत्नमन्तरेणापि त्यक्तप्राणस्य मत्स्यमहिषादेः किं पुनरात्मना वधितस्येत्यपिशब्दार्थः । कुत इत्याह हि यस्मात् । भवन्ति । का, तत्पेश्यः तस्य पलस्य पेश्यः कोशाः । किंविशिष्टाः, निगोदौघसुतः निगोदानां साधारणानां जीवानामेकशरीरभेदवर्तिनामनन्तप्राणिनामोघाः सङ्घातास्तान् सुवन्ति जनयन्तीति निगोदौघसुतः । किं कदाचिन्नेत्याह—सदा सर्वदा । किंविशिष्टाः सत्यः, पक्वापक्वाः पक्वाश्चापक्वाश्चेति विगृह्यैकशेषेण पक्वापक्वा इत्यस्य निर्देशस्तेन पक्वा आमाः पच्यमानाश्चेत्यर्थः ॥ ७ ॥

अथ मांसस्य प्राणिहिंसातिरेकप्रभवत्वेनेन्द्रियदर्पकरतरत्वेन च भावहिंसाहेतुत्वानुवादपुरस्सरं तद्भक्षणं नरकादिगतिविवर्तननिमित्तत्वेनोपदिशन्नाह—

प्राणिहिंसार्पितं दर्पमर्पयत्तरसं तराम् ।
रसयित्वा नृशंसः स्वं विवर्तयति संसृतौ ॥ ८ ॥

टीका—विवर्तयति द्रव्यक्षेत्रकालभावैः परिवर्तयति । कोऽसौ, नृशंसः क्रूरकर्मकृत् । कं, स्वं आत्मानं । क, संसृतौ संसारे । किं कृत्वा, रसयित्वा आस्वाद्य । किं तत्, तरसं मांसं । किंविशिष्टं प्राणिहिंसार्पितं पञ्चेन्द्रियजीव

---

१ अभिमानभयजुगुप्सा हास्यारतिकामशोककोपाद्याः ।
हिंसायाः पर्यायाः सर्वेऽपि च नरकसंनिहिताः ॥
न विना प्राणिविघातान्मांसस्योत्पत्तिरिष्यते यस्मात् ।
मांसं भजतस्तस्मात् प्रसरत्यनिवारिता हिंसा ॥
ये भक्षयन्त्यन्यपलं स्वकीयपलपुष्टये ।
त एव घातका यन्न वधको भक्षकं विना ॥
मांसास्वादनलुब्धस्य देहिनो देहिनं प्रति ।
हन्तुं प्रवर्तते बुद्धिः शाकिन्य इव दुर्धियः

२ आमां वा पक्वां वा खादति वा स्पृशति वा पिशितपेशीम् ।
स निहन्ति सततनिचितं पिण्डं बहुजीवकोटीनाम् ॥
आमास्वपि पक्वास्वपि विपच्यमानासु मांसपेशीषु ।
सातत्येनोत्पादस्तज्जातीनां निगोतानाम् ॥

वधसम्पादितं । किं कुर्वन्, अर्पयन् सम्पादयन् । कं, दर्पं मदावेशं । कथं, तरां आतिशयेनेत्यव्ययमिदम् । मृष्टान्नादिभ्योऽतिशयेन प्राणिवधादुत्पन्नं तद्दर्पकरं चेत्यर्थः ॥ ८ ॥

इदानीं मक्षिकिस्यापि पलभक्षणस्य दोषं तद्विरतिनिष्ठायाश्च गुणमुदाहरणद्वारेण दर्शयति—

भ्रमति पिशिताशनाभि-ध्यानादपि सौरसेनवत्कुगतीः ।
तद्विरतिरतः सुगतिं श्रयति नरश्चण्डवत्खदिरवद्वा ॥ ९ ॥

टीका—भ्रमति परापरविवर्ते परिवर्तयति । कोऽसौ, जीवः । काः, कुगतीः नरकादिभवग्रहणानि । कस्मात् पिशिताशनाभिध्यानादपि मांसभक्षणसङ्कल्पात्, किं पुनस्तद्भक्षणादित्यपिशब्दार्थः । किंवत्, सौरसेनवत् सौरसेनराज्ञा तुल्यं । तथा श्रयति लभते । कोऽसौ, नरः । कां, सुगतिं स्वर्गादिगतिं । किंविशिष्टः सन्, तद्विरतिरतः पिशितनिवृत्तावासक्तः । किंवत्, चण्डवत् चण्डनामोज्जयिन्यां मातङ्गो यथा । अथवा खदिरवत् खदिरसारो नाम भिल्लराजो यथा ॥ ९ ॥

अधुना मांसं सतां भक्षणीयं प्राण्यङ्गत्वान्मुद्गादिवदित्यनुमानाभिधानमहाचक्षोन्मांसभक्षणदक्षिणान् प्रत्याह—

प्राण्यङ्गत्वे समेऽप्यन्नं भोज्यं मांसं न धार्मिकैः ।
भोग्या स्त्रीत्वाविशेषेऽपि जनैर्जायैव नाम्बिका ॥१०॥

टीका—भोज्यं भोक्तव्यं । किं तत्, अन्नं मुद्गादिधान्यं रसरक्तविकारजत्वाभावात् । न तु भोज्यं । किं तत्, मांसं रसरक्तविकारजत्वात् । कैः, धार्मिकैः धर्ममहिंसारूपं चरद्भिः । क्व सति, प्राण्यङ्गत्वे जीवकायत्वे । किंविशिष्टे,

---

१ पञ्चेन्द्रियस्य कस्यापि वधे तन्मांसभक्षणे ।
यथा हि नरकप्राप्तिर्न तथा धान्यभोजनात् ॥
धान्यपाके प्राणिवधः परमेकोऽवशिष्यते ।
गृहिणां देशयमिनां स तु नात्यन्तबाधकः ॥
मांसखादकगतिं विमृशन्तः शस्यभोजनरता इह सन्तः ।
प्राप्नुवन्ति सुरसम्पदमुच्चैर्जैनशासनजुषो गृहिणोऽपि ॥

समेऽपि अन्नमासयोस्तुल्येऽपि, न च प्राणिकायत्वाद्धान्यस्यापि मांसत्वमुपकल्प्य, यो य प्राणिकाय स स मांसमिति व्याप्तेरभावात् । अन्यथा वृक्षत्वादशोकादीनामपि निम्बत्वकल्पनाप्रसङ्गात् । यत भोग्या अनुभवनीया । काऽसौ, जायैव, न पुनरम्बिका माता भोग्या । कैर्जनै लोके । क सति, स्त्रीत्वाविशेषेऽपि भार्यामात्रो स्त्रीत्वे तुल्येऽपि ॥ १० ॥

अथ क्रमप्राप्तान्मधुदोषानाह—

मधुकृद्व्रातघातोत्थ मध्वशुच्यपि बिन्दुशः ।
खादन् बध्नात्यघ सप्त ग्रामदाहांहसोऽधिकम् ॥ ११ ॥

टीका—बध्नाति आत्मना योजयति । कोऽसौ, पुमान् । किं तत्, अघ पाप । कियत्, अधिक अतिरिक्त । कस्मात् सप्तग्रामदाहांहस ग्राममसकृद्दाहकपातकात् । किं कुर्वन्, खादन् भक्षयन् । कि तत् मधु क्षौद्र । किंभूतमपि बिन्दुश बिन्दुमात्रमपि । किंविशिष्ट मधुकृता मक्षिकाभ्रमरमशकादीना मधुकरप्राणिना व्रात सङ्घस्तस्य घातो नाशस्तस्मादुत्था उत्पत्तिर्यस्य तन्मधुकृद्व्रातघातोत्थ । पुन

१ मास जीवशरीर जीवशरीर भवेन वा मासम् ।
यद्वन्निम्बो वृक्षो वृक्षस्तु भवेन्न वा निम्ब ॥
शुद्ध दुग्ध न गोमांस वस्तुवैचित्र्यमीदृश ।
विषघ्न रत्नमाहेय विष च विपदे यत ॥
हेय पल पय पेय समे सत्यपि कारणे ।
विषद्रोरायुषे पत्र मूल तु मृतये मतम् ॥

२ ग्रामसप्तकविदाहिरेनसा तुल्यता न मधुभक्षिरेफस ।
तुल्यमब्धिलवलेन कुत्रचित्-निम्नगापतिजल न जायते ॥
मक्षिकादिघाति सारघ कुधी मैदिक गणविनाशनस्पृह ।
पापकर्दमनिषेधनिम्नगा यस्य हन्त करुणा कुतस्तना ॥
स्वयमेव विगलित यद् गृहीतमथवा बलेन निजगोलात् ।
तत्रापि भवति हिंसा तदाश्रयप्राणिना घातात् ॥

३ अनेकजन्तुसङ्घात निघातनसमुद्भवम् ।
जुगुप्सनीय लालावत्क स्वादयति माक्षिकम् ॥
माक्षिकागर्भसम्भूत बालाण्डकनिपीडनात् ।
जात मधु कथ सन्त सेवन्ते कललाकृति ॥
एकैककुसुमक्रोडाद्रसमापीय मक्षिका ।
यद्वमन्ति मधूच्छिष्ट तदश्नन्ति न धार्मिका ॥

किंविशिष्टं, मधु च प्राणिनिर्यासजन्यपापनिमित्तकाद्यागमवाक्यावधिकं श्लेष्म-मलादिमम्पृक्तत्वात् सुरूढं च ॥११॥

अथ नवनीतप्राशनस्य दोषभूयिष्ठतया त्याज्यतामुपदिशति—

मधुवन्नवनीतं च मुञ्चेत्तत्रापि भूरिशः ।
द्विमुहूर्तात्परं शश्वत्संसजन्त्यङ्गिराशयः ॥१२॥

टीका—मुञ्चेत् त्यजेत् । कोऽसौ, धार्मिकः । किं तत्, नवनीतं च दधि-सारमपि । किंवत्, मधुवत् क्षौद्रं यथा । यत्र संसजन्ति संमूर्च्छन्ति । के, अङ्गिराशयः जीवसंघाताः । कियन्तो, भूरिशः प्रचुराः । क, तत्रापि न केवलं मधुनि नवनीतेऽपि । कथं, शश्वत् सदा । कथं, परम्, ऊर्ध्वं । कस्मात्, द्विमुहूर्तात् मुहूर्तद्वयात् ॥ १२ ॥

अथ पञ्चोदुम्बरभक्षणे द्रव्यभावहिंसादोषमुपदर्शयति—

पिप्पलोदुम्बरप्लक्षवटफल्गुफलान्यदन् ।
हन्त्यार्द्राणि त्रसान् शुष्काण्यपि स्वं रागयोगतः ॥१३॥

टीका—हन्ति हिनस्ति । कोऽसौ, पुमान् । कान्, त्रसान् स्थूलसूक्ष्मप्राणि-कुलकुलान्यपीत्यर्थः । किं कुर्वन्, अदन् भक्षयन् । कानि, पिप्पलादिफलानि ।

फल्गुरत्र काकोदुम्बरिका। किंविशिष्टानि, आर्द्राणि, न केवलमार्द्राणि तान्यदन् स्थूलसूक्ष्मप्राणिनो हन्ति, किं तर्हि शुष्काण्यपि कालोच्छिन्नत्रसान्यपि। तान्यदन् स्वमात्मानं हन्ति। कस्मात् रागयोगात् प्रीतिसम्बन्धात्। अन्तर्दीपकत्वादिदं मध्वादिष्वपि योज्यम्। तत्रापि रागावतारद्वारेणात्मघातस्योक्तत्वात् ॥ १३ ॥

अथ निशाभोजनागालितजलोपयोगयोर्मद्याद्युपयोगवद्दोषमयत्वात्परिहारमाह—

रागजीववधापाय-भूयस्त्वात्तद्वदुत्सृजेत्।
रात्रिभक्तं तथा युञ्ज्यान्न पानीयमगालितम् ॥ १४ ॥

टीका–उत्सृजेद्वर्जयेद्धार्मिकः। किं तत्, रात्रिभक्तं रात्रावन्नप्रदानं। किंवत् तद्वत् मद्यपानादिवत्। कस्मात् रागेत्यादि, रागश्च जीववधश्च अपायाश्च जलोदरादयस्ते भूयांसो दिनभोजनादतिशयेन बहवो यत्र तद्रागजीववधापायभूयस्तस्य भावस्तत्त्वं तस्मात्। तथा न युञ्ज्यात् नोपयुञ्जीत। किं तत्,पानीयं जलं पेयत्वात्तैलघृतादि वा भवं द्रवद्रव्यं किंविशिष्टं, मगालितं वस्त्रादपरिसृतम्।

साम्प्रतमनस्तमितभोजिनः सफलं किञ्चिद्दृष्टान्तेन मुग्धजनप्ररोचनार्थं प्रकटयति—

चित्रकूटेऽत्र मातङ्गी यामानस्तमितव्रतात्।
स्वभर्त्रा मारिता जाता नागश्रीः सागराङ्गजा ॥ १५ ॥

टीका–जाता उत्पन्ना। काऽसौ मातङ्गी अन्तेवासिनी। किंविशिष्टा, सागराङ्गजा सागरदत्तश्रेष्ठिपुत्री। किंनाम्नी, नागश्री। क्व, चित्रकूटे। किंविशिष्टे ऽत्र एतस्मिन्नेव मालवदेशस्योत्तरस्यां दिशि प्रसिद्धे। कस्मात् यामानस्तमितव्रतात् याम प्रहरमात्र पालितादनस्तमितभोजननियमात्। किंविशिष्टा सती, मारिता। केन स्वभर्त्रा जागरिकनाम्ना ॥ १५ ॥

एवं कृतपरिकर्मणः पाक्षिकश्राद्धस्य स्थूलहिंसादिविरतिरपि यथाशक्ति भावनीयेत्युपदेशार्थमाह—

१ अर्कालोकेन विना भुञ्जानः परिहरेत् कथं हिंसाम्।
अपि बोधितप्रदीपो भोज्यजुषां सूक्ष्मजीवानाम् ॥

स्थूलहिंसानृतस्तेयमैथुनग्रन्थवर्जनम् ।
पापभीरुतयाऽभ्यस्येद्बलवीर्यनिगूहक ॥ १६ ॥

टीका—अभ्यसेद्भावयेत् । कोऽसौ, श्रावक । किं तत्, स्थूलेत्यादि, वक्ष्यमाणलक्षण स्थूलहिंसादिविरतिरूपमणुव्रतपञ्चक । कया, पापभीरुतया, न नृ राजादिभयेन, ततस्तदभ्यासे धर्मक्षपणाऽनिष्टे । किंविशिष्ट सन्, बलवीर्य निगूहक बलमाहारादिजा शक्ति सैव नैसर्गिक वीर्यं तयोर्निगूहकस्तदनुसारीत्यर्थ ॥ १६ ॥

एव हि स्थूलहिंसाविरतिमभ्यस्यता वेश्यादाविव द्यूतेऽप्यासक्तिर्न कर्तव्येत्युपदिशति—

द्यूते हिंसानृतस्तेयलोभमायामये सजन् ।
क्व स्वं क्षिपति नानर्थे वेश्याखेटान्यदारवत् ॥ १७ ॥

टीका—क्वानर्थे न क्षिपति, सर्वस्मिन्धर्मादिभ्रंशे व्यापारयतीत्यर्थ । क, स्वं आत्मान जाति च । किं कुर्वन्, सजन् गृद्धिं कुर्वन्, कौतुकमात्रेण द्यूतमीडनस्य पाक्षिकेण त्यक्तुमशक्यत्वादयमुच्यते । क सजन्, द्यूते । किंविशिष्टे, हिंसा प्राणातिपात , अनृतमसत्यवचन, स्तेय चौर्यं, लोभो गार्ध्यं, माया वञ्चना, ता प्रकृता प्राचुर्येण कृता अस्मिन्निति हिंसादिमये । किंवत्, वेश्यायामाखेटे परदारेषु च यथा । वेश्यादिष्वपि हिंसादिमयत्वादात्मजन स्वस्य ज्ञातीनां च पुरुषार्थभ्रंशस्य सुप्रसिद्धत्वात् ॥ १७ ॥

अथ प्रतिपाद्यानुरोधाद्धर्माचार्याणां सूत्राविरोधेन देशनानानात्वोपलम्भात्तन्मतेनाष्टमूलगुणानुद्देष्टुमाह—

---

१ सर्वानर्थप्रथन मथन शौचस्य सद्म मायाया ।
दूरात्परिहर्तव्यं चौर्यासत्यास्पद द्यूतम् ॥

२ कौशानं वमन कदम्बकजन शाम्या धन पांशुला
अस्थाभ्यालिगिर कुटुम्बकजनद्रोह सहाया द्विषा ।
व्यापारा परवञ्चनानि गुरुदर्थीश महान्तो द्विष
प्राय सैव दुरोदरव्यसनिन सगारविष्टक्रमः ॥

मद्यपलमधुनिशाशन-
पञ्चफलीविरतिपञ्चकाप्तनुती ।
जीवदया जलगालन-
मिति च कचिदष्टमूलगुणाः ॥ १८ ॥

टीका—वर्तन्ते । के मूलगुणा । कति, अष्टे । क, कचित शास्त्रे । कथ, मद्येत्यादि, पञ्चफली पञ्चाना फलाना समाहार पिप्पलादिफलपञ्चकमित्यर्थ, तद्विरतिरेक एवात्र मूलगुण, आप्तनुति त्रिकालदेववन्दना, मद्य च पल च मधु च निशाशन च पञ्चफली च ताभ्य पञ्चभ्यो विरतस्तासां पञ्चक, तथाप्तनुतिश्च ते द्वे, जीवदया अनुकम्पा, जलगालन चेति ॥ १८ ॥

मद्भतमुपसहरन् सार्वकालिकमभ्यत्ववशुद्धिपूर्वकमद्यादिविरतिकृता कृतोपनीतिनां ब्राह्मणक्षत्रियविशा जिनधर्मश्रुत्यधिकारितामाविष्कर्तुमाह—

यावज्जीवमिति त्यक्त्वा
महापापानि शुद्धधीः १
जिनधर्मश्रुतेर्योग्य
स्यात्कृतोपनयो द्विजः ॥ १९ ॥

टीका—स्याद्भवेत् । कोऽसौ, द्विज द्विर्जातो मातृगर्भे जिनसमयज्ञानगर्भे चोत्पादात् द्विजो ब्राह्मणक्षत्रियविशामन्यतम 'त्रयो वर्णा द्विजातय' इति वचनात् । किविशिष्ट, कृतोपनय कृता यथाविध्युपकल्पित उपनयो मौञ्जीबन्धादिलक्षणोपनीतिक्रिया यस्य स तथोक्त । किविशिष्ट स्यात् योग्योऽधिकारी । कस्या, जिनधर्मश्रुते वीतरागसर्वज्ञोपदिष्टस्य धर्मस्य श्रुति श्रवण शास्त्र वा उपासकाध्ययनादि तस्या । किं कृत्वा, शुद्धधी सम्यक्त्वविशुद्ध बुद्धि सन् । त्यक्त्वा । कानि, महापापानि महद्विपुलमनन्तससारकारण पाप येभ्यस्तानि मद्यपानादीनि प्राक्प्रबन्धेनात्तानि । कथ यावज्जीव जीवितावधि। कथ, इति अनेन प्रकारेण ॥ १९ ॥

१ अष्टावनिष्टदुस्तरदुरितायतनान्यमूनि परिवर्ज्य ।
जिनधर्मदेशनाया भवन्ति पात्राणि शुद्धधियः ॥

सहजामहार्यां चार्हीकिर्त्रीं गुणसम्पदमुद्वहतो भव्यान् यथासम्भवमगम-यन्नाह—

जाता जैनकुले पुरा जिनवृषाभ्यासानुभावाद्गुणै-
र्येऽयत्नोपनतैः स्फुरन्ति सुकृतामग्रेसराः केऽपि ते ।
येऽप्युत्पद्य कुदृक्कुले विधिवशाद्दीक्षोचिते स्वं गुणै-
र्विद्याशिल्पविमुक्तवृत्तिनि पुनन्त्यन्वीरते तेऽपि तान् ॥

टीका—सन्ति । के ते, केऽपि प्रविरलाः सम्प्रति बहूनामभावात् । किंवि-शिष्टा, अग्रेसरा सम्यक्त्वसहचारिपुण्योदयोन्मुख्या । केषां, सुकृतां कृतपु-ण्यानां । ये किं, ये स्फुरन्ति लोकचित्ते चमत्कारं कुर्वन्ति । कैः, गुणैः सम्यक्त्वा-दिभिः । किंविशिष्टैः,-यत्नोपनतैः प्रयत्नमन्तरेण प्राप्तैः सहजैरित्यर्थः । किंवि-शिष्टा सन्तो, जाता उत्पन्ना । क्व, जैनकुले जिनो देवता येषां ते जैना-स्तेषां कुलं पूर्वपुरुषपरम्पराप्रभवो वंशस्तत्र, जिनोक्तगर्भाधानादिनिर्वाण-पर्यन्तक्रियामंत्रसंस्कारयोग्ये महान्वय इत्यर्थः । कस्मात्, पुरा पूर्वजन्मनि जिनवृषस्य सर्वज्ञोक्तधर्मस्याभ्यासः अनकृत्प्रवृत्तिस्तस्यानुभावो माहात्म्य तज्जनितपुण्योदयस्तस्मात् । तथा अन्वीरतेऽनुगच्छन्ति । के, तेऽपि । कान्, तान् पूर्वोक्तान् जैनकुलजातान्, तत्सदृशा भवन्तीत्यर्थः । ये किं, ये पुनन्ति पवित्रीकुर्वन्ति । कं, स्वमात्मानं । कैः, गुणैः वक्ष्यमाणतत्त्वार्थप्रतिपत्त्यादिभिः । किं कृत्वा, उत्पद्य जनित्वा । क्व, कुदृक्कुलेऽपि मिथ्यादृष्टिवंशेऽपि । अपिरत्र विस्मये भिन्नक्रमः । किंविशिष्टे, दीक्षोचिते दीक्षा व्रताविष्करणं व्रतोन्मुखस्य वृत्तिरिति यावत्, सा श्रावकोपासकदीक्षा जिनमुद्रा वा उपनीत्यादिसंस्कारो वा । पुनः किंविशिष्टे, विद्याशिल्पविमुक्तवृत्तिनि विद्याऽध्यापनार्थं गीतादि-शास्त्रं, शिल्पं कारुकर्म, ताभ्यां विमुक्ता ताभ्योऽन्या वृत्तिर्यतो कृष्यादिलक्षणो जीवनोपायो यत्र तस्मिन् । कस्मात्, विधिवशात् मिथ्यात्वसहचारिपुण्यो-दययोगात् ॥ २० ॥

इदानीं द्विजातिषु कुलक्रमायातमिथ्याधर्मपरिहारेण विधिवज्जिनोक्तमार्गं साधिन्य स्वाध्यायध्यानबलादशुभकर्माणि निघ्नन्तं भव्यमभिष्टौति—

तत्त्वार्थं प्रतिपद्य तीर्थकथनादादाय देशव्रतं
तद्दीक्षाग्रधृतापराजितमहामन्त्रोऽस्तदुर्दैवतः ।
आङ्गं पूर्वमथार्थसंग्रहमधीत्याधीतशास्त्रान्तरः
पर्वान्ते प्रतिमासमाधिमुपयन्धन्यो निहन्त्यंहसी॥

टीका—निहन्ति नाशयति । कोऽसौ, धन्य सुकृती । के, अंहसी द्रव्यभावपापे इत्यर्थ । किं कुर्वन्, उपयन् अभ्यस्यन् । कं, प्रतिमासमाधिं रात्रिप्रतिमायोगं । क्व, पर्वान्ते पर्वणां मासि मासि द्वयोरष्टम्योर्द्वयोश्चतुर्दश्योरन्ते अवमाने रात्रावित्यर्थ । किंविशिष्ट सन्, अधीतशास्त्रान्तर अधीतानि विपठितानि शास्त्रान्तराणि सौगतादिग्रन्था व्याकरणादीनि च येनासौ । किं कृत्वा, अधीत्य पठित्वा । कम्, अर्थसङ्ग्रहं उदारग्रन्थमुपश्रुत्य, सूत्रमपि । किंविशिष्ट,-माङ्गं आचाराङ्गादिद्वादशाङ्गाश्रितं, न केवलमाङ्गं, पौर्वं च चतुर्दशपूर्वगतश्रुताश्रितम् । अथ शब्दोऽत्र चार्थे । किम्भूतो भूत्वा, अस्तदुर्दैवत त्यक्तमिथ्यादेवतागण । पुन किंविशिष्टो भूत्वा, तदित्यादि, तस्य देशव्रतस्य दीक्षा अग्रं पूर्वं यस्य तत्तद्दीक्षाग्रं उपासकदीक्षापूर्वक धृतो गुरुमुखाद्धारितोऽपराजितो नाम महान् गणधरदेवादीनां पूज्यो मन्त्र. पञ्चनमस्काराख्यो येन स तद्दीक्षाग्रधृतापराजितमहामन्त्र· । किं कृत्वा, आसाद्य लब्ध्वा । किं तत् देशव्रतं तद्दीक्षामूलगुणाष्टकादिकं । किं कृत्वा, प्रतिपद्य निश्चित्य । कं, तत्त्वार्थं जीवादिकं । कस्मात्, तीर्थकथनात् तीर्थस्य धर्माचार्यस्य गृहस्थाचार्यस्य वा कथनाद्वाक्यप्रबन्धात् । एता अष्टौ मिथ्यादृशो दीक्षान्वयक्रियाः क्रमेण संक्षेपादत्रोक्ता विस्तरतस्तु ज्ञानप्रदीपिकायामार्षे वा द्रष्टव्याः । अत्रार्षोक्तः श्लोको यथा—

अवतारो वृत्तलाभ. स्थानलाभो गणग्रह. ।
पूजाराध्यं पुण्ययज्ञो दृढचर्योपयोगिता ॥

---

१ गुरुर्जनयिता तत्व-ज्ञानं गर्भ सुसस्कृत· ।
तथा तत्रावतीर्णोऽसौ भव्यात्मा धर्मजन्मना ॥

२ ततोऽस्य वृत्तलाभः स्यात्तदव गुरुपादयो ।
प्रणतस्य व्रतव्रातं विधानेनोपसेदुषः ॥

३ ततः कृतोपवासस्य पूजाविधिपुरस्सरम् ।
स्थानलाभो भवेदस्य तत्रायमुचितो विधिः ॥
जिनालये शुचौ रंगे पद्ममष्टदलं लिखेत् ।
विलिखेद्वा जिनास्थान-मण्डलं समवृत्तकम् ॥
श्लक्ष्णेन पिष्टचूर्णेन सलिलालोडितेन वा ।
वर्तनं मण्डलस्येष्टं चन्दनादिद्रवेण वा ॥
तस्मिन्नष्टदले पद्मे जैने वाऽऽस्थानमण्डले ।
विधिना लिखिते तज्ज्ञै- र्विष्वग्विरचितार्चने ॥
जिनार्च्याभिमुखं सूरि-र्विधिनैनं निवेशयेत् ।
तवोपासकदीक्षेय-मिति मूर्ध्नि मुहुः स्पृशन् ॥
पञ्चमुष्टिविधानेन स्पृष्ट्वैनमधिमस्तकम् ।
पूतोऽसि दीक्षयेत्युक्त्वा सिद्धशेषं च लम्भयेत् ॥
ततः पञ्चनमस्कार-पदान्यस्मायुपादिशेत् ।
मन्त्रोऽयमखिलात्पापा-त्त्वां पुनीतादितीरयन् ॥
कृत्वा विधिमिमं पश्चात्पारणाय विसर्जयेत् ।
गुरोरनुग्रहात्सोऽपि सम्प्रीतः स्वं गृहं व्रजेत् ॥
४ इयन्तं कालमज्ञानात्पूजिताः स्थ कृतादरम् ।
पूज्यास्त्विदानीमस्माभि-रस्मत्समयदेवताः ॥
ततोऽपमृषितेनाल-मन्यत्र स्वैरमास्यताम् ।
इति प्रकाशमेवैता नीत्वान्यत्र क्वचित्त्यजेत् ॥
गणग्रहः स एषः स्यात्प्राक्तनं देवतागणम् ।
विसृज्यार्चयतः शान्ता देवताः समयोचिताः ॥
५ पूजाराध्याख्यया ख्याता क्रियाऽस्य स्यादतः परा ।
पूजोपवाससम्पत्त्या शृण्वतोऽङ्गार्थसंग्रहम् ॥
६ ततोऽन्या पुण्ययज्ञाख्या क्रिया पुण्यानुबन्धिनी ।
शृण्वतः पूर्वविद्याना-मर्थं सब्रह्मचारिणः ॥
७ तदास्य दृढचर्याख्या क्रिया स्वसमयश्रुतम् ।
निष्ठाप्य शृण्वतो ग्रन्थान्बाह्यानन्यांश्च कांश्चन ॥
८ दृढव्रतस्य तस्यान्या क्रिया स्यादुपयोगिता ।
पर्वोपवासपर्यन्ते प्रतिमायोगधारणम् ॥

अथ शूद्रस्याप्याहारादिशु द्धिमतो ब्राह्मणादिवद्धर्मक्रियाकारित्वं यथोचित-मनुमन्यमान आह—

> शूद्रोऽप्युपस्कराचारः—
> वपुःशुध्याऽस्तु तादृशः ।
> जात्या हीनोऽपि कालादि-
> लब्धौ ह्यात्माऽस्ति धर्मभाक् ॥२२॥

टीका—अस्तु भवतु । कोऽसौ, शूद्रोऽपि । किंविशिष्ट,-स्तादृशो जिनधर्मश्रुतेर्योग्य । किंविशिष्ट सन्, उपस्कर आसनाद्युपकरण, आचार मद्यादिविरति, वपु शरीर, तेषा त्रयाणा शुध्या पवित्रतया विशिष्ट । कुत इत्याह—जात्येत्यादि, हि यस्मादस्ति भवति । कोऽसौ, आत्मा जीव । किंविशिष्टा, धर्मभाक् श्रावकधर्माराधक । कस्या सत्या कालादि-लब्धौ कालादीना कालदेशादीनां लब्धौ धर्माराधनयोग्यतायां सत्या । किंविशिष्टोऽपि, हीनो रिक्तोऽल्पो वा किं पुनरुत्कृष्टो मध्यमो वेत्यपिशब्दार्थ । कया, जात्या वर्णसम्भूत्या । वर्णलक्षणमार्षे यथा—

> जातिगोत्रादिकर्माणि शुक्लध्यानस्य हेतवः ।
> येषु ते स्युस्त्रयोवर्णा शेषा शूद्रा प्रकीर्तिता ॥

इत्थमानृशस्यममृषाभाषित्व परस्वनिवृत्तिरिच्छानियमो निषिद्धासु च स्त्रीषु ब्रह्मचर्यमिति सर्वसाधारणधर्ममभिधायेदानीमध्ययन यजन दान ब्राह्मणक्षत्रियविशा समानो धर्मोऽध्यापनयाजनप्रतिग्रहाश्च ब्राह्मणानामेवेति विशापतस्तद्व्याख्यानार्थमुत्तरप्रबन्धमुपक्रममाणो यजन दिविधानाय पाक्षिक तावदेव नियुक्ते—

> यजेत देव सेवेत गुरून्पात्राणि तर्पयेत्
> कर्म धर्म्यं यशस्य च यथालोकं सदा चरेत् ॥ २३ ॥

टीका—यजेत् पूजयेत् । कोऽसौ, श्रावक । क, देव दीव्यते स्तूयते इन्द्रादिभिरिति देव परमात्मा त । तथा सेवेत उपासीत । कोऽसौ, श्रावक कान् गुरुन् धर्माचार्यादीन् । तथा तर्पयेत् प्रीणयेत् । कोऽसौ, श्रावक । कानि, पात्राणि सपूज्यमानमोक्षकारणगुणान् । तथा आचरेत् अनुतिष्ठेत् ।

कोऽसौ, श्रावक । किं तत्, कर्म मूल्वाऽऽश्रितानित्यादिना वक्ष्यमाणं । किंविशिष्टं, धर्म्यं दयाप्रधानत्वाद्धर्मादनपेतं, न केवलं धर्म्यं यशस्यं च धर्म्यं तावदवश्यमाचरणीयं तच्चेत्कीर्त्यर्थं स्यात्तदा सुतरां भद्रकमित्ययमर्थश्चशब्देनाचीयते । अनुक्तसमुच्चये चाऽत्र च तेनायुष्यं च कर्म ब्राह्ममुहूर्तोत्थानशरीरचिन्तादन्तधावनादिकमायुर्वेदप्रसिद्धमाचरेदिति लभ्यते । कथं, यथालोकं लोकस्यानतिक्रमेण लोकानुसारेणेत्यर्थः । यो वा आलोक आप्तोपदेशप्रकाशस्तेन तेन तत्तत्कर्माचरेदिति ग्राह्यम् । कथं, सदा नित्यम् ॥ २३ ॥

इतोऽष्टादशभिः पद्यैर्जिनपूजां प्रपञ्चयति—

यथाशक्ति यजेतार्हद्देवं नित्यमहादिभिः ।
सङ्कल्पतोऽपि तं यष्टा भेकवत्स्वर्महीयते ॥ २४ ॥

टीका—यजेत् । कोऽसौ, श्रावकः । कं, अर्हद्देवं । कथं, यथाशक्ति या या शक्तिस्तया । कैः,—नित्यमहादिभिः वक्ष्यमाणैः । यतो महीयते पूज्यो भवति । कोऽसौ, जीवः । किंविशिष्टो, यष्टा तच्छीलत्वेन साधुत्वेन वा यजमानः । कं, तं अर्हद्देवं । *कस्मात्सङ्कल्पतोऽपि यजेऽहमर्हद्देवमिति चिन्तनात्, किं पुनः* कायेन गन्धाक्षतादिभिर्वाचा च विचित्रस्तवनैरपचरन्नित्यपिशब्दार्थः । क्व महीयतेऽसौ, स्वः स्वर्गे महर्द्धिकदेवैः स्वामीति मत्वा पूज्यत इत्यर्थः । *किंवत्, भेकवत् राजगृहनगरे श्रेष्ठिचरो दर्दुरो यथा ॥ २४ ॥*

अथ नित्यमहमाह—

प्रोक्तो नित्यमहोऽन्वहं निजगृहान्नीतेन गन्धादिना
पूजा चैत्यगृहेऽर्हतः स्वविभवैश्चैत्यादिनिर्मापणम् ।

---

१ दानं पूजा जिनैः शीलमुपवासश्चतुर्विधः ।
श्रावकाणां मतो धर्मः संसारारण्यपावकः ॥
आराध्यन्ते जिनेन्द्रा गुरुषु च विनतिर्धार्मिकैः प्रीतिरुच्चैः
पात्रेभ्यो दानमापन्निहतजनकृते तच्च कारुण्यबुद्ध्या ।
तत्त्वाभ्यासः स्वकीयव्रतरतिरमलं दर्शनं यत्र पूज्यं
तद्गार्हस्थ्यं बुधानामितरदिह पुनर्दुःखदो मोहपाशः ॥

भक्त्या ग्रामगृहादिशासनविधादानं त्रिसन्ध्याश्रया
सेवा स्वेऽपि गृहेऽर्चनं च यमिनां नित्यप्रदानानुगम् ॥

टीका—प्रोक्त प्रवचने कथित । कोऽसौ, नित्यमह । किं, पूजा । कस्य, अर्हत । क, चैत्यगृहे । केन, गन्धादिना चन्दनाक्षतपुष्पादिना । किंविशिष्टेन, नीतेन चैत्यालय प्रापितेन । कस्मा,-स्विजगृहात् । कथ,-मन्वह दिने दिने । तथा प्रोक्तो नित्यमह । कि तत्, चैत्यादिनिर्मापण चैत्यचैत्यालयादिनिष्पादन । कस्मात्, स्वविभवात् निजधनविनियोगात् । तथा प्रोक्तो नित्यमह । किं तत्, ग्रामगृहादिशासनविधादान ग्राम सवसथ, गृह वेश्म आदिशब्दात्क्षेत्रहट्टादिपरिग्रह, ग्रामगृहादे शासनविधया शासनविधानेन दान । कया, भक्त्या । तथा प्रोक्ता नित्यमह । कि, सेवा आराधना । कस्य, अर्हत । किंविशिष्टा, त्रिसन्ध्याश्रया त्रैकालिकी । क, गृहे । किंविशिष्टे, स्वे निजे, अपिशब्दाच्चैत्यगृहे च । न केवलमर्हत्पूजादिक नित्यमह प्रोक्त, अर्चन च पूजा । केषा, यमिना सयतानां । किंविशिष्ट, नित्यप्रदानानुग अहरह प्रकृष्टदानसम्बन्धि ॥ २५ ॥

अथाष्टाह्निकैन्द्रध्वजौ लक्षयति—

जिनार्चा क्रियते भव्यैर्या नन्दीश्वरपर्वणि ।
अष्टाह्निकोऽसौ सेन्द्राद्यैः साध्या त्वैन्द्रध्वजो मह ॥२६॥

टीका—प्रोक्त सूरिभि । कोऽसा,-वसौ मह । किमाख्य, आष्टाह्निक । या कि, या क्रियते । का,-सौ जिनार्चा अर्हत्पूजा । कै –र्भव्यैर्भायुकलोकै सम्भूयकरणज्ञापनार्थ बहुवचन । क, नन्दीश्वरपर्वणि प्रतिवर्षमापाढकार्तिकफाल्गुनसितपक्षेष्वष्टम्यादिदिनाष्टके । तथा प्रोक्त । कोऽसौ, इन्द्रध्वजाख्यो मह । काऽसौ, सा जिनार्चा । किंविशिष्टा, साध्या क्रियमाणा । कै –रिंद्राद्यै इन्द्रप्रतीन्द्रसामानिकादिभि । तुर्विशेषे ॥ २६ ॥

अथ महामह निदिशति—

भक्त्या मकुटबद्धैर्या जिनपूजा विधीयते ।
तदाख्या सर्वतोभद्र-चतुर्मुखमहामहा. ॥ २७ ॥

टीका-भवन्ति । का,-तदाख्या तस्या जिनपूजाया आख्या नामानि । किं किं, सर्वतोभद्र इति, चतुर्मुख इति, महामह इति च तिस्रोऽन्वर्थाः तत्र सर्वेषु प्राणिवृन्दे कल्याणकरणात्सर्वतोभद्र, चतुर्मुखमण्डपे विधीयमानत्वाच्चतुर्मुख, अष्टान्हिकापेक्षया गुरुत्वान्महामह । या किं, जिनपूजा विधीयते । कैः,-मैं कुटबद्धैर्मकुटानि बद्धानि सामान्तादिभिर्येषां ते मकुटबद्धा मण्डलेश्वराः तै । कया, भक्त्या, न तु चक्रवर्त्यादिभयादिना । एषोपि कल्पवृक्षवत् केवलमत्र प्रतिनियतजनपदविषय दानादिकम् ॥ २७ ॥

अथ कल्पवृक्षमहमाह--

किमिच्छकेन दानेन जगदाशा प्रपूर्य यः ।

चक्रिभिः क्रियते सोऽर्ह-द्यज्ञः कल्पद्रुमो मतः ॥ २८ ॥

टीका--मत पूर्वाचार्यैः सम्मत । कोऽसौ सोऽर्हद्यज्ञ । किमाख्य, कल्पद्रुम कल्पवृक्षनामा । य किं, य क्रियते । कैः,-चक्रिभि सम्राड्भि । किं कृत्वा,प्रपूर्य प्रकर्षेण पूरयित्वा । का,जगदाशा लोकाना मनोरथान् । केन, दानेन त्यागेन । किंविशिष्टेन, किमिच्छकेन किमिच्छसीति प्रश्नपूर्वक याचकेच्छानुरूप क्रियमाणेन ॥ २८ ॥

सम्प्रति बलिस्नपनादिजिनपूजाविशेषाणा नित्यमहादिष्वेवान्तर्भावमाह—

बलिस्नपननाट्यादि नित्य नैमित्तिकं च यत् ।

भक्ता कुर्वन्ति तेष्वेव तद्यथास्वं विकल्पयेत् ॥ २९ ॥

टीका—विकल्पयेत् नित्यमहादीनामेव भेदमाचक्षीत विद्वान् । किं, तत् सत् । केषु, तेष्वेव नित्यमहादिषु । कथ, यथास्व यथायोग्य । यत्कि, यत्कुर्वन्ति निर्वर्तयन्ति । के ते, भक्ता भक्तिमन्त । किं तत्, बलिस्नपननाट्यादि, बलिरुपहार, स्नपनमभिषेक , नाट्य गीतनृत्यवाद्य आदिशब्दात्प्रतिष्ठारथयात्रादि । किंविशिष्ट, नित्य प्रत्यहविधेय । तथा नैमित्तिक पर्वकर्तव्यम् ॥ २९ ॥

इदानीं जलादिपूजाना प्रत्येक फलमाल्पति—

वार्धारा रजस शमाय पदयो सम्यक्प्रयुक्ताऽर्हत

सद्गन्धस्तनुसौरभाय विभवाच्छेदाय सन्त्यक्षता ।

यष्टु स्रग्दिविजस्रजे चरुरुमास्वाम्याय दीपस्त्विषे
धूपो विश्वदृगुत्सवाय फलमिष्टार्थाय चार्घाय सः॥३०॥

टीका—भवति । कोऽसौ, वार्धारा वारो जलस्य धारावलि । कस्मै, शमाय अनुद्रेकाय । कस्य, रजस. पापस्य ज्ञानदर्शनावरणकर्मणोर्वा । कस्य, यष्टुरामन पूजयितु । किविशिष्टा सती, प्रयुक्ता सम्पादिता । कयो , पदयोश्चरणयो । कस्य, अर्हतो जिनेन्द्रस्य । कथ, सम्यक् यथोक्त विधानेन । तथा भवति । कोऽसौ, सद्गन्ध श्रीचन्दनद्रव । कस्मै, तनुसौरभाय शरीरसौगन्ध्यनिमित्तम् । कस्य, यष्टु । किंविशिष्ट सन्, अर्हत पदयो सम्यक् प्रयुक्त । तथा सन्ति भवन्ति । के, अक्षता अखण्डतण्डुला । कस्मै, विभवाच्छेदाय विभवस्याणिमादिविभूतेर्द्रविणस्य वाऽच्छेदो निरन्त रप्रवृत्तिस्तदर्थं । शेष पूर्ववत् । तथा भवति । का,—सौ स्रक् पुष्पमाला । कस्मै, दिविजस्रजे स्वर्गेजन्ममन्दारमालार्थं । तथा भवति । कोऽसौ, चरु नैवेद्य । कस्मै, उमास्वाम्याय लक्ष्मीपतित्वार्थं । तथा भवति । कोऽसौ, दीप आरात्रिक । कस्मै, त्विषे दीप्त्यर्थं । तथा भवति । कोऽसौ धूप । किविशिष्ट , अर्हत पदयो सम्यक्प्रयुक्त । कस्मै, विश्वदृगुत्सवाय यष्टु परमसौभाग्यार्थं । तथा भवति । कि तत्, फल बीजपूरादि । कस्मै, इष्टार्थायाभिमतवस्तुप्राप्त्यर्थं । तथा भवति । कोऽसौ, स तत्वार्घ पुष्पाञ्जलिरित्यर्थ । कस्मै भव,—र्घार्थाय पूजाविशेषार्थं । अथवा स इत्यनेन पूर्वोक्त इष्टार्थ एव परामृश्यते तेनायमर्थं कथ्यते । यद्यष्टुरामनोऽभिमत वस्तु गीतादिक तेन जिने सम्यक्प्रयुक्ते तत्तद्विशिष्टगीतादिवस्तुनोऽर्घाय मूल्याय स्यात्तत्सम्पादयतीत्यर्थ ॥ ३० ॥

अथ जिनेज्याया सम्यक्प्रयोगविष्युपदेशपुरस्सर लोकोत्तर फलविशेष माविष्करोति—

चैत्यादौ न्यस्य शुद्धे निरुपरमनिरौपम्यतत्तद्गुणौघ-
श्रद्धानात्सोऽयमर्हन्निति जिनमनघैस्तद्विधोपाधिसिद्धैः ।
नीराद्यैश्चारुकाव्यस्फुरदनणुगुणग्रामरज्यन्मनोभि-
र्भव्योऽर्चन् दृग्विशुद्धिं प्रबलयतु यया कल्पते तत्पदाय॥३१॥

टीका—प्रबलयतु प्रबला प्रकृष्टस्वफलदानसमर्थां करोतु । कोऽसौ, भव्यो भात्तिक । कां, दृग्विशुद्धिं शङ्कादिदोषरहिततत्त्वश्रद्धान । किं कुर्वं, अर्चन् पूजयन् । क, जिन । कै, नीराद्यै जलगन्धाक्षतादिभि । किंविशिष्टै,-रनघै इहहतरवाहृद्य वस्त्वान्यभुक्तशेषत्वादिपापहेतुदोषमुक्तै । पुन किंविशिष्टै, तद्विधेपाधिसिद्धै निष्पापसाधननिष्पन्नै । पुनरपि किंविशिष्टै, चार्विरयादि–चारूणि दोपनिरासाद्गुणालङ्कारस्वीकाराच्च सहृदयहृदयावर्जकानि, काव्यानि लोकोत्तरवर्णनारमणीयगद्यपद्यवाङ्मयानि, अनणुगुणग्रामा अनणूना महता गुरूणा गुणाना निसर्गनिर्मलवर्णरस्यातिशयादीनां ग्रामा सङ्घाता, चारु काव्यं स्फुरन्तो भावुकलोकचित्तेषु चमत्कुर्वन्तोऽनणुगुणग्रामास्तै रज्यन्ति प्रियमाणानि मनांसि येषु तानि तै । किं कृत्वा अर्चन्, न्यस्य सोऽयमर्हन्निति उत्सर्पणावसर्पणतृतीयचतुर्थकालयोर्येश्चतुस्त्रिंशदतिशयसमेत समवसृ तावष्टमहाप्रातिहार्यविराजितस्तत्त्वोपदेशेन भव्यलोक पुनीतवान् सोऽर्हन्नेवायमिति नामस्थापनाद्द्रव्यभावं स्थापयित्वा । क, जिन । क, चैत्यादौ चैत्ये प्रतिमाया, आदिशब्देन तदलाभे जिनाकाररहितेऽप्यक्षतादौ । किंविशिष्टे, शुद्धे निर्दोषे रद्वाकाररहिते इत्यर्थ । कस्मा, श्रिरित्यादि निरुपमा अविन श्वरा निरोपम्या असाधारणास्तत्तद्गुणा व्यवहारेण दर्शनविशुद्ध्यादिभावना प्रसुतकल्याणपञ्चकलक्षणा निश्चयेन चिदचिद्‌द्वयद्रव्याकारविशेषस्वरूपास्ते षामोघे समूहे श्रद्धान रुचिरतरोऽनुरागस्तस्मात् । इत्थ ता दृग्विशुद्धिं प्रबलयतु भव्यो यया दृग्विशुद्ध्या प्रबलीकृतया कल्पते समर्थ्यते भव्यः । कस्मै, तत्पदाय तीर्थकरत्वाय । एकस्या अपि दृग्विशुद्धेस्तत्कर्तस्य तीर्थकरत्वाख्यपुण्यविशेषबन्धहेतुत्वप्रसिद्धेः ॥ ३१ ॥

अधुना व्रतभूषितस्य जिनपदुरिष्टफलविशेषमभिधत्ते—

दृक्पूतमपि यष्टार मर्हतोऽभ्युदयश्रियः ।
श्रयन्त्यहम्पूर्विकया किं पुनर्व्रतभूषितम् ॥ ३२ ॥

टीका—श्रयन्ति आश्रयन्ति । का, अभ्युदयश्रिय पूजार्थाज्ञैश्वर्यविशिष्टबलपरिजनकामभोगसम्पद । क, यष्टार पूजक । कस्य, अर्हत । किंविशिष्ट, दृक्पूतमपि सम्यक्त्वविशुद्ध । अपिविस्मये । कया, अहम्पूर्विकया अह पूर्वमह पूर्वमित्यहम्पूर्विका तया अहमहमिकया । किंपुन,–र्विशेषत्र श्रयन्ति ।

का, अभ्युदयप्रिय । क अर्हतो यष्टार । किंविशिष्ट, मतैर्देशतो हिंसादिविर तिलक्षणैर्भूषितमलंकृतम् ॥ ३२ ॥

जिनपूजान्तरायपरिहारोपायविधिमाह—

यथास्वं दानमानाद्यैः सुखीकृत्य विधर्मणः ।
सधर्मण स्वसात्कृत्य सिध्यर्थी यजतां जिनम् ॥ ३३ ॥

टीका—यजतां पूजयतु । कोऽसौ, सिध्यर्थी जिनपूजासम्पूर्णता स्वात्मोपलब्धि वा अभीप्सु । क, जिन । किं कृत्वा, स्वसात्कृत्य स्वाधीनान् कृत्वा । कान्, सधर्मण जिनधर्मभावितान् । किं कृत्वा, सुखीकृत्य अनुकूलान् कृत्वा । कान्, विधर्मण शिवादिधर्मरतान् सर्वधर्मबाह्यान् वा । कै यथास्व यथायोग्य । दानमानाद्यै अर्थविनियोगसत्काराभ्युत्थानासनप्रदानादिभिरावर्जनोपायै ॥ ३३ ॥

स्नानापास्तदोषस्यैव गृहस्थस्य स्वयं जिनयजनेऽधिकारित्वमन्यस्य पुनस्न्नाविधेर्नैवान्येन तद्याजन इत्युपदेशार्थमाह—

स्न्यारम्भसेवासंक्लिष्ट स्नात्वाऽऽकण्ठमथाशिर ।
स्वयं यजेतार्हत्पादा नस्नातोऽन्येन याजयेत् ॥ ३४ ॥

टीका—यजेत् पूजयेत् । कोऽसौ, भाक्तिको गृही । कानऽ, र्हत्पादान् जिनचरणान् । केन, स्वयमात्मना । किं कृत्वा स्नात्वा शौच कृत्वा । कथ,-साकण्ठ

१ नित्य स्नान गृहस्थस्य देवार्चनपरिग्रहे ।
यतेस्तु दुर्जनस्पर्शात्स्नानमन्यद्विगर्हितम् ॥
वातातपादिसस्पृष्टे भूरितोये जलाशये ।
अवगाह्याचरेत्स्नान-मतोऽन्यद्गालित भजेत् ॥
पादजानुकटिग्रीवा शिर पर्यन्तसश्रयम् ।
स्नान पञ्चविध ज्ञेय यथादोष शरीरिणाम् ॥
ब्रह्मचर्योपपन्नस्य निवृत्तारम्भकर्मण ।
यद्वा तद्वा भवेत्स्नान-मन्त्यमन्यस्य तु द्वयम् ॥
सर्वारम्भविजृम्भस्य ब्रह्मजिह्मस्य देहिन ।
अविधाय बहि शुद्धिं नाप्तोपास्त्यधिकारिता ॥

कण्ठावधि । अथ अथवा । आशिर मस्तकावधि, यथादोष अल्पेन शुचीभूय स्नात्वा । किंविशिष्ट सन्, स्यादीति, धर्मसेवया कृष्यादिकर्मसेवया च संक्लिष्ट समन्तात्क्लाये मनसि चोपतप्त, प्रस्वेदतन्द्रालस्यदौर्मनस्यादिदोषदूषितकायमनस्क इत्यर्थः । सोऽस्नातः किं कुर्यादित्याह–याजयेत्पूजया संयोजयेत् । कोऽसौ, अस्नातस्तथाविधो गृही । कान्, अर्हत्पादान् । केन, कर्त्रा अन्येन स्नातेन समक्षचारिमतीर्थ्यंसधर्मकादिना ॥ ३४ ॥

चैत्यादिनिर्माणस्य फलविशेषसमर्थनया विधेयतामभिधत्ते–

निर्माप्यं जिनचैत्यतद्गृहमठस्वाध्यायशालादिकं
श्रद्धाशक्त्यनुरूपमस्ति महते धर्मानुबन्धाय यत् ।
हिंसारम्भविवर्तिनां हि गृहिणां तत्तादृगालम्बन-
मागल्भीलसदाभिमानिकरसं स्यात्पुण्यचिन्मानसम् ॥

टीका–निर्माप्यं कारापणीयं । किं तत्, तज्जिनचैत्यादि । कै, पाक्षिकश्रावकैः । किंविशिष्टं, श्रद्धाशक्त्यनुरूपं रुच्या सामर्थ्येन च सदृशं । यत्किं, यदस्ति भवति । कस्मै, धर्मानुबन्धाय धर्मस्यानुबन्धोऽलब्धलाभो लब्धपरिरक्षणं रक्षितवर्धनमित्येवमात्मकस्तस्मै । किंविशिष्टाय, महते विपुलाय । एतेन चैत्यालयादिनिर्मापणे सावद्यदोषशङ्कानिरस्ता । यदाह तत्पापमपि न पापं यत्र महान् धर्मसम्बन्ध इति । हि यस्मात् । स्यात् भवेत् । किं तत्, मानसं मनः । किंविशिष्टं, पुण्यचित् पुण्यं सुकृतं चिनोति वर्धयति, अथवा पुण्या पवित्रा निर्मला चित् संवित्तिर्यस्य तत्पुण्यचित् । केषां, गृहिणां गृहस्थानां

आप्लुतः सम्प्लुतस्वान्तः शुचिवासोविभूषितः ।
मौनसंयमसम्पन्नः कुर्याद्देवार्चनाविधिम् ॥
दन्तधावनशुद्धास्यो मुखवासोचिताननः ।
असञ्जातान्यसंसर्गः सुधीर्देवानुपाचरेत् ।

१ यद्यप्यारम्भतो हिंसा हिंसायाः पापसम्भवः ।
तथाऽप्यत्र कृतारम्भो महत्पुण्यं समश्नुते ॥
निरालम्बनधर्मस्य स्थितिर्यस्मात्ततः सताम् ।
मुक्तिप्रासादसोपान-माप्तैरुक्तो जिनालयः ॥

किंविशिष्टानां, हिसारम्भविवर्तिनां हिसाप्राय आरंभः कृष्यादि तत्र विवर्तन्ते विविधं परिणमन्तेऽभीक्ष्णमिति तद्विवर्तिनस्तेषां। किंविशिष्टं तत्, तदित्यादि, तज्जिनचैत्यचैत्यालयादि तादृत्तीर्थयात्रादि, आलम्बनं दृग्विशुद्ध्यङ्गं, प्रागल्भी प्रौढि, आभिमानिकरसः अहङ्कारानुरक्तो हर्ष, तच्च तादृक्च तत्तादृक् तच्च तदालम्बनं च तस्य प्रागल्भी तया लसत् द्योतमान स्वसंवित्तिविषयीभवन् आभिमानिकरसो यस्मिन् तत् तथोक्तम् ॥ ३५ ॥

शास्त्रविदामपि प्रायः प्रतिमादर्शनेनैव देवादिसेवापरां मतिं कुर्वाणं कलिकालमपवदते—

> धिग्दुष्षमाकालरात्रिं यत्र शास्त्रदृशामपि।
> चैत्यालोकादृते न स्यात् प्रायो देवविशा मतिः ॥३६॥

टीका—धिक् निन्दामीत्यर्थ। कां, दु षमाकालरात्रिं दु षमा पञ्चमकाल कालरात्रिर्मरणनिशेव दुर्निवारमोहावहत्वात्। यत्र किं, यस्यां न स्यात्। काऽसौ, मतिरन्त करणप्रवृत्तिः। किंविशिष्टा, देवविशा देवं परमात्मानं विशत्यनन्यशरणीभूय श्रयतीति क्विबन्तादजाद्यतष्टाप्। केषां, शास्त्रदृशामपि श्रुतचक्षुषामपि। कथं, ऋते विना। कस्मात्, चैत्यालोकात् प्रतिमादर्शनात्। कथं, प्रायो बाहुल्येन। केषाञ्चित् ज्ञानवैराग्यपराणां चैत्यदर्शनमन्तरेणापि मन परमात्मानं संश्रयतीति भाव ॥ ३६ ॥

कलौ धर्मस्थितिः सम्यक्चैत्यालयमूलैवेत्यनुशास्ति—

> प्रतिष्ठायात्रादिव्यतिकरशुभस्वैरचरण-
> स्फुरद्धर्मोद्धर्षप्रसररसपूरास्तरजसः।
> कथं स्युः सागाराः श्रमणगणधर्माश्रमपदं
> न यत्रार्हद्गेहं दलितकलिलीलाविलसितम् ॥ ३७ ॥

टीका—तत्र नगरादौ कथं स्यु, कथमपि न भवेयुरित्यर्थ। के ते, सागारा गृहस्था। किंविशिष्टा, प्रतिष्ठेत्यादि, आदिशब्दात् पूजाभिषेकजागरणाद्यर्थ। व्यतिकरः प्रघट्टक, स्वैरं स्वच्छन्दं, उद्धर्ष उत्सव, प्रसरश्चिरावस्थायित्वं, रस हर्षो जलं वा, रज पापं रेणुश्च, प्रतिष्ठायात्रादीनां व्यतिकरे शुभं प्रशस्तं

पुण्यास्रवणकारणं स्वैरं चरणं मनोवाक्कायव्यापारस्तेन स्फुरंश्चासौ धर्मोद्धर्षस्तस्य प्रसरः स एव रसपूरो जलप्रवाहस्तेनास्तं स्फाटितं रजो येषां ते तथा। कथं स्युस्तत्र। यत्र किं, यत्र न भवति। किं तत्, अर्हद्गेहं जिनचैत्यालयः। किंविशिष्टं, दलितं छिन्नं खण्डितं कलिलीलाविलसितं मठपत्यादिदुर्णयो निरंकुशविजृम्भमाणसंक्लेशपरिणामो वा यत्र तद्दलितकलिलीलाविलसितं। पुनः किंविशिष्टं, श्रमणगणधर्माश्रमपदं श्रमणस्य यतिसङ्घस्य धर्मार्थमाश्रमपदं निवासस्थानम् ॥ ३७ ॥

कलौ वसतिविशेषं विना सतामप्यनवस्थितचित्तत्वं दर्शयति—

मनो मठकठेराणां वात्ययेवानवस्थया।
चेक्षिप्यमाणं नाद्यत्वे क्रमते धर्मकर्मसु ॥ ३८ ॥

टीका—न क्रमते नोत्सहते। किं तत्,—मनः। केषां, मठकठेराणां वसतिदरिद्राणामरण्यादिवासिनां यतीनामित्यर्थः। क्व, धर्मकर्मसु धर्मार्थासु क्रियासु आवश्यकादिषु। कदा, अद्यत्वे अस्मिन् काले। क्रियमाणं, चेक्षिप्यमाणं भृशं पुनःपुनर्वा चाल्यमानं। कया, अनवस्थया परापररागादिविवर्तनपरिणत्या। कयेव, वात्ययेव वातमण्डल्या शुष्कपर्णादिर्यथा ॥ ३८ ॥

विमर्शस्थानं विना महोपाध्यायादीनामपि शास्त्रान्तस्तत्त्वज्ञानदौःस्थित्यं प्रथयति—

विनेयवद्विनेतॄणामपि स्वाध्यायशालया।
विना विमर्शशून्या धीर्दृष्टेऽप्यन्धायतेऽध्वनि ॥ ३९ ॥

टीका—अन्धायते अन्धमिवात्मानमाचरति तत्त्वं न पश्यतीत्यर्थः। काऽसौ, धीर्बुद्धिः। केषां, विनेतॄणामपि। केषामिव, विनेयवत् उपाध्यायानाम् शिष्याणां यथा। क्व, अध्वनि मार्गे अर्थाद्बुद्ध्वेति श्रेयसि वा। किंविशिष्टेऽपि, दृष्टेऽपि। अभ्यस्तेऽपि। किंविशिष्टा सती, विमर्शशून्या अन्तस्तत्त्वक्षोदविधुरा। कथं, विना। कया, स्वाध्यायशालया पाठस्थानेन। ततश्चैत्यालयवद्धर्मार्थं नियमेन कारयेदिति प्रतिपत्तव्यम् ॥ ३९ ॥

सद्यानुरोपचारस्यतयोरनुकम्पनत्यनुमहकृत्या विधापनं बह्वारम्भरतानां गृहस्थानां जिनपूजार्थं पुष्पवाटिकादिनिर्मापणे दोषाभावं च प्रकाशयन्नाह—

सत्रमप्यनुकम्प्यानां सृजेदनुजिघृक्षया ।
चिकित्साशालवद्दुष्ये-न्नेज्यायै वाटिकाद्यपि ॥ ४० ॥

टीका—सृजेन्निर्मापयेत्पाक्षिक. । किं तत्, सत्रमन्नप्रदानस्थानं आपिशब्दात्प्रपां च । किंवत्, चिकित्साशालवत् व्याधिप्रतीकारस्थानं यथा । कया, अनुजिघृक्षया उपकर्तुमिच्छया । केषां,-मनुकम्प्यानां कृपाविषयानां क्षुत्तृष्णार्तानां व्याधितानां च । तथा न दुष्येत्त दुष्टं भवेत् । किं तत्, वाटिकादि आदिशब्दाद्वार्पापुष्करिण्यादि । किमर्थं,-मिज्यायै पूजार्थं । अपिशब्देनानादरार्थेन विषयसुखार्थं कृष्यादिकं कुर्वतो यद्यपि धर्मबुध्या वाटिकादिविधाने लोके व्यवहारानुरोधाद्दोषो न भवति, तथापि तदकुर्वतामेव क्रयक्रीतेन पुष्पादिना तेषामपि जिन पूजयतो महान् गुणो भवतीति ज्ञाप्यते ॥ ४० ॥

निर्व्याजभक्त्या येन केनापि प्रकारेण जिनं सेवमानानां समस्तदुखोच्छेद मितस्तत समस्तमीहितार्थसम्पत्ति चोपदिशति—

यथाकथञ्चिद्भजतां जिन निर्व्याजचेतसाम् ।
नश्यन्ति सर्वदुःखानि दिशः कामान्दुहन्ति च ॥ ४१ ॥

टीका—नश्यन्ति निवर्तन्ते । कानि, सर्वदु खानि शरीरमनस्तापा· । केषां निर्व्याजचेतसां निर्मायमनसां भाक्तिकानामित्यर्थ । किं कुर्वतां, भजतां सेवमानानां । कं, जिनं । यथाकथञ्चित् येनकेनापि स्नपनपूजास्तवनादिप्रकारेण । तथा दुहन्ति प्रपूरयन्ति । का, दिश ककुभ· । कान्, कामान् मनोरथान् । यद्यत्कामयन्ते जिनयष्टारस्तत्सर्वत्र लभन्ते इत्यर्थः ॥ ४१ ॥

एवं जिनपूजां विधेयतयोपदिश्य तद्वत्सिध्दादिपूजामपि विधेयतयोपदेष्टुमाह—

जिनानिव यजन्सिध्दान्साधून्धर्मं च नन्दति ।
तेऽपि लोकोत्तमास्तद्वच्छरणं मङ्गलं च यत् ॥ ४२ ॥

टीका—नन्दति अन्तरङ्गबहिरङ्गविभूत्या संवर्धते । कोऽसौ, जीव । किं कुर्वन्, यजन् पूजयन् । कान्, सिद्धान् मुक्तात्मन·, । तथा साधून् सिद्धिसाधयन्तीत्यन्वर्थनामानुसरणादाचार्योपाध्याययतीन्, न केवलं तान्, धर्मं च व्यव-

हारनिश्चयरूप रत्नत्रय । कानिव, जिनानिव अर्हतो यथा । कुत इत्याह्—यस्मात् । वर्तन्ते । के ते, अपि सिद्धसाधुधर्मा । किंविशिष्टा, लोकोत्तमा लोकेषूत्कृष्टा, तथा शरणमार्तिहरणमपायपरिरक्षणोपाया इत्यर्थ । तथा मङ्गल पापापहा पुण्यप्रदाश्च । किंवत्, तद्वत् जिनवत् ॥ ४२ ॥

सकलपूज्यपूजाविधिप्रकाशनेनानुग्राहिकाया सम्यक्श्रुतदेवताया पूजायां सम्बयमाह—

यत्प्रसादान्न जातु स्यात् पूज्यपूजाव्यतिक्रमः ।
तां पूजयेज्जगत्पूज्यां स्यात्कारोड्डमरां गिरम् ॥ ४३ ॥

टीका—पूजयच्छ्रेयोऽर्थी यजेत । का, तां गिर श्रुतदेवतां । किंविशिष्टां, स्यात्कारोड्डमरा स्यात्पदप्रयोगेण सर्वथैकान्तवादिभिरजय्या । पुन किंविशिष्टां, जगत्पूज्यां विश्वलोकानामर्च्यां । यत्प्रसादात् यस्या अनुग्रहात् न स्यात् न भवेत् । कोऽसौ, पूज्यपूजाव्यतिक्रम पूज्यानां अर्हत्सिद्धसाधुधर्माणां पूजायां व्यतिक्रमो यथोक्तविधिलङ्घन । कथ, जातु कदाचिदपि ॥ ४३ ॥

श्रुतपूजका परमार्थतो जिनपूजका एवेत्युपदिशति—

ये यजन्ते श्रुतं भक्त्या ते यजन्तेऽञ्जसा जिनम् ।
न किञ्चिदन्तरं प्राहुराप्ता हि श्रुतदेवयोः ॥ ४४ ॥

टीका—यजन्ते पूजयन्ति । के ते, पुमांस । क, जिन । केन अञ्जसा परमार्थेन । ये कि, ये यजन्ते । कि तत्, श्रुत । कया, भक्त्या । हि यस्मात् । न प्राहु न ब्रुवन्ति । के ते, आप्ता गुरव । कि तत्, अन्तर भेद । कयो, श्रुतदेवयो प्रवचनपरमात्मनो । कीदृश, किञ्चित् यदेव श्रुत स एव देवो य एव च देवस्तदेव श्रुतमित्यर्थ ॥ ४४ ॥

एव देवपूजाविधि संक्षेपेणोपदिश्य साक्षादुपकारकत्वेन गुरूणामुपासने नित्य नियुङ्क्ते—

उपास्या गुरवो नित्यमप्रमत्तैः शिवार्थिभि ।
तत्पक्षताक्ष्यपक्षान्त-श्चरा विघ्नोरगोत्तरा ॥ ४५ ॥

टीका—उपास्या सेव्या । के ते, गुरव धर्माराधनायां प्रयोक्तार । कै, शिवार्थिभि परमकल्याणकामै । किंविशिष्टै, अप्रमत्तै प्रमादरहितै ।

कथ, नित्य शश्वत्। यतो भवन्ति। के ते, तपक्षताक्ष्यपक्षान्तश्चरा तेषा गुरूणा पक्षस्तदायत्ततया वृत्ति स एव ताक्ष्र्यपक्षो गरुडपतत्र तत्रान्तर्मध्ये चरन्ति तदन्तश्चरा । किंविशिष्टा भवन्ति, विघ्नोरगोत्तरा विघ्ना प्रक्रमाद्धर्मानुष्ठानविषये अन्तरायास्त एवोरगा सर्पा अपकारकत्वात् तेभ्य उत्तरा परे तद्दूरचारिण , धर्मानुष्ठानप्रत्यूहसर्पैर्नाभिभूयन्त इत्यर्थ ॥ ४५ ॥

गुरूपास्तिविधिमाह—

निर्व्याजया मनोवृत्त्या सानुवृत्त्या गुरोर्मन ।
प्रविश्य राजवच्छश्वद्विनयेनानुरञ्जयेत् ॥ ४६ ॥

टीका—अनुरञ्जयेदात्मनि रक्त कुर्यात्। कोऽसौ, श्रेयोऽर्थी। किं त, त्मन श्चित्त। कस्य, गुरोराराध्यस्य। केन विनयेन अभ्युत्थानादिना कायिकेन, हितमितादिप्रतिपादनेन वाचनिकेन शुभचिन्तनादिना चित्तेन च। कथ, शश्वत् नित्य। किं कृत्वा, प्रविश्यान्तश्चरित्वा। किं तत्, गुरोर्मन । कया मनोवृत्त्या चित्तप्रवृत्त्या। किंविशिष्टया, निर्व्याजया निर्दम्भया। पुन किंविशिष्टया, सानुवृत्त्या छन्दानुवृत्तिसहितया। कस्येव, राजवत्, राज्ञो यथा सेवकवर्ग ॥ ४६ ॥

विनयेनानुरञ्जयेदित्येतदर्थं व्यनक्ति—

पार्श्वे गुरूणा नृपवत्प्रकृत्यभ्यधिका क्रिया ।
अनिष्टाश्च त्यजेत्सर्वा मनो जातु न दूषयेत् ॥ ४७ ॥

टीका—त्यजेत् वर्जयेत् उपासक । का, क्रियाश्चेष्टा। सर्वा। किंविशिष्टा, प्रकृत्यभ्यधिका स्वभावादतिरिक्ता वैकारिकी कोपहास्यविवादादिका। न केवल ता अनिष्टाश्च शास्त्रनिषिद्धाश्च पर्यस्तिकोपाश्रयादिका। क्व, पार्श्वे समीपे। केषा, गुरूणा। केषामिव नृपवत् राज्ञा यथा। तथा न दूषयेत् न विकारयेत्। किं तत्, राज्ञामिव गुरूणा मन । कथ जातु कदाचिदपि आर्तावस्थायामपीत्यर्थ ॥ ४७ ॥

१ निष्ठीवनमवष्टम्भ जृम्भण गात्रभञ्जनम्।
अस्यभाषण नर्म हास्य पादप्रसारणम् ॥
अभ्याख्यान करस्फोट करेण करताडनम्।
विकारमङ्गसस्कार वर्जयेद्यतिसन्निधौ ॥

साम्प्रत पात्राणि तर्पयेदित्यादिपूर्वोद्दिष्टदानादिविधिमपश्चार्यमाह—

पात्रागमविधिद्रव्य देशकालानतिक्रमात् ।
दान देय गृहस्थेन तपश्चर्यं च शक्तित ॥ ४८ ॥

टीका—देय दातव्यं । कि तत्, दान रत्नत्रयानुग्राहक वस्तु । केन, गृहस्थेन । कस्मात्, पात्राद्यनतिक्रमात् यथापात्र यथाऽऽगम यथाविधि यथाद्रव्य यथादेश यथाकाल चेत्यर्थ । तथा चर्यमनुष्ठेय गृहस्थेन । कि तत्, तपोऽनशनादि । कस्मात्, शक्तित निजसामर्थ्यानुसारेण दानतपसी कुर्यादित्यर्थ ॥४८॥

सम्यग्दृशो नित्यमवश्यतया विधीयमानयोर्दानतपसोरवश्यम्भाविन फलविशेषमाह—

नियमेनान्वहं किञ्चिद्यच्छतो वा तपस्यत ।
सन्त्यवश्यं महीयांस परे लोका जिनाश्रितः ॥ ४९ ॥

टीका—अवश्य निश्चित । सन्ति भवन्ति । के ते, लोका । किंविशिष्टा, परे जन्मान्तराणीत्यर्थ । किंविशिष्टा सन्ति, महीयांस इन्द्रादिपदलक्षणा । कस्य, जिनश्रित परमात्मान सेवमानस्य भव्यस्य । कि कुर्वतो, यच्छतो ददत तपस्यतो वा तपश्चरत । कि, किञ्चित् यद्वा तद्वा शास्त्रविहितं । केन, नियमेन अवश्यतया । कथ,—मन्वह दिनेदिने ॥ ४९ ॥

यदर्थं यद्दानं कर्तव्य तत्तदर्थमाह–

धर्मपात्राण्यनुग्राह्या-ण्यमुत्र स्वार्थसिद्धये ।
कार्यपात्राणि चात्रैव कीर्त्यै त्वौचित्यमाचरेत् ॥ ५० ॥

टीका—अनुग्राह्याणि उपकार्याणि श्रेयोऽर्थिना । कानि, धर्मपात्राणि रत्नत्रयसाधनपरा नरा । किमर्थं, स्वार्थसिद्धये । क अमुत्र परलोके स्वर्गादिसुखसम्पत्त्यर्थमित्यर्थ । तथा अनुग्राह्याणि । कानि, कार्यपात्राणि त्रिवर्गसाधनसहाया । कस्यं, अत्रैव जन्मनि स्वार्थसिद्धये पुरुषार्थसम्प्राप्तये । तथा आचरेदनुतिष्ठेत् गृही । किं तत्, औचित्य दानप्रियवचनाभ्यामन्यस्य सन्तोषोत्पादन । कस्यै कीर्त्यै यशोऽर्थम् ॥ ५० ॥

---

१ धर्मभव्यरथन्यानां पात्राणामुपकारकम् ।
दान यथायथं देयं वैयावृत्यविधायिना ॥

धर्मपात्राणा यथागुण सन्तर्पणीयत्वमाह–

समयिकसाधकसमयद्योतकनैष्ठिकगणाधिपान्धिनुयात् ।
दानादिना यथोत्तरगुणरागात्सद्गृही नित्यम् ॥ ५१ ॥

टीका—समयिको गृही यतिर्वा जिनसमयश्रित, साधको ज्योतिषमन्त्र वादादिलोकोपकारकशास्त्रज्ञ, समयद्योतको वादित्वादिना मार्गप्रभावक, नैष्ठिको मूलोत्तरगुणश्लाघ्यतपोऽनुष्ठाननिष्ठ, गणाधिप धर्माचार्यस्तादृग्गृहस्थाचार्यो वा एतान् पञ्च धिनुयात् प्रीणयेत्। कोऽसौ, सद्गृही पाक्षिक श्रावकस्त्रैवर्णिको वा गृहस्थ । केन, दानादिना दानमानासनसम्भाषणादिना। कस्मात्, यथोत्तरगुणरागात् या य उत्तर उत्कृष्ट समयिकादीना मध्ये तस्य तस्य गुणेषु प्रीतिन, अथवा यो यो यस्योत्कृष्टो गुणस्तत्र तत्र प्रीत्या त धिनुयादिति योज्यम्। अत्र श्रमणोपासकेषु मुमुक्षुषु रत्नत्रयानुग्रहबुध्या सन्तर्पण पात्रदत्ति, बुभुक्षुषु च गृहस्थेषु वात्सल्येन यथार्हमनुग्रह समान दत्तिरिति विभाग ॥ ५१ ॥

समदत्तिविधानोपदेशार्थमाह–

स्फुरत्येकोऽपि जैनत्व गुणो यत्र सतां मत ।
तत्राप्यजैनै सत्पात्रै र्द्योत्य खद्योतवद्रवौ ॥ ५२ ॥

---

१ गृहस्थो वा यतिर्वाऽपि जैन समयमास्थित ।
यथाकालनुप्राप्त पूजनीय सुदृष्टिभि ॥

२ ज्योतिर्मन्त्रनिमित्तज्ञ सुप्रज्ञ कायकर्मसु ।
मान्य समयिभि सम्यक्परोक्षार्थ+++धी ॥

३ दीक्षायात्राप्रतिष्ठाद्या क्रियास्तद्विरहे कुत ।
तदर्थं परपृच्छाया कथ च समयोन्नति ॥

४ मूलोत्तरगुणश्लाघ्यैस्तपोभिर्निष्ठितास्थिति ।
साधु साधु भजेत्पूज्य पुण्योपार्जनपण्डितै ॥

५ ज्ञानकाण्डे क्रियाकाण्डे चातुर्वर्ण्यपुरस्सर ।
सूरिर्देव इवाराध्य ससाराब्धितरण्डक ॥

टीका–द्योत्य प्रकाश्य प्रभाव्य। के, सत्पात्रे ज्ञानतपोऽधिके। किंविशिष्टे,–रजैनै शिवादिभक्तिप्रहाविष्टै। क, तत्रापि तपोज्ञानरहितेऽपि जैने। किंवत्, खद्योतवत् खद्योतैरिव। कस्मिन्, रवौ रविसन्निधाने ज्योतिरिङ्गणा यथा निष्प्रभा भवन्ति तथा स्फुरज्जैनत्वगुणेषु समीपे मिथ्यादृष्टिधार्मिका इत्यर्थ। यत्र किं, यत्र स्फुरति प्रतपति। कोऽसौ, जैनत्वगुण जिन एव देवो मे भवार्णवोत्तारकत्वादित्यभिनिवेशधर्म। किंविशिष्टेऽपि, ज्ञानतपोरहित, किं पुनस्तत्सहित इत्यपिशब्दार्थ। किंविशिष्ट, सता मत साधूनामिष्ट॥ ५२॥

श्रेयोऽर्थिना जैनानुग्रहानुभावमाह—

वरमेकोऽप्युपकृतो जैनो नान्ये सहस्रश।
दलादिसिद्धान् कोऽन्वेति रससिद्धे प्रसेदुषि॥ ५३॥

टीका–वर भवतु। कोऽसौ, जैन। किंविशिष्ट, उपकृतोऽनुगृहीत। किंविशिष्टोऽपि, एकोऽपि। न वर। के, ऽन्ये अजैना। किंविशिष्टा, उपकृता। कियन्त, सहस्रश सहस्रसख्या। अत्र दृष्टान्तमाह–को, न कश्चित्। अन्वेति अनुवर्तते। कान्, दलादिसिद्धान् दल बीजरहितकृत्रिमसुवर्णादिद्रव्य आदि शब्दाद्दूर्वास्वर्णादि तत्र तेन वा सिद्धान् प्रसिद्धान्। क सति, रससिद्धे पारदेन दारिद्र्यव्याधिजरादिनिराकरणशक्त्या प्रतीते पुसि। किंविशिष्टे, प्रसेदुषि प्रसन्ने अनुग्रहोद्यते॥ ५३॥

नामादिनिक्षेपविभक्तानां चतुर्णां जैनानां पात्रत्व यथोत्तर विशिनष्टि–

नामत स्थापनातोऽपि जैनः पात्रायते तराम्।
स लभ्यो द्रव्यतो धन्यैर्भावतस्तु महात्मभि॥ ५४॥

टीका–पात्रायते तरा अजैनपात्रेभ्योऽतिशयेन सयुज्यमाननिर्वाणकारण गुणलक्षणपात्रवदाचरति, सम्यक्त्वमहाचारिपुण्यास्रवकारणत्वात्। कोऽसौ, जैन। केन, नामत सञ्ज्ञामात्रेण, न पर नाम्ना स्थापनातोऽपि सोऽय जैन इति कल्पनामात्रेणापि। लभ्य प्राप्य। कोऽसौ, स जैन। केन, द्रव्यतो द्रव्येण आगामिजैनत्वगुणयोग्यत्वेन विशिष्ट। कै, धन्यै पुण्यवद्भि। स एव तु भावतो भावेन जैनत्वगुणयोगेन लभ्य। कै, महात्मभि महाभागै॥ ५४॥

भावजैन प्रति निरुपाधिप्रीतिमतोऽभ्युदयनि श्रेयससम्पद् फलमाह–

प्रतीतजैनत्वगुणेऽनुरज्यन्निर्व्याजमासंसृति तद्गुणानाम्।
धुरि स्फुरन्नभ्युदयैरदृप्तस्तृप्तस्त्रिलोकीतिलकत्वमेति ॥ ५५ ॥

टीका–एति गच्छति । कोऽसौ, गृही । किं कुर्वन्, अनुरज्यन् स्वयमेवानुरागं कुर्वन् । कथं, निर्व्याजं निश्छद्म । क्व, प्रतीतः प्रसिद्धो जैनत्वगुणो यस्य तस्मिन् प्रतीतजैनत्वगुणे । किं,मेति त्रिलोकीतिलकत्वं परमपदं । किंभूतो भूत्वा, तृप्तः वितृष्णीभूत इत्यर्थः । कैः,अभ्युदयैराज्ञैश्वर्यादिभिः । किंविशिष्टः सन्, अदृप्तोऽकृतमदः सम्यक्त्वसहचारिपुण्योदययोगात् । किं कुर्वन्, स्फुरन् दीप्यन् । क्व,धुरि अग्रे । केषां सद्गुणानां प्रतीतजैनत्वगुणानां । कथम् आसंसृति संसारं यावत्, भवे भवे जैनानामग्रणीर्भवन्नित्यर्थः ॥ ५५ ॥

गृहस्थाचार्याय तदभावे मध्यमपात्राय वा कन्यादिदानं पाक्षिकश्रावकस्य कर्तव्यतयोपदिशति–

निस्तारकोत्तमायाथ मध्यमाय सधर्मणे ।
कन्याभूहेमहस्त्यश्व-रथरत्नादि निर्वपेत् ॥ ५६ ॥

टीका––निर्वपेत् दद्यात् गृही । किं तत्, कन्या कुमारी, भूर्भूमिः, हेम काञ्चनं, हस्ती गजः, अश्वो वाजी, रथः स्यन्दनः, रत्नं वज्रादि, आदिशब्देन वस्त्रगृहनगराद्येवजातीयकमन्यदपि त्रिवर्गसाधनाश्रयं वितरेत् । कस्मै,सधर्मणे समानः आत्मना समो धर्मः क्रियामन्त्रव्रतादिलक्षणो गुणो यस्य तस्मै किंविशिष्टाय, निस्तारकोत्तमाय संसारार्णवोत्तारकाणां गृहिणां मध्ये प्रधानाय न केवलं तस्मै तदलाभे च मध्यमाय अनुत्तमाधमाय । अथशब्दोऽत्र पक्षान्तरसूचनेऽधिकारे वा । अत्र जघन्यविषया समदत्तिं व्याख्याय मध्यमविषयाऽसावधिक्रियते इत्यर्थः । यत्यपेक्षया गृहस्थस्य गुणाधिकस्यापि मध्यमपात्रत्वात् ॥ ५६ ॥

सधर्मभ्य कन्यादिदाने हेतुमाह––

आधानादिक्रियामन्त्र-व्रताद्यच्छेदवाञ्छया ।
प्रदेयानि सधर्मभ्य कन्यादीनि यथोचितम् ॥ ५७ ॥

टीका–प्रदेयानि प्रकृष्टं कृत्वा दातव्यानि गृहिणा । कानि, कन्यादीनि । केभ्य, सधर्मभ्य साधर्मिकेभ्य । कथं, यथोचितं यो यो यद्दानस्य योग्यस्तस्मै

तस्मै तद्दातव्यमित्यर्थः। कया, आधानादीत्यादि–आधानं गर्भाधानविधानमादिर्यासां प्रीतिसुप्रीत्यादीनामार्षोक्तानां क्रियाणां ता आधानाद्यस्ताश्च ताः क्रियाश्च कर्माणि गृहस्थानामवश्यकार्याणि, मन्त्राः प्रत्यासत्तेराधानादिक्रिया-सम्बन्धिन एवार्षोक्ता अपराजितमन्त्रो वा, व्रतानि मद्यविरत्यादीनि आदिश-ब्दाद्देवपूजापात्रदानादिधर्मकर्माणि तेषामच्छेदः सातत्येन प्रवृत्तिस्तत्र वाञ्छा आकाङ्क्षा तया ॥ ५७ ॥

सम्यक्कन्यादानविधिं तत्फलं चाह—

निर्दोषां सुनिमित्तसूचितशिवां कन्यां वरार्हैर्गुणैः
स्फूर्जन्तं परिणाय्य धर्म्यविधिना यः सत्करोत्यञ्जसा।
दम्पत्योः स तयोस्त्रिवर्गघटनात्त्रैवर्गिकेष्वग्रणी-
र्भूत्वा सत्समयास्तमोहमहिमा कार्ये परेऽप्यूर्जति ॥ ५८ ॥

टीका–यो गृही। अञ्जसा श्रद्धापरत्वेन। साधर्मिकं सत्करोति सम्मानयति यथोचितवस्त्रादिदानेनोपचरति। किं कृत्वा, परिणाय्य युक्तितो वरणविधानमग्निदेवद्विजसाक्षिकं च पाणिग्रहणं विवाहस्तं कारयित्वा। केन, धर्म्यविधिना[1] धर्म्यो धर्मादनपेतो ब्राह्मप्राजापत्यार्षदैवाश्चत्वारो विवाहास्तेषां यथार्हं मयो-

---

१ धर्म्यविवाहविधिरार्षे यथा—

ततोऽस्य गुर्वनुज्ञाना–दिष्टा वैवाहिकी क्रिया।
वैवाहिके कुले कन्या–मुचितां परिणेष्यतः ॥
सिद्धार्चनविधिं सम्यङ्–निर्वर्त्य द्विजसत्तमाः।
कृताग्नित्रयसम्पूजाः कुर्युस्तत्साक्षिकां क्रियाम् ॥
पुण्याश्रमे क्वचित्सिद्ध–प्रतिमाभिमुखं तयोः।
दम्पत्योः परया भूत्या कार्यः पाणिग्रहोत्सवः ॥
वेद्यां प्रणीतमग्नीनां त्रयं द्वयमथैककम्।
ततः प्रदक्षिणीकृत्य प्रसाध्य विनिवेशनम् ॥
पाणिग्रहणदीक्षायां नियुक्तं तद्वधूवरम्।
आसप्ताहं चरेद्ब्रह्म–व्रतं देवाग्निसाक्षिकम् ॥

([illegible]।)

ग्रेण । किं कुर्वन्त, स्फूर्जन्त विचारकचेतसि स्फुरन्त । कै,–गुंण । किविशिष्टे, चराँहैवरयितुर्योग्यै कुलशीलसानाथ्यविद्यावित्तरूप्ययोग्यवयोर्थिवै । का परिणाय्य, कन्यां । किंविशिष्टा, निर्दोषां सामुद्रिकशास्त्रोक्तदोषरहिता । पुन किंविशिष्टा, सुनिमित्तसूचितशिवा सुनिमित्तै सामुद्रिकदूतज्योतिषादि-भविष्यच्छुभाशुभज्ञानोपायै सूचित प्रकाशित शिव स्वस्य वरस्य च कल्याण यस्यास्ता । स किमित्याह—ऊर्जति समर्थो भवति । कोऽसौ, स यथाविधि कन्यादाता । च, कार्येऽवश्यकृत्ये । किंविशिष्टे परेऽपि पारलौकिके न केवल लौकिके इत्यपिशब्दार्थ । किंविशिष्ट सन्, सदित्यादि–सत्समय जिनप्रवच-नमार्यसङ्गतिर्वा तेनास्तो निराकृतो मोहस्य चारित्रावरणकर्मणो महिमा गुरुत्व येन स तथोक्त । किं कृत्वा, भूत्वा । किम्भूतो,–ऽग्रणी प्रधान । केषु मध्ये, त्रैवर्गिकेषु धर्मार्थकामानाचरत्सु । कस्मात् त्रिवर्गघटनात् धर्मार्थकामसम्पादनात् । कयो,–स्तयो स्वकन्यातद्वरलक्षणयोर्दम्पत्योर्नायापत्यो ॥ ५८ ॥

सत्कन्याप्रदातु साधर्मिकोपकारकरणद्वारेण महान्त सुकृतलाभमवभासय, न्नाह—

कान्त्वा स्वस्योचिता भूमिं तीर्थभूमीर्विहृत्य च ।
स्वगृह प्रविशेद्भूत्या परया तद्वधूवरम् ॥
विमुक्तकङ्कण पश्चात्स्वगृहे शयनीयकम् ।
अधिशय्य यथाकाल भोगाङ्गैरुपलालितम् ॥
सन्तानार्थमृतावेव कामसेवा मिथो भजेत् ।
शक्तिकालव्यपेक्षोऽय क्रमोऽशक्तेष्वतोऽन्यथा ॥
१–२ द्वौ हि धर्मौ गृहस्थाना लौकिक पारलौकिक ।
लोकाश्रयो भवेदाद्य पर स्यादागमाश्रय ॥
सर्व एव हि जैनाना प्रमाण लौकिको विधि ।
यत्र सम्यक्त्वहानिर्न यत्र न व्रतदूषणम् ॥
स्वजात्यैव विशुद्धाना वर्णानामिह रत्नवत् ।
तत्क्रियाविनियोगाय जैनागमविधि परम् ॥
यद्भवभ्रान्तिनिर्मुक्ति हेतुधीस्तत्र दुर्लभा ।
ससारव्यवहारे तु स्वत सिद्धे वृथाऽऽगम ॥

सत्कन्यां ददता दत्तः सत्रिवर्गो गृहाश्रमः।
गृहं हि गृहिणीमाहुर्न कुड्यकटसंहतिम् ॥ ५९ ॥

टीका—दत्तो वितीर्णः सद्गृहिणा साधर्मिकाय। कोऽसौ, गृहाश्रमः गृहं आश्रमो धर्मानुष्ठानं गृहमेव वाऽऽश्रमस्तप स्थानं। किं कुर्वता, ददता। कां, सत्कन्या सती प्रशस्ता कौलीन्यादिगुणोपेता सामुद्रिकोक्तदोषरहिता च कन्या कुमारी सत्कन्या तां। किंविशिष्टो गृहाश्रमो दत्तः, सत्रिवर्गो धर्मार्थकामाना सद्गृहिणीमूलत्वात्। तथाहि—धर्मः स्वदारसन्तोषाद्यात्मकसंयमलक्षणो देवादिपरिचरणस्वरूप सत्पात्रदानादिस्वभावश्च, अर्थो वेश्यादिव्यसनव्यावर्तनेन निष्प्रत्यूहमर्थस्योपार्जनादुपार्जितस्य च रक्षणाद्रक्षितस्य च वर्द्धनाद्यथाभाग्यं ग्रामसुवर्णादिसम्पत्ति, 'सकल्परमणीयस्य प्रीतिसम्भोगशोभिनो रुचिरस्याभिलाषस्य नाम काम' इति स्मृतिरिति वचनात् कामश्च यथेष्टमाभिमानिकरसानुविद्धसर्वेन्द्रियप्रीतिहेतु कुलाङ्गनासङ्गिनो सुलभ इति। हि यस्मात्। आहु ब्रुवन्ति विद्वांसः। किं, गृहं। कां, गृहिणीं कुलपत्नीं। न आहुः। किं तत्, गृहं। कुड्यकटसंहतिं भित्तिवंशादिच्छादनसङ्घातम् ॥ ५९ ॥

कुलस्त्रीपरिग्रहं लोकद्वयाभिमतफलसम्पादकत्वात् त्रैवर्गिकस्य विधेयतयोपदिशति—

धर्मसन्ततिमक्लिष्टां रतिं वृत्तकुलोन्नतिम्।
देवादिसत्कृतिं चेच्छन्सत्कन्यां यत्नतो वहेत् ॥६०॥

टीका—वहेत् परिणयेत। कोऽसौ, श्रावकः। कां, सत्कन्यां सती प्रशस्ता सतश्च सज्जनस्य कन्या सत्कन्या तां। कस्मात् यत्नतः प्रयत्नेन सम्भ्रमपरतया। किं कुर्वन्, इच्छन् आकांक्षन्। किं किं, धर्मसन्तति धर्मार्थं सन्ततिरपत्यानि अथवा धर्मस्य सन्ततिरविच्छेदो धर्मसन्ततिस्तां, तथा अक्लिष्टामनुपहतां रतिं सम्भोग, तथा वृत्तकुलोन्नतिं वृत्तस्याचारस्य कुलस्य च वंशस्य गुरुस्य वा उन्नतिरुद्गतिस्तां, तथा देवादिसत्कृतिं देवद्विजातिथिबान्धवसत्कारम् ॥६०॥

दुष्कलत्रस्याकल्यस्य वा पात्रस्य भूम्यादिदानाद् कश्चिदुपकारः स्यादित्यसमर्थमशक्य सत्कन्याविनियोगेन सधर्माणमनुगृह्णीयादिति विधिस्वरूपार्थनार्थमर्थान्तरन्यासेन समर्थयते—

सुकलत्रं विना पात्रे भूहेमादिव्ययो वृथा ।
कीटैर्दन्दश्यमानेऽन्तः कोऽम्बुसेकाद्द्रुमे गुणः ॥६१॥

टीका—भवति । कोऽसौ, भूहेमादिव्यय· भूमिसुवर्णादिदान । कथम्भूतो, वृथा व्यर्थ · । क्व, पात्रे संयुज्यमानमोक्षकारणगुणे गृहिणि । कथं, विना । किं तत्, सुकलत्र सत्पत्नीं । अत्र दृष्टान्तमाह–को भवति, न कश्चित् । कोऽसौ, गुण उपकारः । कस्मात्, अम्बुसेकात् जलसेचनात् । क्व, द्रुमे वृक्षे । कि क्रियमाणे, दन्दश्यमाने गर्हित भक्ष्यमाणे । कैः, कीटैः घुणैः । क्व, अन्तर्मध्ये ।

विषयसुखोपभोगेनैव चारित्रमोहोदयोद्रेकस्य शक्यप्रतीकारत्वात्तद्वारेणैव तस्मादपवर्त्यमानमिव साधर्मिकमपि विषयेभ्यो व्युपरमयेदित्युपदेशार्थमाह–

विषयेषु सुखभ्रान्तिं कर्माभिमुखपाकजाम् ।
छित्वा तदुपभोगेन त्याजयेत्तान्स्ववत्परम् ॥ ६२ ॥

टीका—त्याजयेद्विमोचयेत् । कोऽसौ, सद्गृही । कं, परं कन्यादिदानेन विषयीक्रियमाणं साधर्मिकं । कान् तान्, सुकलत्रादिविषयान् । किंवत्, स्ववत् आत्मानं यथा । किं कृत्वा, छित्वा प्रशमय्य । का, सुखभ्रान्तिं सुखयन्तीति सुखा सुखहेतव इमे सुखं वेति विपर्यासमतिं । केषु, विषयेषु । किंविशिष्टा, कर्माभिमुखपाकजां कर्मणश्चारित्रमोहस्याभिमुखो निजफलदानोद्यत पाको रस कर्माभिमुखपाकस्तस्मात् जातां । छित्वा प्रशमय्य । कां, सुखभ्रान्तिं । केन, तदुपभोगेन विषयानुभवनेन ॥ ६२ ॥

दुष्षमाकालवशात्प्रायेण पुरुषाणामाचारविप्लवदर्शनाद्विचिकित्साकुलितचित्तस्य दातु सौचित्यविधानार्थं चतुर श्लोकानाह—

दैवाल्लब्धं धनं प्राणैः सहावश्यंविनाशि च ।
बहुधा विनियुञ्जानः सुधीः समयिकान्क्षिपेत् ॥ ६३ ॥

टीका—क्षिपेत् धिगिमान् सम्भाषणमात्रस्याप्ययोग्यानित्याद्यवर्णवादेन तिरस्कुर्यादिति काक्वा न क्षिपेदिति प्रतिषेधे पर्यवस्यति । कोऽसौ, सुधी श्रेयोऽर्थी गृही । कान्, समयिकान् समयाश्रितान् गृहस्थान् यतीन् वा । किं कुर्वाणो, विनियुञ्जानो व्ययमान· । कि तत्, धनं । कतिधा, बहुधा बहुभि

प्रकारै लज्जाभयपक्षपातादिभिः । किंविशिष्टं धनं, लब्धं प्राप्तं । कस्मात्, दैवात्पुण्योदयाच्च पुरुषकारात्, तस्य संसारे गौणत्वात् । किंविशिष्ट,-मवश्यं-विनाशि नियमेन गत्वरं । कथं, सह । कैः, प्राणैः ॥ ६३ ॥

किं तर्हि कुर्यादित्याह—

विन्यस्यैदंयुगीनेषु प्रतिमासु जिनानिव ।
भक्त्या पूर्वमुनीनर्चेत्कुतः श्रेयोऽतिचार्चिनाम् ॥ ६४ ॥

टीका—अर्चेत् पूजयेत् । कोऽसौ, सद्गृही । कान्, पूर्वमुनीन् प्राक्तनसाधून् । कया, भक्त्या । किं कृत्वा, विन्यस्य नामादिविधिना निक्षिप्य । केषु, ऐदंयुगीनेषु अस्मिन् युगे साधुषु । कास्विव कान्, प्रतिमासु जिनानिव प्रतिबिम्बेष्वर्हतो यथा । यत कुतो भवति, न कुतश्चित् । किं तत्, श्रेय पुण्यं । केषाम्, अतिचर्चिनाम् अतिमात्रं क्षोदकाराणाम् ॥ ६४ ॥

---

१ भुक्तिमात्रप्रदाने तु का परीक्षा तपस्विनाम् ।
ते सन्त सन्त्वसन्तो वा गृही दानेन शुध्यति ॥
सर्वारम्भप्रवृत्ताना गृहस्थाना धनव्यय ।
बहुधाऽस्ति ततोऽत्यर्थं न कर्त्तव्या विचारणा ॥
यथा यथा विशिष्यन्ते तपोज्ञानादिभिर्गुणै.
तथा तथाऽधिकं पूज्या मुनयो गृहमेधिभि ॥
दैवाल्लब्धं धनं धन्यैर्वप्तव्यं समयाश्रिते ।
एको मुनिर्भवेल्लभ्यो न लभ्यो वा यथागमम् ॥
उच्चावचजनप्राय समयोऽयं जिनेशिनाम् ।
नैकस्मिन्पुरुषे तिष्ठे देकस्तम्भ इवालय. ॥
ते नामस्थापनाद्रव्य भावन्यासैश्चतुर्विधा ।
भवन्ति मनुयः सर्वे दानमानादिकर्मसु ॥
उत्तरोत्तरभावेन विधिस्तेषु विशिष्यते ।
पुण्यार्जने गृहस्थाना जिनप्रतिकृतिष्विव ॥
काले कलौ चले चित्ते देहे चान्नादिकीटके ।
एतच्चित्रं यदद्यापि जिनरूपधरा नराः ॥

पुनस्तदर्थसमर्थनार्थमाह—

भावो हि पुण्याय मत शुभ पापाय चाशुभ ।
तद्दुष्यन्तमतो रक्षेद्धीर समयभक्तित ॥ ६५ ॥

टीका—हि यस्मात् । पुनरिष्ट । कोऽसौ, भाव परिणाम । कस्मै, पुण्याय सुकृतनिमित्त । किंविशिष्ट, शुभ प्रशस्त । तथा मत । कोऽसौ, भाव । किंविशिष्टो,-ऽशुभोऽप्रशस्त । कस्मै, पापाय पातकनिमित्त । यत एवमत पुनस्मात्कारणात् । रक्षेन्निवारयेत् । कोऽसौ, धीरोऽविकारप्रकृति । क त, भाव । कि कुर्वन्त, दुष्यन्त विकुर्वाण । कस्मात्, समयभक्तित जिन-शासन कलौ धारयन्तोऽमी अतो जिनवन्मान्या इत्यनुरागबुध्या ॥ ५६ ॥

ज्ञानतपसा पृथक् समुदितयोश्च तद्वता च पूज्यत्वे युक्तिमाह—

ज्ञानमर्च्यं तपोऽङ्गत्वा त्तपोऽर्च्यं तत्परत्वत ।
द्वयमर्च्यं शिवाङ्गत्वात्तद्वन्तोऽर्च्या यथागुणम् ॥ ६६ ॥

टीका—अर्च्यं पूज्य गृहिणा । कि तत् ज्ञान साधकस्य दीक्षायात्राप्रति-ष्ठाद्युपयोगि । कुत, स्तपोऽङ्गत्वादनशनादितपोनिमित्तत्वात् । तथा अर्च्यं । किं तत्, तपो नैष्ठिकस्य । कस्मात्त त्परत्वत ज्ञानातिशयहेतुत्वात् ज्ञान परमुत्कृष्ट यस्मादिति व्युत्पत्त्याश्रयणात् । तथा अर्च्यं । कि तत् द्वय ज्ञानतपोयुगल गणाधिपस्य । कस्मात्, शिवाङ्गत्वान्मोक्षकारणत्वात् । तथा अर्च्या । के ते, तद्वन्तो ज्ञानिनस्तपस्विनो ज्ञानतपोयुक्ताश्च । कथ, यथागुण यो यो गुणो यस्याधिकस्तेन तन त त विशेषेण पूजयेदित्यर्थ ॥ ६६ ॥

अथ मिथ्यादृष्टश्च सुपात्रेष्वेवान्नदानादुत्पन्नस्य पुण्यस्य फलविशेषमपात्रे चार्थविनियोगस्य वैयर्थ्यं प्रतिपादयितुमाह—

न्यग्मध्योत्तमकुत्स्यभोगजगतीभुक्तावशेषाद्वृषा-
त्तादृक्पात्रवितीर्णभुक्तिरसुदृग्देवो यथास्वं भवेत् ।

यथा पूज्य जिनेन्द्राणा रूप लेपादिनिर्मितम् ।
तथा पूर्वमुनिच्छाया पूज्या सम्प्रति सयता ॥

(पूर्वपृष्ठादागता ।)

सद्दृष्टिस्तु सुपात्रदानसुकृतोद्रेकात्सुभुक्तोत्तम-
स्वर्भूमर्त्यपदोऽश्नुते शिवपदं व्यर्थस्त्वपात्रे व्ययः ॥६७॥

टीका—भवेत् जायेत । कोऽसौ, असुदृङ्मिथ्यादृष्टिर्जीवः । किं भवेत्, देवः सुरः । कथं, यथास्वं यथास्वमात्मीयं दानं तत्तदनतिक्रमेणेत्यर्थः । किंविशिष्टः सन्, तादृक्पात्रवितीर्णभुक्तिः तादृग्भ्यो न्यग्मध्योत्तमकुत्सितेभ्यः पात्रेभ्यो वितीर्णा दत्ता भुक्तिराहारो येन स तथोक्तः । कस्माद्भवेत्, वृषात् पुण्यविशेषात् । किंविशिष्टात्, न्यगित्यादि,–न्यक् जघन्यं एकपल्योपमभोग्यत्वात्, उत्तमस्त्रिपल्योपमभोग्यत्वात्, कुत्स्यः सुस्वादुमृत्पुष्पफलाशनवृत्तित्वादेकोरुकादिदेहयोगाच्च । न्यक्च मध्यमश्च उत्तमश्च कुत्स्यश्च न्यग्मध्योत्तमकुत्स्यास्ते च ते भोगाश्च न्यग्मध्योत्तमकुत्स्यभोगास्तैरुपलक्षिता जगत्यो भूमयो जघन्यभोगभूमिर्मध्यमभोगभूमिरुत्तमभोगभूमिः कुभोगभूमिश्चेति चतस्रस्तासु भुक्ता कल्पवृक्षादिसंपादितेष्टविषयोपभोगसुखेन निर्जीर्णश्चासावशेषश्चोद्भूतो यो वृषस्तस्मात् । तत्र मिथ्यादृष्टिर्जघन्यपात्राय सुदृष्टिलक्षणायाहारदानं दत्वा जघन्यभोगभूमौ, मध्यमपात्राय सम्यक्त्वाणुव्रतपवित्राय मध्यभोगभूमौ, उत्तमपात्राय सम्यग्दर्शनमहाव्रतभूषिताय चोत्तमभोगभूमौ, निरातङ्कभोगान् भुक्त्वा स्वायुःक्षये यथायोग्यं गच्छेत् । तत्तत्पात्रसन्निधानात्तथाविधशुभपरिणामविशेषोपपत्त्या तादृक्पुण्यप्रचयानुभावात् । स एव च कुपात्राय सम्यक्त्वरहितव्रततपोयुक्तायाहारं दत्वा कुभोगभूमौ निर्भूपाविवक्ष-गुहावृक्षमूलनिवासैकोरुकादिशरीरो भूत्वा स्वसमानपत्न्या सह यथास्वं निराबाधतया भोगं भुक्त्वा पल्योपममात्रस्वायुःक्षये मृत्वा स्वर्गे वाहनदेवो ज्योतिष्को वा व्यन्तरो वा भवनवासी वा भूत्वा दीर्घं दुर्गतिदुःखानि भुञ्जन् संसरति । किं च ये भोगभूमिषु ये च मानुषोत्तरपर्वताद्बहिः प्राक्च स्वयंप्रभपर्वतात्तिर्यञ्चो ये च म्लेच्छराजगजतुरगादयो वेश्यादयो वा नीचा मानो

पात्रापात्रलक्षणं यथा–

१–२ उत्कृष्टपात्रमनगारमणुव्रताढ्यं
मध्यं व्रतेन रहितं सुदृशं जघन्यम् ।
निर्दर्शनं व्रतनिकाययुतं कुपात्रं
युग्मोज्झितं नरमपात्रमिदं हि विद्धि ॥

भोगभाजो दृश्यन्ते ते सर्वे कुपात्रदानतो यथापरिणाममुत्पन्नेन मिथ्यात्व-सहचारिणा पुण्येन तथा स्युरिति निर्णय । अश्नुते प्राप्नोति । कोऽसौ, सद्दृष्टि सम्यक्त्वविशुद्धो जीव । तुर्विशेषे । किं, शिवपद । किंभूतो भूत्वा, सुष्ठु यथेष्ट भुक्तानि उत्तमानि महर्द्धिकानि स्वर्भुवा कल्पापपन्नदेवाना मर्त्याना च चक्रवर्त्यादीना पदानि येन स सुभुक्तोत्तमस्वर्भूमर्त्यपद । कस्मात्, सुदात्रदानसुकृतोद्रेकात् सुपात्राय महातपोधनाय त्रिविधपात्राय वा दान मनुग्रहार्थ स्वस्यातिसर्गस्तस्माज्जात सुकृत पुण्य तस्योद्रेकादुदयात् । भवेत् । कोऽसौ व्यय अर्थविनियोग । क, अपात्रे[1] सम्यक्त्वव्रतरहितप्राणिनि । किंविशिष्टो, व्यर्थो विपरीतफलो निष्फलो वा ॥ ६७ ॥

इदानीं पात्रदानपुण्योदयफलभाजा भोगभूमिजाना जन्मप्रभृति सप्ताह-सप्तकभाविनीरवस्था निर्देष्टुमाह–

उत्तमपत्त साहू मज्झमपत्त च सावया भणिया ।
अविरदसम्माइट्ठी जहण्णपत्त मुणयव्यम् ॥
मिथ्यात्वग्रस्तचित्तेषु चारित्रा + + भागिषु ।
दोषायैव भवेद्दान पय पानामवाहिषु ॥
कारुण्यादथवौचित्यात्तदा किंचिद्दिशन्नपि ।
दिशदुद्धृतमेवाथ गृहे भु क्त न कारयेत् ॥
सत्कारादिविधावषा दर्शन दूषित भवत् ।
यथा विशुद्धमप्यम्बु विषभाजनसगमात् ॥
पात्राय विधिना दत्वा दान मृत्वा समाधिना ।
अच्युतान्तेषु कल्पेषु जायन्ते शुद्धदृष्टय ॥
ज्ञात्वा धर्मप्रसादेन तत्र प्रभवमात्मन ।
पूजयन्ति जिनार्चास्ते भक्त्या धर्मस्य वृद्धये ॥

1–अपात्रदानत किंचिन्न फल पापत परम् ।
लभ्यते हि फल खेदो वालुकापुञ्जपेषणे ॥
अपात्राय धन दत्ते यो हित्वा पात्रमुत्तमम् ।
साधु विहाय चौराय तदर्पयति स स्फुटम् ॥

सप्तोत्तानशया लिहन्ति दिवसान्स्वांगुष्ठमार्यास्तत
को रिङ्गन्ति तत पदैः कलगिरो यान्ति स्खलद्भिस्तत ।
स्थेयोभिश्च तत कलागुणभृतस्तारुण्यभोगोद्गता
सप्ताहेन ततो भवन्ति सुदृगादानेऽपि योग्यास्तत ॥६८॥

टीका—लिहन्ति आस्वादयन्ति । के, आर्या भोगभूमिजमनुजा । क, स्वाङ्गुष्ठ । कान्, दिवसान् । कति, सप्त जन्मानन्तर सप्ताहमित्यर्थ । किंविशिष्टा सन्त , उत्तानशया उत्तानमनधोमुख शेरते । तत प्रथमसप्ताहानन्तर रिङ्गन्ति पद्भ्या सर्पन्ति । के, आर्या । कस्या, कौ भूमौ । कान्, सप्तदिवसान् । ततो द्वितीयसप्ताहानन्तर यान्ति सञ्चरन्ति । के, आर्या । कस्यां, कौ । कै , पदै पादन्यासै । कि कुर्वद्भि , स्खलद्भिर्यत्रतत्रपतद्भि । किंविशिष्टा सन्त ,कलगिरो मनोहरवाच. । ततस्तृतीयसप्ताहानन्तरमार्या सप्ताहेन सप्तभिर्दिनै स्थेयोभि स्थिरतरै पदै यान्ति गच्छन्ति । कस्या, कौ पृथिव्या । ततश्चतुर्थसप्ताहानन्तरमार्या सप्ताहेन सप्तभिर्दिनै कलगीतादिगुणाँश्च लावण्यादीन् बिभ्रतो भवन्ति । तत पञ्चमसप्ताहान्तर सप्ताहेनार्या तारुण्यभोगोद्गता उदितोदितयौवना अविच्छिन्नमयादीष्टविषयाश्च भवन्ति । तत षष्ठमसप्ताहानन्तर सप्ताहेनार्या योग्या भवन्ति । क, सुदृगादाने सम्यक्त्वग्रहणे । अपिर्विस्मये ॥ ६९ ॥

अथ मुनिदेयनिर्णयार्थमाह—

तप श्रुतोपयोगीनि निरवद्यानि भक्तितः ।
मुनिभ्योऽन्नौषधावास पुस्तकादीनि कल्पयेत् ॥ ६९ ॥

टीका—कल्पयेदुपकारयेत् । सद्दृष्टी । कानि, अन्नौषधावासपुस्तकादीनि । आदिशब्देन पिच्छिकाकमण्डल्वादीनि । केभ्यो, मुनिभ्य सयतेभ्य । कस्मात्, भक्तित । किंविशिष्टानि, तप श्रुतोपयोगीनि तपस श्रुतज्ञानस्य चोपकारकाणि । पुन किंविशिष्टानि, निरवद्यानि पिण्डशुद्ध्युक्तोद्गमोत्पादनादिदोषरहितानि ॥ ६९ ॥

अन्नादिदानफलाना क्रमेण निदर्शनान्याह—

भोगित्वाद्यन्तशान्तिप्रभुपदमुदयं संयतेऽन्नमदाना
च्छ्रीषेणो रुग्निषेधाद्धनपतितनया प्राप सर्वौषधर्द्धिम् ।
प्राक्तज्जन्मर्षिवासावनशुभकरणात्सूकरः स्वर्गमग्र्यं
कौण्डेशः पुस्तकार्चावितरणविधिनाऽप्यागमाम्भोधिपारम्

टीका—प्राप लब्धवान् । कोऽसौ, श्रीषेणो नाम राजा । कम्, उदयमभ्युदय । किंविशिष्ट, भोगित्वाद्यन्तशान्तिप्रभुपद भोगित्वमुत्तमभोगभूमिजत्वमादावन्ते च शान्तिप्रभो शान्तिनाथतीर्थङ्करस्य पद यस्य त । कस्माद्,–अन्नप्रदानात् विधिवदाहारवितरणात् । क, संयते संयमभाजि आदित्यगत्यारिञ्जयसञ्ज्ञचारणर्षियुगले । बीजत्वमात्रविवक्षाऽत्र । तथाविधाभ्युदयस्योत्तरपुण्यविशेषोदयसम्पाद्यत्वात् । तथा प्राप । काऽसौ धनपतितनया वृषभसेनाभिधाना पूर्वभवे राज्ञो देवकुलस्य सम्मार्जिका । का प्राप सर्वौषधर्द्धि सर्वैषा ज्वरातिसारादिव्याधीनामौषध चिकित्सित तस्य ऋद्धिरव्याहतासिद्धिस्ता । कस्मात् रुग्निषेधात् व्याधिप्रतीकारादौषधादे दोषनिषेधात् । क संयते तपोधने । तथा प्राप । कोऽसौ शूकरो वराह । क, स्वर्ग । किंविशिष्टम् अग्र्य सौधर्मे महर्द्धिकदेवत्वमित्यर्थ । कस्मात् प्रागित्यादि–प्राक्च पूर्वं तच्च तात्कालिक च प्राक्तने, प्राक्ते च ते जन्मनी च प्राक्तज्जन्मनी तयो ऋषेर्वासावने निवासरक्षणे तयो शुभकारण शुभाभिसन्धिपरिणामस्तस्मात् । पूर्वभवे मुनेरावासदानाभिप्रायेण तद्भवे च रक्षणाभिप्रायेणेत्यर्थ । तथा कौण्डेशोऽपि गोविन्दाख्यगोपालचरो ग्रामकूटपुत्र सन् कौण्डेशो नाम मुनिश्च प्राप । कम् आगमाम्भोधिपार द्वादशाङ्गश्रुतसारपर्यन्त । केन पुस्तकस्य अर्चाया पूजाया वितरणस्य च दानस्य विधिना करणेन ॥ ७० ॥

जिनधर्मानुबन्धार्थमसता मुनीनामुत्पादने सतां च गुणातिशयसम्पादने प्रयत्नविधानार्थमाह—

जिनधर्मं जगद्बन्धुमनुबध्दुमपत्यवत् ।
यतीञ्जनयितुं यस्येत्तथोत्कर्षयितुं गुणैः ॥ ७१ ॥

टीका—यस्येत् प्रयतेत । सद्गृही । किं कर्तुं, जनयितुम् अपूर्वोत्पादयितुं । कान् साधून् । किंवत्, अपत्यवत् पुत्रान्यथा । किं कर्तुम्, अनुबन्धु सन्तत्या प्रवर्तयितुं । कं, जिनधर्मं । किंविशिष्टं, जगद्बन्धुं लोकानामुपकारकं । तथा यस्येत् । किं कर्तुम्, उत्कर्षयितुम् उत्कृष्टान् कर्तुं । कान्, वर्तमानान् यतीन् । कैः,–गुणैः श्रुतज्ञानादिभिः । जिनधर्ममित्यादि पूर्ववदत्रापि योज्यम् ॥ ७१ ॥

सम्प्रति पुरपाणां दुष्कर्मगुणत्वाद्गुणातिशयासिद्धेर्दर्शनात्तदुत्पादने निष्फलः प्रयत्न इति गृहिणो मनोभङ्गनिषेधार्थमाह--

श्रेयो यत्नवतोऽस्त्येव कलिदोषाद्गुणद्युतौ ।
असिद्धावपि तत्सिद्धौ स्वपरानुग्रहो महान् ॥ ७२ ॥

टीका--अस्त्येव नियमेन भवति । किं तत्, श्रेयः पुण्यं । कस्य, यत्नवतः प्रयतमानस्य गृहस्थस्य । कस्मिन्विषये, गुणद्युतौ गुणातिशयशालिनां विषये । कस्यां सत्याम् असिद्धावपि आवृत्त्या गुणद्युतावनिष्पत्तावपि । कस्मात्, कले पञ्चमकालस्य पापकर्मणो वा दोषादपराधात् प्रातिलोम्यादित्यर्थः । तत्सिद्धौ महालाभमाह । भवति । कोऽसौ, स्वपरानुग्रहः स्वस्य वैय्यावृत्यकरस्य परस्य च सार्धर्मिकस्य सामान्यजनस्य च अनुग्रह उपकारः । किंविशिष्टो, महान् विपुलः । कस्यां सत्यां, तत्सिद्धौ तेषां गुणद्युता निष्पत्तौ । कस्मात्, कलिदोषाद्दुष्कर्मप्रतिघातात् दैवदुर्योगादित्यर्थः ॥ ७२ ॥

महाव्रतमणुव्रतं वा बिभ्रत्यः स्त्रियोऽपि धर्मपात्रतयाऽनुग्राह्या इति समर्थयितुमाह—

आर्यिकाः श्राविकाश्चापि सत्कुर्याद्गुणभूषणाः ।
चतुर्विधेऽपि सङ्घे यत्फलत्युप्तमनल्पशः ॥ ७३ ॥

टीका—सत्कुर्याद्यथोक्तविनयप्रतिपत्त्यादिना आवर्जयेत् सद्गृही । काः, आर्यिका उपचरितमहाव्रतधरा स्त्री, न केवलं ताः श्राविकाश्च यथाशक्तिमूलोत्तरगुणभृतः तदुपासिकाश्च । अपिशब्दाद्यत्र केवलं व्रतिन्योऽव्रतिनीरपि सन्मानयेदित्यर्थः । किंविशिष्टाः, गुणभूषणा गुणाः श्रुततपःशीलादयो भूषणान्यलङ्करणानि यासां ताः । यद्यस्मात् । फलति इष्टं सम्पादयति । किं तत्, उप्तं

विधिवत्प्रयुक्त भक्तपरस्यादि । क्व, सङ्घे गुणसंघाते प्राणिगणे । किंविशिष्टे, चतुर्विधे यत्यार्यिकाश्रावकश्राविकाप्रकारे । न केवलमर्हच्चैत्यचैत्यालयश्रुतेषु विधिवत्प्रयुक्तमात्मीय धनमल्पश प्रभूत भूत्वा फलति किं तर्हि, सङ्घेऽपीत्यपिशब्दार्थ । एतेन सप्त गृहिणो धनव्ययस्थानानीत्युपदिष्ट वेदितव्यम् ॥ ७३ ॥

एव धर्मपात्रानुग्रह गृहस्थस्यावश्यकार्यतयोपदिश्य सम्प्रति कार्यपात्रानुग्रहविध्युपदेशार्थमाह—

धर्मार्थकामसध्रीचो यथौचित्यमुपाचरन् ।
सुधीस्त्रिवर्गसम्पत्त्या प्रेत्य चेह च मोदते ॥ ७४ ॥

टीका—मोदते प्रह्लादते । कोऽसौ सुधी सद्बुद्धि । कया, त्रिवर्गसम्पत्त्या धर्मार्थकामसम्पदा । क्व प्रेत्य जन्मान्तरे । इह अस्मिञ्जन्मनि । द्वौ च शब्दौ जन्मद्वयेऽपि तुल्यकक्षता सूचयत । किं कुर्वन्—उपाचरन् उपकुर्वन् ऋणिकमन्यान् कुर्वन् । कान्, धर्मार्थकामसध्रीच त्रिवर्गसहकारिण पुरुषान् । कथ यथौचित्य यद्यद्यस्य यस्य योग्य दानमानादिक तत्तत्तस्य तस्य कुर्वन्नित्यर्थ ॥ ७४ ॥

एव समदत्ति पात्रदत्ति च प्रबन्धेनाभिधायेदानीं दयादत्ति विधेयतमत्वेनोपदिशन्नाह—

सर्वेषां देहिनां दुःखाद्बिभ्यतामभयप्रदः ।
दयार्द्रो दातृधौरेयो निर्भीः सौरूप्यमश्नुते ॥ ७५ ॥

टीका—अश्नुते प्राप्नोति । कोऽसौ, अभयप्रद[1] प्राणादिभयापसारक ।

---

१ तेनाधीत श्रुत सर्व तेन तप्त पर तप ।
तेन कृत्स्न कृत दान य स्यादभयदानवान् ॥
धर्मार्थकाममोक्षाणा जीवित मूलमिष्यते ।
तद्रक्षता न किं दत्त हरता तन्न किं हृतम् ॥
दानमन्यद्भवेन्मा वा नरश्चेदभयप्रद ।
सर्वेषामेव दानाना यतस्तद्दानमुत्तमम् ॥
यो भूतेष्वभय दद्यात् भूतेभ्यस्तस्य नो भयम् ।
यादृग्वितायते दान तादृगास्वाद्यते फलम् ॥
सौरूप्यमभयादाहुराहाराद्भोगवान्भवेत् ।
आरोग्यमौषधाज्ज्ञेय श्रुतात्स्यात् श्रुतकेवली ॥

(शेषमग्रपृष्ठे ।)

केषां देहिनां प्राणिनां । किं कुर्वतां, बिभ्यतां त्रस्यतां । कस्मात्, दुःखा
देहमनस्तापात् । कियतां सर्वेषां । किम्, अश्नुते, सौरूप्य रूपातिशयं । उप
क्षणात्स्थैर्यं गाम्भीर्यं तेजस्वित्वमादेयत्वं सौभाग्यं सौम्यत्वं त्यागित्वं भोगित
यशस्वित्वं निरामयत्वं चिरजीवित्वमित्यादिलोकोत्तरगुणग्रामं। किंविशिष्टः मन
निर्भीः सर्वतो भयरहितः । किंविशिष्टोऽसौ, दयार्द्रः करुणामृदुहृदयः । पुन
किंविशिष्टो, दातृधौरेयः अन्नादिदातृणामग्रणी । धर्मार्थकाममोक्षाणां जीवि
तमूलत्वाज्जीवितप्रदः किमभिमतं न ददातीति भावः ॥ ७५ ॥

अथ कर्मधर्म्यमित्यादि प्राक् सूचितं प्रपञ्चयन् श्रितभरणकृपादानपुरस्स
दिवाभोजनमुपदिशन्नौषधादीनां रात्रावप्यप्रत्याख्येयतामाख्याति--

भृत्वाऽऽश्रितानवृत्त्याऽऽर्तान्कृपयाऽनाश्रितानपि ।
भुञ्जीताह्यम्बुभैषज्य-ताम्बूलैलादि निश्यपि ॥ ७६ ॥

टीका--भुञ्जीत ओदनादिकमुपयुञ्जीत गृही । क, अह्नि दिने । किं
कृत्वा, भृत्वा पोषयित्वा । कान्, आश्रितान् अनन्यस्वामिकान् मानुषान्
तिरश्चश्च । किंविशिष्टान्, अवृत्त्या जीवनाभावेनार्तान् अनवस्थितचित्तांस्तान्,
न केवलमाश्रितानाश्रितानपि भृत्वा । कया कृपया करुणया, न केवल
तथा कृत्वा दिवा भक्तादिकं भुञ्जीत । निश्यपि रात्रावपि भुञ्जीत । किं तत्
अम्ब्वादि अम्बु जलं, भैषज्यमौषधं ताम्बूलं क्रमुकं, एला प्रसिद्धा । आदिश
ब्देन जातीफलकर्पूरादिमुखवासनद्रव्यपरिग्रहः ॥ ७६ ॥

मनोभूरिव कान्ताङ्गः सुवर्णाद्रिरिव स्थिरः ।
सरस्वानिव गम्भीरो विवस्वानिव भासुरः ॥
आदेयः सुभगः सौम्यस्त्यागी भोगी यशोनिधिः ।
भवत्यभयदानेन चिरजीवी निरामयः ॥

---

१ ताम्बूलमौषधं तोयं मुक्त्वाऽऽहारादिकां क्रियाम् ।

सेव्यानामप्यर्थानां सेवायामसम्भवत्यां कालपरिस्थित्या प्रत्याख्येयता मुपदिश्य तत्प्रत्याख्यान फलवत्तया समर्थयते—

यावन्न सेव्या विषयास्तावत्तानाप्रवृत्तितः ।
व्रतयेत्सव्रतो दैवान्मृतोऽमुत्र सुखायते ॥ ७७ ॥

टीका—आप्रवृत्तितो व्रतयेत् आप्रवृत्तेर्निवृत्तिर्मेऽस्य ताम्बूलादेरिति नियमयेद्गृही । कान्, तान् ताम्बूलकामिन्यादिविषयान् । कथ, तावत् तावन्त काल । यावत्कि, यावन्त काल । न सेव्या न सवितु सम्भाव्या । के ते, विषया । एव कृते कि फल स्यादित्याह-सुखायते सुखमनुभवति । कोऽसौ, स तथा कृतनियम । क्व, अमुत्र परलोके । किंविशिष्टो, मृत । कस्मात्, दैवात् कर्मवशात् । किंविशिष्ट सन्, सव्रतस्तथाव्रतभावित ॥७७॥

तपश्चर्यं च शक्तित इत्युक्त तद्विशेषविधिमभिधत्ते—

पञ्चम्यादिविधिं कृत्वा शिवान्ताभ्युदयप्रदम् ।
उद्द्योतयेद्यथासम्पन्निमित्ते प्रोत्सहेन्मन ॥ ७८ ॥

टीका—उदद्योतयेत् उद्यापयेत् । क, पञ्चम्यादिविधिं पञ्चम्या पुष्पाञ्जलिमुक्तावलिरत्नत्रयादिविधान । किंविशिष्ट, शिवान्ताभ्युदयप्रद निःश्रेयसावसानशक्रचक्रधरादिपदसम्पादक । किं कृत्वा यथाम्नाय परिसमाप्य । कथम् उद्द्योतयेत्, यथासम्पद्यथाविभव । ननु नित्यानुष्ठाने सत्यपि किमिदमनुष्ठीयते इत्याह-प्रोत्सहेत् नित्यानुष्ठानापेक्षया प्रकर्षेणोत्साह गच्छेत् मनश्चित्त । क, निमित्ते नैमित्तिकानुष्ठाने ॥ ७८ ॥

अथ व्रतग्रहणरक्षणच्छेदोपस्थापनविधीनुपदिशति—

समीक्ष्य व्रतमादेयमात्त पाल्य प्रयत्नतः ।
छिन्न दर्पात्प्रमादाद्वा प्रत्यवस्थाप्यमञ्जसा ॥ ७९ ॥

टीका—आदेय ग्राह्य श्रेयोऽर्थिना । किं तत्, व्रत । किं कृत्वा, समीक्ष्य आत्मानं देशकालस्थानसहायादींश्च सम्यगालोच्य । तथा पाल्य रक्षणीय व्रत । किंविशिष्टम्, आत्त तथा गृहीत । कस्मात्, प्रयत्नन प्रकृष्टयत्नतया ।

टीका—त्यजेत् परिहरेत्। कोऽसौ, सुधीः शास्त्रबलेन हिंसायाः फलमेनदिति निश्चितमतिः। कां, हिंसां प्राणातिपातं। किंविशिष्टां, साङ्कल्पिकीं अमुं जन्तुमासायार्थित्वेन हन्मीति सङ्कल्पपूर्विकां। आरम्भजा तु हिंसाऽशक्यप्रत्याख्यानेति तत्र यतनामेव कुर्यादिति भावः। क सति, आरम्भेऽपि कृष्यादिकर्मण्यपि प्रवर्तमानः। कथं, सदा नित्यं। हि यस्मात् भवति। कोऽसौ, धीवरो मारयिता। किंविशिष्ट, उच्चः पापः उत्कृष्टपातकी। किं कुर्वन्नपि, बहून्मत्स्यान् हनिष्यामीत्यभिध्यानेन प्रवृत्तोऽमारयन्नपि। कस्मात्, कर्षकात् कर्षणप्रवृत्तात्। कि कुर्वतो, घ्नतोऽपि देवब्राह्मणकुटुम्बार्थं धान्यमुत्पादयिष्यामीति अभिध्यानविशेषेण प्रवृत्ताद्बहूनपि मारयत ॥ ८२ ॥

परविधेयतया व्यवस्थाप्यमानं हिंस्रादिप्राणिनां वधं प्रतिविधातुमाह—

हिंस्रदुःखिसुखिप्राणि-घातं कुर्यान्न जातुचित्।
अतिप्रसङ्गश्वभ्रार्ति-सुखोच्छेदसमीक्षणात् ॥ ८३ ॥

टीका-न कुर्यात् श्रेयोऽर्थी। क, हिंस्रदु खिसुखिप्राणिघातं। कथं, जातुचित् कदाचिदपि। कुतः, अतीत्यादि-हिंस्रा व्याघ्रादयः। अत्र केचिदाहुः, हिंस्रजीवा हन्तव्या। हिंस्रे ह्येकस्मिन्हते भूयसां रक्षा कृता भवति। ततश्च धर्माधिगम पापोपरमश्च स्यात्। तदयुक्तमतिप्रसङ्गात्। सर्वेषां प्राणिनां हिंस्रतया हन्तव्यतानुपङ्गात्। तथा च लाभमिच्छता तथावादिना मूलोच्छेदः स्यात्। न च बहुरक्षणाभिप्रायेणापि हिंस्रहिंसनो धर्मे पापोच्छेदो वा युज्येत। दयामूलत्वाद्धर्मस्य। यच्च संसारमोचक प्रचक्षते दुःखिनो जीवा हन्तव्यास्तेषां विनाशे दुःखविनाशसम्भवादिति, तदप्ययुक्तं। तेषां स्वल्पदुःखानां निहतानां नरकेऽनन्तदुःखे सयोजनाया दुर्निवारत्वात्। अन्ये त्वाहुः—सुखिनो हन्तव्याः यतः संसारे सुखं दुर्लभं। सुखिनश्च हताः सुखिन एव भवन्तीति तदप्यसङ्गतं। सुखिनां हन्यमानानां दुःखावेशेन सुखोच्छेदस्यावश्यम्भावात्। दुःखमृत्युना च दुर्ध्यानानुसन्धानाद्दुरन्तदुर्गतिदुःखावर्तनिर्वर्तनात्। तदलमतिप्रसङ्गेन। स्वगता परगता वा यथाकथञ्चित्क्रियमाणा हिंसा न धर्माय स्यात्। कि तर्हि, पातकमसम्भवायैवेति प्रतिपद्यमानैर्यथाशक्ति तत्परित्यागे धर्मार्थिभिः सन्ततं यतितव्यमिति आप्तसूक्तोपनिषत्॥ ८३॥

अथ पाक्षिकस्य दर्शविशुद्ध्यर्थं लोकानुवृत्त्यर्थश्च क्रियां कृत्यतयोपदिशति-

स्थूललक्षः क्रियास्तीर्थ-यात्राद्या दृग्विशुद्धये ।
कुर्यात्तथेष्टभोज्याद्याः प्रीत्या लोकानुवृत्तये ॥ ८४ ॥

टीका--कुर्यात् । कोऽसौ, स्थूललक्ष स्थूलं व्यवहार लक्षयत्यालोचयतीति स्थूललक्षो व्यवहारप्रधानो बहुप्रदश्च गृही। का , क्रिया । किंविशिष्टा , तीर्थयात्राद्या तीर्थान्यूर्जयन्तादीनि पुण्यपुरुषाध्युषितस्थानानि तेषु यात्रा गमन, आदशब्देन रथयात्राक्षपकयात्राप्रतिसिद्धिकागमनादय , तीर्थयात्रा आद्या यासु ता । किमर्थं, दृग्विशुद्धये सम्यक्त्वनिर्मलीकरणार्थं । तथा स्थूललक्ष क्रिया कुर्यात् । किंविशिष्टा , इष्टभोज्याद्या इष्टा सधर्माण स्वजना मित्रादयो भोज्यन्ते स्वगृहे भोजन कार्यन्ते यस्या सा इष्टभोज्या क्रिया, सा आद्या आसु अतिथिपूजनभूतबल्यादिक्रियासु ता । कया, प्रीत्या हर्षेण नोद्वेगेन । किमर्थं, लोकानुवृत्तये लोकचिन्तावर्जनार्थम् ॥ ८४ ॥

श्रेयोऽर्थिन कीर्तेरप्यर्जनीयत्वमाह--

अकीर्त्या तप्यते चेतश्चेतस्तापोऽशुभास्रव. ।
तत्तत्प्रसादाय सदा श्रेयसे कीर्तिमर्जयेत् ॥८५॥

टीका--तप्यते सक्लिश्यते । किं तत्, चेतश्चित्त । कया, अकीर्त्या अयशसा । भवति च । कोऽसौ, चेतस्तापो मनःकालुष्य । किंविशिष्टो,ऽशुभास्रव पापहेतु । यत एव तत्तस्मात्कारणात् । अर्जयेत् उपार्जयेत् । गृही । कां, कीर्ति । कथं, सदा । कस्मै, तत्प्रसादाय चेत प्रसत्त्यर्थम् । कस्मै तत्प्रसादं , श्रेयसे । अथवा श्रेयसे। पुण्यकारणाय तत्प्रसादायेति व्याख्येयम् ॥८५॥

कीर्त्युपार्जनोपायमाह--

परासाधारणान्गुण्य-प्रगण्यानघमर्पणान् ।
गुणान् विस्तारयेन्नित्यं कीर्तिविस्तारणोद्यतः ॥ ८६ ॥


टीका -विस्तारयेद्विपुलीकुर्यात् । कोऽसौ, कीर्तिविस्तारणोद्यतो यश प्रसारणतत्पर । कान्, गुणान् दानसत्यशौचशीलादीन् । किंविशिष्टान्, परासाधारणान् अनन्यसदृशान् । पुन किंविशिष्टान्, गुण्यप्रगण्यान् गुणवद्भि प्रकर्षेण आनर्णीयान् । पुनरपि किंविशिष्टान्, अघमर्पणान् पापविध्वसिन ॥ ८६ ॥

एवंविधाचारपरस्य श्रावकस्योत्तरोत्तरभूमिकाश्रयणेन मकरन्ध्रेरितिरद्वारेरो हणविधिमुपदिशति—

सैषः प्राथमकल्पिको जिनवचोऽभ्यासामृतेनासकृ-
न्निर्वेदद्रुममावपन् शमरसोद्गारोद्धुरं बिभ्रति ।
पाकं कालिकमुत्तरोत्तरमहान्त्येतस्य चर्याफला-
न्यास्वाद्योद्यतशक्तिरुद्धचरितप्रासादमारोहतु ॥ ८७ ॥

टीका—आरोहतु चटतु। कोऽसौ, सैष स एवेत्यर्थे । पाद्रपूरणऽत्र सेर्लोप । कोऽसौ, प्राथमकल्पिक प्रारब्धदेशसंयम । कमारोहतु, उद्धचरितप्रासादं सल्लेखनान्तयतिधर्मसौधं । किंविशिष्ट सन्, उद्यतशक्तिरद्भुतसामर्थ्य । किं कृत्वा, आस्वाद्यानुभूय । कानि, चर्याफलानि दर्शनिकादिप्रतिमाफलानि । कस्य, एतस्य निर्वेदद्रुमस्य । किंविशिष्टानि, उत्तरोत्तरमहान्ति यथोत्तर पृथूनि । किं कुर्वन्ति, बिभ्रति धारयन्ति । किं, पाकमास्मीयपरिणति परिपाकं च । किंविशिष्ट, कालिक कालकृत । पुन किंविशिष्ट, शमरसोद्गारोद्धुर शम प्रशमसुख स एव रसो रसनेन्द्रियग्राह्यो गुणस्तस्योद्गारोऽभिव्यक्तिस्तेनोद्धुर-मुत्कटं स एव वा उद्धुरो यत्र । किं कुर्वन्, आवपन् सिञ्चन् पोषयन् । क, निर्वेदद्रुम संसारशरीरभोगवैराग्यवृक्ष । केन, जिनवचोऽभ्यासामृतेन जिनागमभावनापीयूषेण । कथम्, असकृदभीक्ष्णमिति भद्रम् ॥ ८७ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचन्द्रिकासंज्ञायामादित एकादश
प्रक्रमश्च द्वितीयोऽध्याय समाप्त ॥२॥



तृतीयोऽध्यायः ।

नैष्ठिकलक्षणमाह—

देशयमघ्नकषायक्षयोपशमतारतम्यवशतः स्यात् ।
दर्शनिकाद्येकादशदशावशो नैष्ठिकः सुलेश्यतरः ॥ १ ॥

टीका–स्याद्भवेत् । कोऽसौ, नैष्ठिक. श्रावकः । किंविशिष्टो, दर्शनिकाद्येकादशदशावशः, दर्शनं निर्मलमद्यादिविरत्याहितातिशय सम्यक्त्वमस्यास्तीति 'अतिशायने ठवत' इति ठ· । एवं व्रतिकादिरयो व्युत्पाद्याः । दर्शनिक आदिर्यासां व्रतिकादीना ता दर्शनिकादय एकादशदशाः श्रावकसंयमस्थानानि, तासां वश पारतंत्र्य यस्य स घटमानदेशसंयम इत्यर्थः । कस्मात्, देशेत्यादि–देशयमघ्ना अप्रत्याख्यानावरणाख्या. कषाया क्रोधादयस्तेषां क्षयेनोदयाभावेन प्रत्याख्यानावरणकषायोदयाविशिष्टेन युक्त उपशम सदवस्था तत्क्षयोपशमस्तस्य तारतम्यं यथोत्तरमुत्कर्षस्तद्वशतस्तत्पारतन्त्र्यात् । पुन किंविशिष्ट स्यात्, सुलेश्यतर । लिपति स्वीकरोति पुण्यपापे स्वयं जीवो यया सा लेश्या, अथवा लिशत्यल्पीकरोत्यात्मानामिति लेश्या कषायोदय-

---

१ लिम्पत्यात्मीकरोत्यात्मा पुण्यपापे यया स्वयम् ।
सा लेश्येत्युच्यते सद्भिर्द्विविधा द्रव्यभावत ॥
प्रवृत्तिर्योगिकी लेश्या कषायोदयरञ्जिता ।
भावतो द्रव्यतो देहच्छवि षोढोभयी मता ॥
कृष्णा नीलाऽथ कापोती पीता पद्मा सिता स्मृता ।
लेश्या षड्भिः सदा ताभिर्गृह्यते कर्म जन्मिभि ॥
योगाविरतिमिथ्यात्वकषायजनितोऽङ्गिनाम ।
संस्कारो भावलेश्याऽस्ति कल्माषास्रवकारणम ॥
कापोती कथिता तीव्रो नीलो तीव्रतरो जिनै ।
कृष्णा तीव्रतमो लेश्या परिणाम. शरीरिणाम् ॥
पीता निवेदिता मन्द पद्मा मन्दतरो बुधै ।
शुक्ला मन्दतमस्तासां वृद्धि षट्स्थानयायिनी ॥

रञ्जिता योगप्रवृत्ति सैव भावत, द्रव्यतस्तु शरीरच्छविर्लेश्या । सा च द्विविधाऽपि कृष्णादिभेदेन षोढा, कृष्णा नीला कापोती पीता पद्मा शुक्ला

निर्मूलस्कन्धयोश्छेत्तु भावा शाखोपशाखयो ।
उच्चयं पतितादाने भावलेश्या फलार्थिनम् ॥
षट्पद चतुर्षु विज्ञेयास्तिस्त्रोऽन्त्य शुभास्त्रिषु ।
शुक्ला गुणेषु षट्स्वेका लेश्या निलश्यमन्तिमम् ॥
रागद्वेषमहाविष्टो दुर्मोहो दुष्टमानस ।
क्रोधमानादिभिर्तीव्रैर्ग्रस्तोऽनन्तानुबन्धिभि ॥
निर्दयो निरनुक्रोशो मद्यमांसादिलम्पट ।
सर्वदा कदनासक्त कृष्णलेश्यान्वितो जन ॥
क्रोधी मानी मायी लोभी । रागी द्वेषी मोही शोकी ।
हिंस्र क्रूरश्चण्डश्चौरो । मूर्ख स्तब्ध स्पर्धाकारी ॥
निद्रालु कामुको मन्द कृत्याकृत्याविचारक ।
महामूर्च्छो महारम्भो नीललेश्यो निगद्यते ॥
शोकभीमत्सरासूयापरनिन्दापरायण ।
प्रशंसति सदाऽऽत्मान स्तूयमान. प्रहृष्यति ॥
वृद्धिहानी न जानाति न मूढ स्वपरान्तरम् ।
अहङ्कारग्रहग्रस्त समस्तो कुरुते क्रियाम् ॥
श्लाघितो नितरां दत्ते रणे मर्तुमपीहते ।
परकीययशोध्वंसी युक्त कापोतलेश्यया ॥
समदृष्टिरविद्वेषी हिताहितविवेचक ।
वदान्य सदयो दक्ष पीतलेश्यो महामना ॥
शुचिर्दानरतो भद्रो विनीतात्मा प्रियवद ।
साधुपूजोद्यत साधु पद्मलेश्यो नयक्रिय ॥
निर्निदानोऽनहङ्कार पक्षपातोज्झितोऽशठ ।
रागद्वेषपराचीन शुक्ललेश्य स्थिराशय ॥
तेज पद्मा तथा शुक्ला लेश्यास्तिस्र प्रशस्तिका:
संवेगमुत्तमं प्राप्त क्रमेण प्रतिपद्यते ॥

चति। मद्रास्ता लेश्या यस्यासौ सुलेश्य प्रकृष्ट पाक्षिकापेक्षया सुलेश्य। सुलेश्यतर अथवा सर्वेऽपि यथोत्तर विशुद्धतरलेश्या स्यु ॥ १॥

दर्शनिकादीनुद्दिश्यतेषा गृहित्वब्रह्मचारित्वभिक्षुकत्वानि जघन्यमध्यमोत्तमत्वाध विभक्तुमार्यद्वयमाह—

दर्शनिकोऽथ व्रतिकः सामयिकी प्रोषधोपवासी च।
सचित्तदिवामैथुन-विरतो गृहिणोऽणुयमिषु हीनाः षट्॥२॥
अब्रह्मारम्भपरि-ग्रहविरता वर्णिनस्त्रयो मध्याः।
अनुमतिविरतोद्दिष्टवि रतावुभौ भिक्षुकौ प्रकृष्टौ च॥३॥

युग्म।

टीका—अथशब्दोऽत्रानन्तर्यार्थ प्रत्येक योज्य। भवन्ति। के, श्रावका। कति, षट्। किंविशिष्टा भवन्ति, हीना जघन्या। केषु मध्ये, अणुयमिषु। श्रावकेषु न केवल हीना गृहिणश्च। क क, दर्शनिकोऽथानन्तर व्रतिकस्तत सामयिकी तदनु प्रोषधोपवासी तदनन्तर सचित्तविरतोऽपि दिवा मैथुनविरतश्च। भवन्ति। के ते, त्रय। किंविशिष्टा, मध्या अणुयमिषु मध्ये मध्यमा। पुन किंविशिष्टा, वर्णिनो ब्रह्मचारिण। कति त्रय। किमाख्या, अब्रह्मारम्भपरिग्रहविरता अब्रह्मविरत, आरम्भविरत परिग्रहविरतश्च। तदनन्तर भवत। कौ, उभौ। किंविशिष्टौ, प्रकृष्टौ अणुयमिषु मध्ये उत्कृष्टौ। पुन किंविशिष्टौ, भिक्षुकौ। अल्पा भिक्षा यत्यपेक्षया ययोस्तौ। किमाख्यौ, अनुमतिविरतोद्दिष्टविरतौ ॥ २।३ ॥

नैष्ठिकोऽपि यादृश सन् पाक्षिकव्यपदेशमेव लभते तादृश दर्शयति—

दुर्लेश्याभिभवाज्जातु विषये क्वचिदुत्सुकः।
स्खलन्नपि क्वापि गुणे पाक्षिकः स्यान्न नैष्ठिकः॥४॥

---

१ षडत्र गृहिणो ज्ञेयास्त्रय स्युर्ब्रह्मचारिण।
भिक्षुकौ द्वौ तु निर्दिष्टौ तत स्यात्सर्वतो यति॥
आद्यास्तु षड् जघन्या स्युर्मध्यमास्तदनु त्रय।
शेषौ द्वावुत्तमावुक्तौ जैनेषु जिनशासने॥

टीका– स्याद्भवेत् गृही । किंविशिष्ट, पाक्षिको न नैष्ठिक । किंविशिष्ट सन्, उत्सुक सोत्कण्ठाभिलाप । क, विषये इन्द्रियार्थ । किंविशिष्टे, क्वचित् कामिन्यादीनामन्यतमे न सर्वत्र । कदा, जातु कदाचिन्न सर्वदा । कस्मात्, दुर्लेश्याभिभवात् दुर्लेश्यया कृष्णनीलकापोतीनाम-न्यतमया अभिभव कुत श्चिन्निमित्ताचेतनशनेस्तादृकसंस्कारोद्बोधस्तस्माद्धेतो न वाऽऽश्रित्य । न केवल तथा भवन् । स्खलन्नपि अतिचार गच्छन्न अनभ्यस्तपूर्वत्वात्संयमस्य दुर्धर-त्वाद्वा मनम । क, गुणे । किंविशिष्टे, क्वापि मद्यविरत्यादीनामन्यतमे न सर्वत्र ॥ ४ ॥

दर्शनिकादीनामा स्वस्वानुष्ठानदार्ढ्याद्व्यपदेश एव दर्शनिकादिव्यपदेश स्याद्भावतस्तु पूर्वपूर्वोऽसाविति बोधयन्नाह—

तद्वद्दर्शनिकादिश्च स्थैर्यं स्वे स्वे व्रतेऽव्रजन् ।
लभते पूर्वमेवार्थाद्व्यपदेशं न तूत्तरम् ॥ ५ ॥

टीका लभते । कोऽसौ, दर्शनिकादिश्च दर्शनिकव्रतिकादिरपि श्रावकवि-कल्प । क, व्यपदेश सञ्ज्ञा । किंविशिष्ट,पूर्वमेव प्राक्तनमेव । न तु न पुन । उत्तर परापेक्षया पर । कस्मात्, अर्थात् परमार्थतो व्यवहारादुत्तरमपि लभते । किंवत्, तद्वत् नैष्ठिकमात्रवत् । किं कुर्वन्, अव्रजन् अगच्छन् । किं तत्, स्थैर्य स्थिरत्व क्वचित्कदाचित्कथंचिदचलनम् । क, स्वे स्वे व्रते निरतिचाराष्टमूल गुणादिलक्षणे ॥ ५ ॥

एतदेव समर्थयितुमाह—

प्रारब्धो घटमानो निष्पन्नश्चार्हतस्य देशयमः ।
योग इव भवति यस्य त्रिधा स योगीव देशयमी ॥६॥

टीका–भवति । कोऽसौ, स देशयमी श्रावक । कतिधा, त्रिधा त्रिप्रकार । क इव, योगीव यथा प्रारब्धयोगो घटमानयोगो निष्पन्नयोगश्चेति नैगमादिनयापेक्षया त्रिविधो योगी तथा प्रारब्धदेशसंयमो घटमानदे-शसंयमो निष्पन्नदेशसंयमश्चेति त्रिविध श्रावकोऽपि स्यादित्यर्थ । यस्य किं, यस्यार्हतस्य जिनैकशरणस्य सतो भवति । कोऽसौ, देशयमो देशसंयम । किंविशिष्ट , प्रारब्ध उपक्रान्त , तथा घटमान सम्पद्यमान , तथा निष्पन्न पर्यन्त प्राप्त , क इव, योग इव समाधिर्यथा ॥ ६ ॥

एवं स्थूलशुद्धिं विधायाधुना दर्शनिकस्वरूपनिरूपणार्थं श्लोकद्वयमाह—

पाक्षिकाचारसंस्कार दृढीकृतविशुद्धदृक् ।
भवाङ्गभोगनिर्विण्णः परमेष्ठिपदैकधीः ॥ ७ ॥
निर्मूलयन्मलान्मूल गुणेष्वग्रगुणोत्सुकः ।
न्याय्यां वृत्तिं तनुस्थित्यै तन्वन्दर्शनिको मतः ॥ ८ ॥

युग्म ।

टीका—मत एवम्भूतनयादिष्ट सूरिभि । एतेन नैगमनयादेशात्पाक्षिकस्यापि दर्शनिकत्वमनुज्ञात भवति । ततो न '[1]श्रावकपदानि देवैरेकादश देशितानी'त्यनेन विरोध , पाक्षिकस्य द्रव्यतो दर्शनिकत्वात् । कोऽसौ, मत दर्शनिक । किलक्षण , पाक्षिकाचारस्य पूर्वाध्याये प्रपञ्चेनोक्तस्य सस्कार उत्कर्षस्तेन दृढीकृता निश्चलत्व नीता विशुद्धा निर्दोषा दृक् दर्शन येन स पाक्षिकाचारसंस्कारदृढीकृतविशुद्धदृक् तथा भवाङ्गभोगनिर्विण्ण भवाङ्ग भोगा ससारशरीरष्टविषया अथवा भवाङ्ग ससारकारण यो भोगो गृद्धिपूर्वक कामिन्यादिविषयसेवन तता निर्विण्णो विरक्त प्रत्याख्यानावरणाख्य चारित्रमोहकर्मविपाकवशात् कामिन्यादिविषयान् भजन्नपि तन्नान्तरसेवानिबन्ध इत्यर्थ , तथा परमेष्ठिपदैकधी परमेष्ठिपदेषु अर्हदादिपञ्चगुरुचरणेषु एका धीरन्तर्दृष्टिर्यस्य स तथोक्त । आपदाकुलितोऽपि दर्शनिकस्तन्निवृत्त्यर्थं शासनदेवतादीन् कदाचिदपि न भजते । पाक्षिकस्तु भजत्यपीत्येवमर्थमेकग्रहणम् । तथा निर्मूलयन् मूलादपिनिरस्यन् । कान्, मलान् अतिचारान् । केषु मूलगुणेषु तथा अग्रगुणोत्सुक अग्रगुणे प्रतिकपदे उत्सुकोऽनुष्ठानुमुत्कण्ठित । तथा तन्वन्ननुबध्नन् । का, वृत्ति कृष्यादिवार्तां । किंविशिष्टां न्याय्यां

---

१ आदावेत स्फुटमिह गुणा निर्मला धारणीया
पापध्वंसि व्रतनयमल कुर्वता श्रावकीयम् ।
कर्तुं शक्य स्थिरगुरुभर मन्दिर गर्तपूर
न स्थेयोभिर्दृढतममृते निर्मित ग्रावजालै ॥

२ कृषि वणिज्या गोरक्ष्यमुपायैर्गुणिन नृपम् ।
लोकद्वयाविरुद्धा च धनार्थी सश्रयेत् क्रियाम् ॥

स्ववर्णकुलव्रतानुरूपा । किमर्थं तनुस्थित्यै शरीरवर्तनार्थं न विषयोपसेवनार्थं एवंविधलक्षणो दर्शनिको नाम श्रावको मन्यते ॥ ७।८ ॥

अथ मद्यादिव्रतद्योतनार्थं तद्विक्रयादिप्रतिषेधार्थमाह—

मद्यादिविक्रयादीनि नार्यः कुर्यान्न कारयेत् ।
न चानुमन्येत मनो वाक्कायैस्तद्व्रतद्युते ॥ ९ ॥

टीका—न कुर्यात् । कोऽसौ, आर्यो दर्शनिक । कानि, मद्यादिविक्रयादीनि मद्यादीनां मद्यमांसमधुनवनीतप्रभृतीनां विक्रयादीनि आदिशब्दात्सन्धानकमस्कारोपदेशाद्युपादान । तथा न कारयेत् । न चानुमन्येत नाप्यनुमतिं दद्यात् । कै, मनोवाक्कायैः मनसा वाचा कायेन च । किमर्थं, तद्व्रतद्युतये मद्यविरत्याद्यष्टमूलगुणनिर्मलीकरणार्थम् ॥ ९ ॥

यच्छीलनान्मद्यादिव्रतक्षतिः स्यात्तदुपदेशार्थमाह—

भजन्मद्यादिभाजस्स्त्रीः तादृशैःसह संसृजन् ।
भुक्त्याऽऽदौ चैति साकीर्तिं मद्यादिविरतिक्षतिम् ॥१०॥

टीका—एति गच्छति । कोऽसौ, मर्ता पुमान् । का मद्यादिविरतिक्षतिम् अष्टमूलगुणहानिं । किंविशिष्टो, साकीर्तिं वाच्यतासहिता । किं कुर्वन्, भजन् सेवमान । का स्त्रीः । किंविशिष्टा मद्यादिभाजो मद्यमांसादिसेविनीः । न केवलं ता भजन् संसृजंश्च संसर्गं कुर्वन् । कै सह तादृशैर्मद्यादिभाग्भि पुम्भि । क भुक्त्यादौ भाजनभाजनासनादौ ॥ १० ॥

एवं सामान्यतो मूलव्रतातिचारनिवृत्तिमभिधाय मद्यादिव्रतातिचारानिवृत्त्यर्थमाह—

सन्धानकं त्यजेत्सर्वं दधि तक्रं द्व्यहोषितम् ।
काञ्जिकं पुष्पितमपि मद्यव्रतमलोऽन्यथा ॥ ११ ॥

टीका—त्यजेत् । कासौ, दर्शनिक । किं तत्, सधानकं । किंविशिष्ट, सर्व । एतेन काञ्जिकवटकादेरपि हेयत्व दर्शयति । उक्तं च—

१ मद्यादिस्वादिगेहेषु पानमन्नं च नाचरेत् ।
तदामत्रादिसम्पर्कं न कुर्वीत कदाचन ॥

एव स्थलशुद्धि विधायाधुना दर्शनिकस्वरूपनिरूपणार्थं श्लोकद्वयमाह—

पाक्षिकाचारसंस्कार दृढीकृतविशुद्धदृक् ।
भवाङ्गभोगनिर्विण्णः परमेष्ठिपदैकधीः ॥ ७ ॥
निर्मूलयन्मलान्मूल गुणेष्वग्रगुणोत्सुकः ।
न्याय्यां वृत्तिं तनुस्थित्यै तन्वन्दर्शनिको मतः ॥ ८ ॥

युग्म ।

टीका—मत एवम्भूतनयादिष्ट सूरिभि । एतेन नैगमनयादेशात्पाक्षिकस्यापि दर्शनिकत्वमनुज्ञात भवति । ततो न 'श्रावकपदानि देवैरेकादश देशितानी'त्यनेन विरोध , पाक्षिकस्य द्रव्यतो दर्शनिकत्वात् । कोऽसौ, मत दर्शनिक । किलक्षण , पाक्षिकाचारस्य पूर्वाध्याये प्रपञ्चेनोक्तस्य सस्कार उत्कर्षस्तेन दृढीकृता निश्चलत्व नीता विशुद्धा निर्दोषा दृक् दर्शन येन स पाक्षिकाचारसस्कारदृढीकृतविशुद्धदृक् तथा भवाङ्गभोगनिर्विण्ण भवाङ्गभोगा ससारशरीरेष्टविषया अथवा भवाङ्ग ससारकारण यो भोगो गृद्धिपूर्वक कामिन्यादिविषयसेवन तता निर्विण्णो विरक्त प्रत्याख्यानावरणाख्यचारित्रमोहकर्मविपाकवशात् कामिन्यादिविषयान् भजन्नपि तत्राकृतमेवानिर्बन्ध इत्यर्थ , तथा परमेष्ठिपदैकधी परमेष्ठिपदेषु अर्हदादिपञ्चगुरुचरणेषु एका धीरन्तर्दृष्टिर्यस्य स तथोक्त । आपदाकुलितोऽपि दर्शनिकस्तन्निवृत्त्यर्थं शासनदेवतादीन् कदाचिदपि न भजते । पाक्षिकस्तु भजत्यपीत्येवमर्थमेकग्रहणम् । तथा निर्मूलयन् मूलादपि निरस्यन् । कान्, मलान् अतिचारान् । केषु मूलगुणेषु तथा अग्रगुणोत्सुक अग्रगुणे प्रतिकपदे उत्सुकोऽनुष्ठातुमुत्कण्ठित । तथा तन्वन्ननुबध्नन् । का, वृत्ति कृष्यादिवार्ता । किंविशिष्टां,न्याय्या

१ आदावेते स्फुटमिह गुणा निर्मला धारणीया
पापध्वंसि व्रतनपमल कुर्वता श्रावकीयम् ।
कर्तुं शक्य स्थिरगुरुभर मन्दिर गर्तपूर
न स्थेयोभिर्दृढतममृते निर्मित ग्रावजालै ॥

२ कृषि वणिज्या गोरक्ष्यमुपायैर्गुणिन नृपम् ।
लोकद्वयाविरुद्धा च धनार्थी सश्रयेत् क्रियाम् ॥

स्ववर्णकुलमतानुरूपा । किमर्थं तनुस्थित्यै शरीरवर्तनार्थं न विषयोपसेवनार्थं एवंविधलक्षणो दर्शनिको नाम श्रावको मन्यते ॥ ७।८ ॥

अथ मद्यादिव्रतद्योतनार्थं तद्विक्रयादिप्रतिपेधार्थमाह—

मद्यादिविक्रयादीनि नार्यः कुर्यान्न कारयेत् ।
न चानुमन्येत मनो-वाक्कायैस्तद्व्रतद्युते ॥ ९ ॥

टीका—न कुर्यात् । कोऽसौ, आर्यो दर्शनिक । कानि, मद्यादिविक्रया दीनि मद्यादीनां मद्यमांसमधुनवनीतप्रभृतीनां विक्रयादीनि आदिशब्दात्सन्धानकमस्कारोपदेशाद्युपादान । तथा न कारयेत् । न चानुमन्येत नाप्यनुमति दद्यात् । कै, मनोवाक्कायै मनसा वाचा कायेन च । किमर्थं, तद्व्रतद्युत मद्यविरत्याद्यष्टमूलगुणनिर्मलीकरणार्थम् ॥ ९ ॥

यच्छीलनान्मद्यादिव्रतक्षति स्यात्तदुपदेशार्थमाह—

भजन्मद्यादिभाजस्स्त्री स्तादृशैःसह संसृजन् ।
भुक्त्याऽऽदौ चैति साकीर्तिं मद्यादिविरतिक्षतिम् ॥ १० ॥

टीका—एति गच्छति । कोऽसौ, व्रती पुमान् । कां मद्यादिविरतिक्षति म् अष्टमूलगुणहानि । किंविशिष्टां, साकीर्तिं वाच्यतासहितां । किं कुर्वन्, भजन् सेवमान । का स्त्री । किंविशिष्टा, मद्यादिभाजो मद्यमांसादिसेविनी । न केवल ता भजन् संसृजंश्च संसर्गं कुर्वन् । कै सह तादृशैर्मद्यादिभाग्भि पुम्भि । क, भुक्त्यादौ भाजनभाजनासनादौ ॥ १० ॥

एव सामान्यतो मूलव्रतातिचारनिवृत्तिमभिधाय मद्यादिव्रतातिचारनिवृत्त्यर्थमाह—

सन्धानकं त्यजेत्सर्वं दधि तक्रं द्व्यहोषितम् ।
काञ्जिकं पुष्पितमपि मद्यव्रतमलोऽन्यथा ॥ ११ ॥

टीका—त्यजेत् । कोऽसौ, दर्शनिक । किं तत्, सन्धानकं । किंविशिष्टं, सर्वं । एतेन काञ्जिकवटकादेरपि हेयत्व दर्शयति । उक्तं च—

---

१ मद्यादिस्वादिगेहेषु पानमन्नं च नाचरेत् ।
तदामत्रादिसम्पर्कं न कुर्वीत कदाचन ॥

जायन्तेऽनन्तशो यत्र प्राणिनो रसकायिकाः ।
सन्धानानि न वल्भ्यन्ते तानि सर्वाणि भक्तिका ॥

तथा त्यजेत् । किं तत्, दधितक्रं दधि च मथितं च । किंविशिष्टं, पुष्पितं व्युषितं अहोरात्रद्वयमतिक्रान्तं । तथा त्यजेत् कांजिकं, धान्याम्लं, सपुष्पमिव जातं । अपिशब्दादद्व्युषितं च । अन्यथा उक्तविपर्यये । भवति । कोऽसौ, मद्यव्रतमलं मद्यविरत्यतिचारः ॥ ११ ॥

मांसविरत्यतिचारानाह—

चर्मस्थमम्भः स्नेहश्च हिंग्वसंहृतचर्म च ।
सर्वं च भोज्यं व्यापन्नं दोषः स्यादामिषव्रते ॥ १२ ॥

टीका—स्यात् भवेत् । किं तत्, चर्मस्थमम्भ प्रमुखमुपयुज्यमानं । किं स्यात्, दोषोऽतिचारः । क्व, आमिषव्रते मांसविरतौ प्रतिपन्नायां । किं किं नदित्याह-अम्भः जलं, स्नेहश्च घृतादिकं दोषः स्यात्। किंविशिष्टं,चर्मस्थं दृत्यादिस्थं जलं कुतुपादिस्थं च घृतादिकमुपयुज्यमानं । एतेन स्वहिकायादिस्थवघ टिकादिस्थचूतफलादीनां चर्मोपनद्धवाल्मीदूरदिकायुपस्कृतकणिकादीनां च त्याज्यतामुपलक्षयति । तथा हिंगु रामठं दोषः स्यात् । किंविशिष्टम्, असंहृतचर्म असंहृतं स्वस्वभावेनापरिणामितं चर्म येन तत् 'असंवृतचर्मे'ति वा पाठः । तत्र चर्मणा छादितं चर्मणि बद्धं प्रसारितं वा रामठं न गृह्णीयादिति भावः । उपलक्षणमेतत् । तेन तथाभूतं लवणादपि । तथा भोज्यं भक्तघृतादि सर्वं । किंविशिष्टं, व्यापन्नं कुथितं स्वादचलितमिति यावत् ॥ १२ ॥

मधुव्रतातिचारनिवृत्त्यर्थमाह—

प्रायः पुष्पाणि नाश्नीयान्मधुव्रतविशुद्धये ।
वस्त्यादिष्वपि मध्वादि-प्रयोगं नार्हति व्रती ॥ १३ ॥

टीका—नाश्नीयात् न भक्षयेत् मधुविरतः । कानि, पुष्पाणि । किमर्थं, मधुव्रतविशुद्धये क्षौद्रविरत्यतिचारनिवृत्त्यर्थं । कथं, प्रायः । तेन मधूकभल्लातकपुष्पाणां शक्यशोधनत्वान्नात्यन्तनिषेधः । शुष्कत्वानागकेसरादीनामपीति लक्षयन्ति । तथा नार्हति न कर्तुं योग्यो भवति । कोऽसौ, व्रती मधुमांसमद्येभ्योऽतिशयेन निवृत्तः । कं, मध्वादिप्रयोगं माक्षिकमांसमद्योपयोगं । केषु, वस्त्या-

दिपु वस्तिकर्मपिण्डप्रदाननेत्राञ्जनसेचनलनाप्रासादिपु किं पुनः स्वास्थ्यानुवृत्तिवाजीकरणादिविधिष्वित्यपिशब्दार्थः ॥ १३ ॥

पञ्चोदुम्बरविरत्यतिचारपरिहारार्थमाह—

सर्वं फलमविज्ञातं वार्ताकादि त्वदारितम्
तद्वद्भल्लादिसिम्बीश्च खादेन्नोदुम्बरव्रती ॥ १४ ॥

टीका—न खादेत् भक्षयेत्। कोऽसौ, उदुम्बरव्रती पिप्पलादिफलनिवृत्तः। किं तत्, फलं सर्वं। किंविशिष्टम्, अविज्ञातमज्ञातनाम। तथा न खादेत्। किं तत्, वार्ताकादि। आदिशब्देन कर्चरबदरपूगफलादि। किंविशिष्टम्, अदारितमभिन्नं अशोधितमध्यमित्यर्थः। तथा भल्लादिसिम्बीः भल्लराजमाषप्रमुखफलिकाः न खादेत्। किंवत्, तद्वत् अदारिता इत्यर्थः ॥ १४ ॥

अनस्तमितभोजनातिचारमाह—

मुहूर्तेऽन्त्ये तथाऽऽद्येऽह्नो वल्भाऽनस्तमिताशिनः।
गदच्छिदेऽप्याम्रघृताद्युपयोगश्च दुष्यति ॥ १५ ॥

टीका—दुष्यति दोषो भवति। काऽसौ, वल्भा भोजनं। क्व, मुहूर्ते घटिकाद्वये। कस्य, अह्नो दिनस्य। किंविशिष्टे, अन्त्ये पर्यन्तवर्तिनि। तथा आद्ये प्रथमे। कस्य, अनस्तमिताशिनः अनस्तमिते सूर्येऽश्नातीत्येवंव्रतस्य। तथा दुष्यति। कोऽसौ, आम्रघृताद्युपयोगः चूतचारचाचमोचादिफलानां घृतक्षीरेक्षुरसादीनां च सेवनं। कस्यै, गदच्छिदे रोगनिवृत्त्यर्थं, किं पुनः स्वास्थ्यानुवृत्त्याद्यर्थमित्यपिशब्दार्थः ॥ १५ ॥

जलगालनव्रतातिचारनिवृत्त्यर्थमाह—

मुहूर्तयुग्मोर्ध्वमगालनं वा दुर्वाससा गालनमम्बुनो वा।
अन्यत्र वा गालितशेषितस्य
न्यासो निपानेऽस्य न तद्व्रतेऽर्च्यः ॥ १६ ॥

टीका—अर्च्यं इति लिङ्गपरिणामेन सम्बन्धः। न अर्च्यं निन्द्यमित्यर्थः। किं तत्, अगालनमश्रावणं। कस्य अम्बुनो जलस्य। कथं, मुहूर्तयुग्मोर्ध्वं घटिकाचतुष्टयादुपरि। क्व, तद्व्रते गालितजलपाननिष्ठायां। वाशब्दाभ्यामोऽपि पर-

स्परसमुच्चये । तथा नार्च्यं । किं तत्, अम्बुनो गालनं । केन, दुर्वाससा अल्पमच्छिद्रजर्जरादिवस्त्रेण । तथा नार्च्यं । कोऽसौ, न्यासः स्थापनं । कस्य, अम्बुनः । किंविशिष्टस्य, गालितशोधितस्य वस्त्रस्रावितादुद्धरितस्य । क्व, निपाने जलाशये । किंविशिष्टे, अन्यत्र स्वाधारजलाशयादन्यस्मिन् । अथ–

" पञ्चुबरसहियाइं सत्तवि वसणाइं जो विवज्जेइ ।
सम्मत्तविसुद्धमई सो दंसणसावओ भणिओ ॥"

इति वसुनन्दिसैद्धान्तिमते ॥ १६ ॥

दार्शनिकस्य द्यूतादिव्यसननिवृत्तिमुपदेष्टुं तथामिहामुत्र चापायावद्यप्रायत्वमुदाहरणद्वारेण व्याहरन्नाह—

द्यूताद्धर्मसुतो बकस्य पिशितान्मद्याद्यदूनां विप-
च्चारोः कामुकया शिवस्य चुरया यद्ब्रह्मदत्तस्य च ।
पापर्द्ध्या परदारतो दशमुखस्योच्चैरनुश्रूयते
द्यूतादिव्यसनानि घोरदुरितान्युज्झेत्तदार्यस्त्रिधा ॥१७॥

टीका–उज्झेत् त्यजेत् । कोऽसौ, आर्यः सद्दर्शनो गृही । कथं, त्रिधा मनोवाक्कायकृतकारितानुमतैः । कानि, द्यूतादीनि व्यसनानि । द्यूतमांसमद्यवेश्याखेटचौर्यपापर्द्धिपरदारोपसेवनानि । किंविशिष्टानि, घोरदुरितानि घोराणि दुर्गतिदुःखकारणानि दुरितानि पापानि येभ्यस्तानि । कथं, तत्तस्मात् । यद्यस्मादनुभूयते वृद्धपरम्परया आकर्ण्यते । का सा, विपत् । कथम्भूता । उच्चैः प्रकृष्टा । कस्मात्, द्यूतात् द्यूतक्रीडनात् । कस्य, धर्मसुतो धर्मपुत्रस्य युधिष्ठिरस्य । तथोच्चैर्विपदनुश्रूयते । कस्य, बकस्य बकनाम्नो राज्ञः । कस्मात्, पिशितात् मांसभक्षणात् । तथोच्चैर्विपदनुश्रूयते । केषां, यदूनां यदोरपत्यानां यादवानां । कस्मात्, मद्यात् मद्यपानात् । तथा उच्चैर्विपदनुश्रूयते । कस्य, चारोः चारुदत्तनाम्नः श्रेष्ठिनः । कया, कामुकया वेश्योपसेवनया । तथा उच्चैर्विपदनुश्रूयते । कया, चुरया चौरिकया । कस्य, शिवभूतिनाम्नो द्विजस्य । तथा उच्चैर्विपदनुश्रूयते । कस्य, ब्रह्मदत्तनाम्नोऽन्त्यचक्रवर्तिनः । कया, पापर्द्ध्या आखेटकेन । तथा उच्चैर्विपदनुश्रूयते । कस्य, दशमुखस्य रावणस्य । कुतः, परदारतः परस्त्रीगमनाभिलाषनिबन्धनः ॥ १७ ॥

व्यसनशब्दनिरुक्तिद्वारेण द्यूतादेर्घोरदुरितश्रेय प्रत्यावर्तनहेतुत्वं समर्थ्य न्नाद्विरतस्य तत्समानफलत्वाद्धातुपाताद्युपव्यसनानामपि दूरपरिहरणीतामु-पदिशति–

जाग्रत्तीव्रकषायकर्कशमनस्कारार्पितैर्दुष्कृतै-
श्चैतन्यं तिरयत्तमस्तरदपि द्यूतादि यच्छ्रेयसः ।
पुंसो व्यस्यति तद्विदो व्यसनमित्याख्यान्त्यतस्तद्व्रतः
कुर्वीतापि रसादिसिद्धिपरतां तत्सोदरीं दूरगाम्॥१८॥

टीका–आख्यान्ति व्यपदिशन्ति । के ते, विदो विद्वांस. । किं तत्, द्यूतादिग्र्यसकं । किमाख्यान्ति, व्यसनं व्यसनमितिशब्देन व्यवहरन्तीत्यर्थः । कथं, तत् तस्मात् । यद्यस्मात्, व्यस्यति प्रत्यावर्तयति । किं तत्, द्यूतादि । कान्, पुंसः पुरुषान् । कस्मात्, श्रेयस अकल्याणं प्रापयतीत्यर्थं । किं कुर्वत्, तिरयत् छादयत् । किं तत्, चैतन्यमन्तस्तत्त्वं । कैः, दुष्कृतै पापैः । किंविशिष्टैः, जाग्रदित्यादि, जाग्रद्भिर्नित्योदितैस्तीव्रैर्दुर्निवारै कषायै. क्रोधादिभि कर्कशदृढकर्मबन्धसम्पादनोद्यतो मनस्कारश्चित्तप्रणिधानं तेनार्पितैरात्मना संयोजितै । किं कुर्वदपि, तरदपि अतिक्रामत् । किं तत्, तमो मिथ्यात्व । किं पुनर्मिथ्यात्वे विवर्तमानमित्यपिशब्दार्थं । यत एवं तत एतस्मात् कारणात् कुर्वीत विदधीत । कोऽसौ, तद्व्रत द्यूतादिविरति प्रतिपन्न । कां रसादिसिद्धिपरतामपि, न परं द्यूतादिपरतामित्यपिशब्दार्थं । किंविशिष्टां, दूरगां दूरवर्तिनीं । किंविशिष्टां, यतस्तत्सोदरीं द्यूतादिव्यसनसदृशीं, दुरन्तदुष्कृतबन्धश्रेय.प्रत्यावर्तनहेतुत्वाविशेषात् । रसादीत्यादिशब्देनाञ्जनगुटिकापादुकाविवरप्रवेशादि गृह्यते ॥ १८ ॥

द्यूतनिवृत्त्यतिचारमाह—

दोषो होडाद्यपि मनो-विनोदार्थं पणोज्झिनः ।
हर्षामर्षोदयाङ्गत्वात् कषायो ह्यंहसेऽञ्जसा ॥ १९ ॥

टीका–भवति । किं तत्, होडादि । होडा परस्परस्पर्धया धावनादि आदिशब्देन द्यूतदर्शनादि । किं भवति, दोषोऽतिचार. । कस्य, पणोज्झिन

पण नतमुञ्झतीत्येवंव्रतस्य । किमर्थं मनोविनोदार्थमपि मनोऽपि रमयितु प्रयुज्यमानं दोषः, किं पुनर्धनार्थं । कुतो, हर्षामर्षोदयाङ्गत्वात् प्रमोदक्रोधोद्भवहेतुत्वात् । एतदपि समर्थयितुमाह–हि यस्मात्कवति । कोऽसौ, कषायो रागद्वेषपरिणामः । कस्मै, अंहसे पापनिमित्तं । कन अञ्जसा परमार्थेन ॥१९॥

वेश्याव्यसनव्रतातिचारनिवृत्त्यर्थमाह––

त्यजेत्तौर्यत्रिकासक्तिं वृथाट्यां पिङ्गसङ्गतिम् ।
नित्यं पण्याङ्गनात्यागी तद्गेहगमनादि च ॥ २० ॥

टीका––त्यजेत् । कोऽसौ, पण्याङ्गनात्यागी वेश्यानिवृत्तिव्रतः । किं किं, *तौर्यत्रिकासक्तिं गीतनृत्यवाद्येषु सेवानिबन्धं । आसक्तिग्रहणाच्चैत्यालयादौ* धर्मार्थं गीतश्रवणं न दोष इति लक्षयति । तथा वृथाट्या प्रयोजनं विना विचरणं त्यजेत् । तथा पिङ्गसङ्गतिं विटैः सह सांगत्यं त्यजेत् । पिङ्ग इति पिट् 'पिट्' अनादरे । सेटन पिट अनादर । सिटा अनादरेण गायति गच्छति वा । 'अन्यतोऽपि चेति' ड पृषोदरादित्वात्सस्य च षत्वं । तथा तद्गेहगमनादि वेश्यागृहगमनसम्भाषणसत्कारादि त्यजेत् नित्यमित्यनेन सर्वदा । अत्र व्रते य न कुर्यात दुर्निवारत्वादित्युपदिशति ॥ २० ॥

चौर्यव्यसनमलोपदेशार्थमाह––

दायादाज्जीवतो राज वर्चसाद्गृह्णता धनम् ।
दायं वाऽपह्नुवानस्य क्वाचौर्यव्यसनं शुचि ॥ २१ ॥

टीका––क, कस्मिन्देशे काले च । अचौर्यव्यसनं चौरिकापरिहारव्रतं । शुचि निरतिचारं भवति न क्वापीत्यर्थः । कस्य, पुंसः किं कुर्वतो, गृह्णत । स्वीकुर्वतः । किं तत्, धनं ग्रामसुवर्णादिद्रव्यं । कस्मात्, दायादात् दायं कुलसाधारणं द्रव्यमादत्ते इति दायादो भ्रात्रादिस्तस्मात् । किं कुर्वतो, जीवनं । मृतस्य तु यथान्यायं स्वीकुर्वतो नास्ति दोषः । कस्माद्गृह्णतो, राजवर्चसात् नृपतेजस न जातिकुलदेशकालाद्यनुरोधात् । तथा अपह्नुवानस्य भ्रात्रादिभ्य अपलपत । कं दायम् ॥ २१ ॥

पापर्द्धिविरत्यतीचारनिषेधार्थमाह–

वस्त्रनाणकपुस्तादि-न्यस्तजीवच्छिदादिकम् ।
न कुर्यात्त्यक्तपापर्द्धि स्तद्धि लोकेऽपि गर्हितम् ॥ २२ ॥

टीका-न कुर्यात् । कोऽसौ, त्यक्तपापर्द्धि । किं तत्, वस्त्रेत्यादि, वस्त्राणि पट्टरङ्गपटादीनि, नाणकानि सीतारामटङ्कादीनि, पुस्तादीनि च लेप्यचित्र काष्ठाश्मदन्तधात्वादिशिल्पानि, वस्त्राणि च नाणकानि च पुस्तादीनि च वस्त्रनाणकपुस्तादीनि तेषु न्यस्तो नामोच्चारणपूर्वक सोऽयमिति स्थापितो जीव. प्राणी गजतुरगादिस्तस्य छिदादिक खण्डनावर्तनभञ्जनादि । हि यस्मात् भवति । किं तत्, वस्त्रादिन्यस्तजीवच्छिदादिक । किंविशिष्ट, गर्हित निन्दित । क्व, लोकेऽपि व्यवहर्तृजनमध्येऽपि न परं शास्त्रे ॥ २२ ॥

परदारव्यसनदोषनिषेधार्थमाह--

कन्यादूषणगान्धर्व विवाहादि विवर्जयेत् ।
परस्त्रीव्यसनत्यागव्रतशुद्धिविधित्सया ॥ २३ ॥

टीका—विवर्जयेत् । कोऽसौ, परदारवर्जी । किं तत्, कन्येत्यादि । कन्यादूषण कुमार्या अभिगमन स्वविवाहनार्थं दोषोद्भावन वा, गान्धर्व विवाहो यो मातु पितुर्बन्धूना चाप्रामाण्यात्परस्परानुरागेण मिथ समवाया द्वधूवराभ्या क्रियते, आदिशब्देन हरविवाहो हरणादि । कया, परस्य स्त्री परस्त्री तत्र तद्वेव वा व्यसन तस्य त्याग स एव व्रत तस्य शुद्धिर्निर्दोषता तत्र विधित्सा कर्तुमिच्छा तया ॥ २३ ॥

मद्यमांसव्यसननिवृत्त्योरत्वतीचारा प्रागेवोक्ता । इदानीं यतो लोकद्वय विरुद्धबुद्धया आत्मना विरति क्रियते परस्मिन्नपि तत्प्रयोग तद्व्रतविशुद्धयर्थं न विदध्यादित्यनुशास्ति—

व्रत्यते यदिहामुत्रा-प्यपायावद्यकृत्स्वयम् ।
तत्परेऽपि प्रयोक्तव्यं नैव तद् व्रतशुद्धये ॥ २४ ॥

---

१ पर्वुत्तरसहियाइ सत्तइ वसणाइ जो विवज्जेइ ।
सम्मत्तविसुद्धमई सो दसणसावयो भणियो ॥

टीका–प्रत्यते सकल्पपूर्वं प्रत्याख्यायते । किं तत्, यत् वस्तु । किंविशिष्टम्, अपायावद्यकृत् अपायोऽभ्युदयनि श्रेयसप्रदानोपाय, अवद्य गर्ह्यं, अपायश्चावद्य चापायावद्ये ते करोति तत् । क, इहास्मिञ्जन्मनि । तथाऽमुत्र परजन्मनि । केन व्रत्यते, स्वयं आत्मना । किं तत् व्रतविपर्ययकृत् वस्तु । नैव प्रयोक्तव्य प्रयोज्य । क, परेऽपि आत्मनीव पुरुषान्तरेऽपि । कस्यै, व्रतशुद्धये प्रकृतव्रत-निर्मलीकरणार्थम् ॥ २४ ॥

एव प्रतिपन्नदर्शनप्रतिमस्य श्रावकस्य स्वप्रतिज्ञानिर्वाहार्थमुत्तरेण प्रबन्धेन शिक्षां प्रयच्छन्नाह—

अनारम्भवधं मुञ्चेच्चरेन्नारम्भमुद्धुरम् ।
स्वाचारप्रातिलोम्येन लोकाचारं प्रमाणयेत् ॥ २५ ॥

टीका—मुञ्चेत् त्यजेत् । दर्शनिक । कम्, अनारम्भवध तप सयमादि-साधनतनुस्थितयर्थाया कृष्यादिक्रियाया अन्यत्र प्राणिहिंसा । एतेन यदुक्त स्वामिसमन्तभद्रदेवै –'दर्शनिकस्तत्त्वपथगृह्य' इति दर्शनप्रतिमालक्षण तदपि सगृहीत तथाविधहिंसाविरतिविध्युपदेशेन पञ्चाणुव्रतानुसरणविधानोपदेशात् । तथा न चरेत् न कुर्यात । कम्, आरम्भ कृष्यादिक । किंविशिष्टम्, उद्धुरम् आत्मनिर्वाहभर । परेण हि कृष्यादिक्रिया कारयतो द्वन्द्वलाघवाद्य सादृशी प्रतिज्ञातधर्मकर्मानुष्ठाने गृहिणो विहस्तता भवति यादृशी तामात्मना कुर्वत सा स्यात द्वन्द्वावर्तविवर्तनात् । तथा प्रमाणयेत् प्रमाण कुर्यात् न विसवाद-येदित्यर्थ । क, लोकाचार स्वामिसेवाक्रयविक्रयादिक । केन स्वाचाराप्रति-लोम्येन आत्मप्रतिपन्नव्रतानुष्ठानानुपघातेन ॥ २५ ॥

धर्मे पत्न्या सुतरा व्युत्पादनविधिमुपदिशति–

व्युत्पादयेत्तरां धर्मे पत्नीं प्रेम परं नयन् ।
सा हि मुग्धा विरुद्धा वा धर्माद् भ्रंशयते तराम् ॥ २६ ॥

टीका—व्युत्पादयेत् तरा । अर्थादिषु पाद्यात् धर्मेऽतिशयेन व्युत्पन्नां कुर्यात् अथवा धर्मविषये सर्वमपि परिवार च पत्नीं च व्युत्पादयन् पत्नीं ततोऽतिश-येन तत्र व्युत्पादयेदिति व्याख्येय । कोऽसौ, दर्शनिक । का, पत्नीं भार्या ।

इ, धर्मे। किं कुर्वे,—अयन् प्रापयन्। का, पत्नी। किं तत्, प्रेम स्वस्मिन् धर्मे च स्नेह। किंविशिष्ट, परमुत्कृष्ट। हि यस्मात् अद्रायते नरा परिवारा (दा) दतिशयेन प्रच्यावयति। काऽसौ, सा पत्नी। क, पुरुप। कस्मात्, धर्मात्। किंविशिष्टा सती, मुग्धा धर्मे मूढा धर्ममजानतीत्यर्थ। तथा विरुद्धा पुसि धर्मे वा द्वेपिणीत्यर्थ। इदमत्र तात्पर्यं धर्ममजानानो विरक्तश्च परिजनो नर धर्मात्प्रच्यावयति। ततोऽप्यतिशयेन तादृग्विधा गृहिणी। तदधीनत्वाद्गृहिणो धर्मकार्याणाम्॥ २६।

प्रेम पर नयत्वित्यस्य समर्थनार्थमाह—

स्त्रीणां पत्युरुपेक्षैव परं वैरस्य कारणम्।
तन्नोपेक्षेत जातु स्त्रीं वाञ्छन्लोकद्वये हितम्॥ २७॥

टीका—भवति। किं तत्, वैरस्य कारण वैरस्य विरागताया हेतु। अथवा वैरस्य विरोधस्य कारण। किंविशिष्ट, परमुत्कृष्ट। कासा स्त्रीणा। किं तत्, उपेक्षैव अनादर एव, न तु वैरूप्यनिर्धनत्वादि। कस्य पत्युर्भर्तु। यत एव तत्तस्मात्। नोपेक्षेत, नोपेक्षणीयत्वेन पश्येत्। कोऽसौ, पुमान्। का, स्त्री स्त्रिय कदा जातु कदाचिदपि धर्माद्यनुष्ठानकाले। किं कुर्वन्, वाँछन् अभिलपन्। किं तत्, हित सुख सुखकारण च। क, लोकद्वयेऽपि इहलोके परलोके च॥२७॥

कुलस्त्रियाऽपि धर्मादिकमिच्छन्त्या भर्तृच्छन्दानुवृत्तिरेव कर्तव्येति प्रासङ्गिकीं स्त्रिया शिक्षा प्रयच्छन्नाह—

नित्यं भर्तृमनीभूय वर्तितव्यं कुलस्त्रिया।
धर्मश्रीशर्मकीर्त्येकनिकेतनं हि पतिव्रताः॥ २८॥

टीका—वर्तितव्य मनोवाक्कायकर्मभिराचरितव्य। कया, कुलस्त्रिया कुलीननार्या। किं कृत्वा, भर्तृमनीभूय अभर्तृमना भर्तृमना भूत्वा पतिचित्तानुवर्तनेनैव चिन्त्य वाच्य चेष्टितव्य च। कथ,नित्य सर्वदा। हि यस्मात्। भवन्ति। का, पतिव्रता पतिसेवैव व्रत प्रतिज्ञा शुभकर्मप्रवृत्तिर्वा यासा ता इत्यर्थ। किं भवति, धर्मेत्यादि—धर्मस्य पुण्यस्य, श्रियो विभूतेर्भारत्याश्च, शर्मण

आनन्दस्य, कीर्तेर्यशस एकमुत्कृष्टमव्यभिचारि केतनं गृहं ध्वजो वा यास्ता धर्मश्रीशर्मकीर्त्येककेतनं। नित्य धर्मादिभिरन्यो धर्मादिविख्याता वा इत्यर्थः ॥२८॥

धर्मार्थिनः कुलस्त्रियामप्यत्यासक्तिं निषेधयन्नाह–

भजेद्देहमनस्तापशमान्तं स्त्रियमन्नवत् ।
क्षीयन्ते खलु धर्मार्थकायास्तदतिसेवया ॥ २९ ॥

टीका–भजेत् सेवेत। कोऽसौ त्रैवर्णिक विशेषणाद्दर्शनिक श्रावकः। का, स्त्रियं। कथं, यथा भवति देहमनस्तापशमान्तं शरीरमनसोः सन्तापोपशमो यथा भवति न पुनरत्यासक्त्या। किंवत्, अन्नवत् भोजनं यथा। खलु यस्मात्। क्षीयन्ते क्षयं यान्ति। के, धर्मार्थकायाः धर्मो, धनं शरीरं च त्रीण्यपि। कया, तदतिसेवया अन्नस्येव स्त्रिया अप्यतिमात्रोपयोगेन॥

पुत्रस्योत्पादनादिप्रयत्नविधिमाह—

पुत्रोत्पादनविधिस्त्वयमष्टाङ्गहृदयोक्तः—

१ पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि॥
वीर्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा॥
शुक्रं शुक्लं गुरु स्निग्धं मधुरं बहुलं बहु।
घृतमाक्षिकतैलाभं सद्गर्भायार्त्तवं पुनः॥
लाक्षारसशशास्राभं धौतं यच्च विरज्यते।
शुद्धशुक्रार्त्तवं स्वस्थं सरक्तं मिथुनं मिथः॥
स्नेहैः पुंसवनैः स्निग्धं शुद्धं शालितवस्तिकम्।
नरं विशेषात्क्षीराद्यैर्मधुरौषधसंस्कृतैः॥
नारीं तैलेन माषैश्च पित्तलैः समुपाचरेत्।
क्षामप्रसन्नवदनां स्फुरच्छ्रोणिपयोधराम्॥
स्रस्ताक्षिकुक्षिं पुंस्कामां विद्यादृतुमतीं स्त्रियम्।
पद्मं सङ्कोचमायाति दिनेऽतीते यथा तथा॥

प्रयतेत सधर्मिण्यामुत्पादयितुमात्मजम् ॥
व्युत्पादयितुमाचारे स्ववत्त्रातुमथापथात् ॥ ३० ॥

टीका—प्रयतेत परमादर कुर्यात् । कोऽसौ, दर्शनिक । किं कर्तुम्, उत्पादयितु जनयितु । कम्, आत्मजमौरस पुत्र । क्षेत्रजाद्येकादशपुत्राणामनभ्युपगमात् । कस्या, सधर्मिण्या समानो धर्मो अस्यामस्तीति नित्ययोगे 'इन्' कुलस्त्रियामित्यर्थ । आत्मनो जात आत्मज इत्यन्वर्थतासिध्यर्थ कुलस्त्रीरक्षाया नित्य यतितव्यमिति प्रतिपत्तव्य । तथा प्रयतेत । कोऽसौ, स । किं कर्तुं, व्युत्पादयितु विविधमुत्कृष्ट ज्ञान प्रापयितु । कम्, आत्मज । क, आचारे कुललोकसव्यवहारे । किवत्, स्ववत आत्मना तुल्य । तथा प्रयतेतासौ । किं कर्तुं, त्रातु रक्षितु निवर्तयितुमित्यर्थ । कम् आत्मज । कस्मात्अपथात् धर्मादिभ्रशनोपायात् दुराचारादित्यर्थ । स्ववदित्यत्रापि योज्य । अथशब्द समुच्चय ॥ ३० ॥

सत्पुत्ररहितेन श्रावकेणोत्तरपद प्रति प्रोत्साहो दुष्कर स्यादिति दृष्टान्तेनोपष्टम्भयन्नाचष्ट—

विना सुपुत्रं कुत्र स्वं न्यस्य भारं निराकुलः ।
गृही सुशिष्यं गणिवत् मोत्सहेत परे पदे ॥ ३१ ॥

ऋतावतीत योनि स्याच्छुक नात प्रतीच्छति ।
मासेनोपचित रक्त दमानिभ्यामृतं पुन ॥
ईष कृष्ण विगन्ध च वायुर्योनिमुखान्नुदेत् ।
तत पक्षेक्षणादेव कल्याणध्यायिनी त्र्यहम् ॥
स्रजालङ्काररहिता दर्भसस्तरशायिनी ।
क्षैरय यावक स्तोक कोष्ठशोधनकर्शनम् ॥
पर्ण शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी ।
चतुर्थेऽह्नि तत स्नाता शुक्लमाल्याम्बरा शुचि ॥
इच्छन्ती भर्तृसदृश पुत्र पश्येत्पुर पतिम् ।
ऋतुस्तु द्वादशनिशा पूर्वास्तिस्रोऽथ निन्दिता ॥
एकादशी च युग्मासु स्यात्पुत्रोऽन्यासु कन्यका ।

टीका—कुत्र कस्मिन् पुंसि। स्वमात्मीयं भारं पोष्यादिनिर्वाहभरं। न्यस्य स्थापयित्वा। निराकुलो निर्द्वन्द्वः सन्। प्रोत्सहेत प्रकृष्टमुद्योगं कुर्यात् न क्वापीत्यर्थः। कोऽसौ, गृही प्रकृतत्वाद्दर्शनिकः। क, पदे संयमस्थाने। किंविशिष्टे परे प्रतिकप्रतिमाया वानप्रस्थाश्रमे वा। कथं विना अन्तरेण। क, सुपुत्रं आत्मसमानमात्मजं। क्विवत्, गणिवत् धर्माचार्यो यथा। क सुशिष्यमात्मसमानमेवाचार्यादिना। कुत्र श्रमणे। स्वं भारं सन्घनिर्वाहलक्षणं। न्यस्य निराकुलो निर्व्यापक्षः सन् परे आत्मसंस्कारादौ मोक्षपदे वा प्रोत्सहेत, न क्वापीत्यर्थः। इदमत्रैदम्पर्यं– दर्शनिकेन धर्माचार्येण च परं पदमाश्रयितुमिच्छता सत्पुत्रः सच्छिष्यश्चात्मवन्निष्पादनीय॥ ३१॥

प्रकृतमर्थमुपसंहरन् प्रतिकप्रतिमारोहणयोग्यतां सूत्रयन्नाह –

दर्शनप्रतिमामित्थमारुह्य विषयेष्वरम्।
विरज्यन् सत्त्वसज्जः सन्व्रती भवितुमर्हति॥ ३२॥

टीका—अर्हति योग्यो भवति। कोऽसौ, श्रावकः। किं कर्तुं, भवितुं सम्पत्तुं। किंविशिष्टो, व्रती प्रतिकप्रतिमावान्। किंविशिष्टः सन् सत्त्वसज्जः धैर्यादिसात्त्विकभावाविष्टः किं कुर्वन्, विरज्यन् स्वयमेव विरक्तिं गच्छन्। केषु विषयेषु कामिन्यादिषु। कथं–अरं पाक्षिकापेक्षया स्वस्य च प्राक्तनावस्थापेक्षया विशेषेण। किं कृत्वा, आरुह्य पर्यन्तं प्राप्य। कां दर्शनप्रतिमां। कथम्, इत्थमनेन पाक्षिकाचारसंस्कारेत्यादिपूर्वोक्तप्रकारेणेति भद्रम्॥ ३२॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितो द्वादश प्रक्रमाश्च तृतीयोऽध्यायः समाप्तः॥ ३॥

अथ चतुर्थोऽध्यायः।

अथ व्रतिकप्रतिमामध्यायत्रयेण प्रपञ्चयिष्यन् प्रथमं तावत्तल्लक्षणं संगृह्णन्नाह—

> सम्पूर्णदृग्मूलगुणो निःशल्यः साम्यकाम्यया।
> धारयन्नुत्तरगुणानक्षूणान्व्रतिको भवेत् ॥ १ ॥

टीका—भवेत्। कोऽसौ, व्रतिकः। किं कुर्वन्, धारयन् अकृच्छ्रेण दधन्। कान्, उत्तरगुणान् वक्ष्यमाणान्। किंविशिष्टान्, अक्षूणान् निरतिचारान्। कया, साम्यकाम्यया इष्टानिष्टयो रागद्वेषोपरमवाञ्छया, न पुनर्लाभादीच्छया। किंविशिष्टः सन् सम्पूर्णदृग्मूलगुणः सम्पूर्णा उपयोगमात्राश्रयेणान्तरङ्गेण चेष्टामात्राश्रयेण च बहिरङ्गेणातिचारेण रहितत्वादखण्डा दृक् सम्यक्त्वं, मूलगुणाश्च यस्य स तथोक्तः। पुनः किंविशिष्टः, निःशल्यः। शृणाति हिनस्तीति शल्यं शरीरानुप्रवेशिकाण्डादि, शल्यमिव शल्यं कर्मोदयविकारः शारीरमानसबाधाहेतुत्वात्। तत् त्रिविधं मिथ्यात्वमायानिदानभेदात्। मिथ्यात्वं विपरीताभिनिवेशः, माया वञ्चना, निदानं तपःसंयमाद्यनुभावेन कांक्षाविशेषः, शल्यान्निष्क्रान्तो निःशल्यः ॥ ननु च सम्पूर्णदृग्मूलगुण इत्यनेनैव शल्यपरिहारस्य सिद्धत्वात् व्यर्थमिदमिति चेन्मन्यः, किन्त्वचिरप्रतिपन्नव्रतस्य पूर्ववि

---

१ तपःसंयमाद्यनुभावेन कांक्षाविशेषो निदानम्। तत् द्वेधा प्रशस्तेतरभेदात्। प्रशस्तं पुनर्द्विविधम्। विमुक्तिसंसारनिमित्तभेदात्, तत्र विमुक्तिनिमित्तं कर्मक्षयाद्याकाङ्क्षा। उक्तं च—

> *कर्मव्यपाये भवदुःखहानिं बोधिं समाधिं जिनबोधसिद्धिम्।*
> आकांक्षितं क्षीणकषायवृत्तेर्विमुक्तिहेतुः कथितं निदानम् ॥

जिनधर्मसिद्ध्यर्थं तु जात्याद्याकाङ्क्षणं संसारनिमित्तम्।

> जातिं कुलं बन्धुविवर्जितत्वं दरिद्रतां वा जिनधर्मसिद्ध्यै।
> प्रयाचमानस्य विशुद्धवृत्तेः संसारहेतुर्गदितं निदानम् ॥
> *मोक्षेऽपि मोहादभिलाषदोषो विशेषतो मोक्षनिषेधकारी।*
> यतस्ततोऽध्यात्मरतो मुमुक्षुर्भवेत्किमन्यत्र कृताभिलाषः ॥

भ्रमसंस्कारारोप्यमाणतत्परिणामानुसरणनिवारणार्थं भूयो यत्नः क्रियते। उपदेशे च पौनरुक्त्यं न दोषः ॥ १ ॥

शल्यत्रयोद्धरणे हेतुमाह—

सागारो वाऽनगारो वा यन्निःशल्यो व्रतीष्यते।
तच्छल्यवत्कुदृङ्मायानिदानान्युद्धरेद्धृदः ॥ २ ॥

टीका–यत्तस्मात्कारणात्। इष्यते। कोऽसौ, व्रती। किंविशिष्टो, निःशल्यः। किंविशिष्ट सन्, सागारो वा अनगारो वा। अत्रेयं भावना–शल्यापगमे सत्येव व्रतसम्बन्धाद्व्रती मन्यते, न हिंसाद्युपरतिमात्रव्रतसम्बन्धात् यथा बहुक्षीरघृतो गोमानिति व्यपदिश्यते। बहुक्षीरघृताभावात् सतीष्वपि गोषु न गोमान्, तथा सशल्यत्वात् सत्स्वपि व्रतेषु न व्रती। यस्तु निःशल्यः स व्रतीति। तत्तस्मात्। उद्धरेत् निष्कासयेत्। कोऽसौ, व्रतार्थी। कानि, कुदृङ्मायानिदानानि। कस्मात्, हृदो हृदयात्। किंवत्, शल्यवत् शल्यानि यथा॥२॥

शल्यसहचारीणि व्रतानि धिक्कुर्वन्नाह–

आभान्त्यसत्यदृङ्मायानिदानैः साहचर्यतः।
यान्यव्रतानि व्रतवद्दुःखोदर्काणि तानि धिक् ॥ ३ ॥

टीका–धिक् निन्द्यानि। कानि, तानि अव्रतानि व्रताभासानि। किंविशिष्टानि, दु खोदर्काणि यत दु खमुदर्क उत्तरफलं येषां तानि। यानि किं, यानि आभान्ति आभासन्ते। कानि, अव्रतानि। किंवत्, व्रतवत् व्रतानि यथा। कस्मात्, साहचर्यत सहचारित्वात्। कैः, असत्यदृशा मिथ्यात्वेन मायया निदानेन च॥ ३ ॥

उत्तरगुणनिर्णयार्थमाह—

पञ्चधाऽणुव्रतं त्रेधा गुणव्रतमगारिणाम्।
शिक्षाव्रतं चतुर्धेति गुणाः स्युर्द्वादशोत्तरे ॥ ४ ॥

टीका—स्यु भवेयुः। के, गुणा संयमविकल्पाः। केषाम् अगारिणां गृहिणां। किंविशिष्टा, उत्तरे मूलगुणानन्तरसेव्यत्वादुत्कृष्टत्वाच्च। कति,

द्वादश । कथ,–मित्यनेन प्रकारेण । भवति । किं तत्, अणुव्रत अणुव्रता-पेक्षया लघुव्रतमहिंसादि । कतिधा, पञ्चधा अस्य पञ्चधात्व बहुमतत्वादिष्यते क्वचित्तु रात्र्यभोजनमप्यणुव्रतमुच्यते । तथा भवति । किं तत्, गुणव्रत । कतिधा, त्रेधा । गुणार्थमणुव्रतानामुपकारार्थं व्रत गुणव्रत दिग्विरत्यादीनामणुव्रतानु-बृहणार्थत्वात् । तथा भवति । किं तत्, शिक्षाव्रत । कतिधा, चतुर्धा शिक्षायै अभ्यासाय व्रत देशावकाशिकादीना प्रतिदिवसाभ्यसनीयत्वात् । अत एव गुणव्रतादस्य भेद । गुणव्रत हि प्रायो यावज्जीविकमाहु । अथवा शिक्षा-विद्योपादान शिक्षाप्रधान व्रत शिक्षाव्रत देशावकाशिकादेर्विशिष्टश्रुतज्ञान-भावनापरिणतत्वेनैव निर्वाह्यत्वात् ॥

सामान्येन पञ्चाणुव्रतानि लक्षयन्नाह—

विरतिः स्थूलवधादेर्मनोवचोऽङ्गकृतकारितानुमतैः ।
क्वचिदपरेऽप्यननुमतैः पञ्चाहिंसाद्यणुव्रतानि स्युः ॥५॥

टीका—स्यु भवेयु । कानि, अहिंसाद्यणुव्रतानि । कति, प्र । विरति निवृत्ति । कस्मात्, स्थूलवधादे । कै , मन इत्यादि—कृतादयो भावे क्तसा-धना । मनश्च वचश्च अङ्ग च मनोवचोऽङ्गानि, तेषा प्रत्येक कृत च कारित चानुमत च मनोवचोऽङ्गकृतकारितानुमतानि तै । केषा पञ्चाणुव्रतानि स्यु , क्वचिद्गृहवासनिवृत्ते श्रावके तथा अपरे गृहवासनिरते श्रावक । अननुमतैर नुमतिवर्जितैस्तै पड्भिस्तानि स्युरिति सक्षेप । इतो विस्तर —स्थूलत्री वादिविषय वान्मिथ्यादृष्टीनामपि हिंसादित्वेन प्रसिद्धत्वाद्वा स्थूलो वधादि स्थूला हिंसानृतस्तेयाब्रह्मपरिग्रहा इत्यर्थ । ततो मनसा वाचा कायेन च पृथक्करणकारणानुमननैर्निवृत्तिरहिंसासूनृतास्तेयब्रह्मचर्यापरिग्रहाख्यानि पञ्चा-णुव्रतानि क्वचिद्गृहवासनिवृत्ते श्रावके भवेयुरित्युत्कर्षवृत्त्याऽणुव्रतान्युपदिश्यन्ते । यान्यपरे गृहवासनिरते श्रावकेऽननुमतैरनुमतिविवर्जितैर्मनस्करणादिभि पड्-भि स्थूलहिंसादिनिवृत्त्या सम्पद्यन्ते तानि मध्यमवृत्त्या व्रतान्यभिमन्यन्ते । तस्यापत्यादिभिर्हिंसादिकरणे तत्कारणे वा अनुमतेरशक्यप्रतिषेधत्वात् । स

उक्तच चारित्रासारे–

१ वधादसत्याच्चौर्याच्च कामाद्ग्रन्थान्निवर्तनम् ।
पञ्चधाऽणुव्रत रात्र्यभुक्ति षष्ठमणुव्रतम् ॥

एष द्विविधत्रिविधाख्य स्थूलहिंसादिविरतिभङ्गो बहुविषयत्वात् श्रेयान् । अपिशब्दः प्रकारान्तरेणापि स्थूलहिंसादिनिवृत्तेरणुव्रत्यापनार्थं । शक्त्या हि व्रत प्रतिपन्न सुखनिर्वाहं श्रेयोऽर्थं च स्यात् । तद्विरतिभङ्गा करणादित्रिकेण योगत्रिकेण च विभिद्यमाणा एकोनपञ्चाशद्भवन्ति । यथा हिंसां न करोति मनसा १, वाचा २, कायेन च ३, मनसा ४, मनसा कायेन ५ वाचा कायेन ६, मनसा वाचा कायेन च ७, एते करणेन सप्तभङ्गा एव कारणेन सप्त । अनुमत्याऽपि सप्त । तथा हिंसां न करोति न कारयति च मनसा १, वाचा २, कायेन ३, मनसा वाचा ४, मनसा कायेन ५ वाचा कायेन ६, मनसा वाचा कायेन च ७, एते करणकारणाभ्यां सप्त । एव करणानुमतिभ्यां सप्त । कारणानुमतिभ्यामपि सप्त । करणकारणानुमतिभिरपि सप्त । एव सर्वे मिलिता एकोनपञ्चाशद्भवन्ति । एते च त्रिकालविषयत्वात्प्रत्याख्यानस्य कालत्रयेण गुणिता सप्तचत्वारिंशदधिकं शतं भवन्ति १४७ । त्रिकालविषयता चातीतस्य निन्दया साम्प्रतिकस्य संवरणेनानागतस्य च प्रत्याख्यानेनेति । एते च भङ्गा अहिंसाव्रतवत्सत्यव्रतान्तरेष्वपि द्रष्टव्या अत्रैव भावना दिक् । तत्र तावद्बाहुल्येनोपदेशात् द्विविधत्रिविधभङ्गमाश्रित्योच्यते । स्थूलहिंसां न करोत्यात्मना न कारयत्यन्येन मनसा वाचा कायेन चेति । तथा स्थूलहिंसां न करोति न कारयति मनसा वाचा । यद्वा मनसा कायेन अथवा वचसा कायेन चेति । तत्र यदा मनसा वाचा न करोति न कारयति तदा मनसाऽभिसन्धिरहित एव वाचाऽपि हिंसकमब्रुवन्नेव कायेनैव दुश्चेष्टितादि असञ्ज्ञियत्करोति । यदा तु मनसा कायेन न करोति न कारयति तदा मनसाऽभिसन्धिरहित एव कायेन दुश्चेष्टितादि परिहरन्नेवानाभोगाद्वाचैव हन्मि घातयामि येति ब्रूते । यदा तु वाचा कायेन च न करोति न कारयति तदा मनसैवाभिसन्धीकृत्य करोति कारयति च । अनुमतिस्तु त्रिभिरपि सर्वत्रास्ति । एव शेषविकल्पा अपि भावनीया । स्थूलग्रहणमुपलक्षणं । तेन निरपराधसङ्कल्पपूर्वकहिंसादीनामपि ग्रहणम् । एतेन—"दण्डो हि केवलो लोकमिमं चामुं च रक्षति । राज्ञा शत्रौ च पुत्रे च यथादोषं समं धृतः" इति वचनादपराधकारिषु यथाविधदण्ड

१ पशुपुत्र्यादिदुर्णित्यादि दृष्ट्वा हिंसाफलं सुधी ।
निरागस्त्रसजन्तूनां हिंसां सङ्कल्पतस्त्यजेत् ॥

प्रणेतृणामपि चक्रवर्त्यादीनामणुव्रतादिधारण पुराणादिषु च बहुश श्रूयमाण न विरुध्यते । आत्मीयपदवीशक्त्यनुसारेण तैं स्थूलहिंसादिविरते प्रतिज्ञानात् ॥ ५ ॥

स्थूलविशेषण व्याचष्टे—

स्थूलहिंस्याद्याश्रयत्वात् स्थूलानामपि दुर्दृशाम् ।
तत्त्वेन वा प्रसिद्धत्वाद्वधादि स्थूलमिष्यते ॥ ६ ॥

टीका—इष्यते अभिमन्यते आचार्यैं । कि तत्, वधादि हिंसादिपापकर्मपञ्चक । किंविशिष्टमिष्यते, स्थूल । कस्मात्, स्थूलहिंस्याद्याश्रयत्वात् स्थूला बादरा हिंस्यादयो हिंस्यभाष्यमोष्यपरिभोग्यपरिग्राह्या आश्रया आलम्बनानि यस्य तत्तदाश्रय तद्भावात् । तथा वधादि स्थूलमिष्यते । कस्मात्,प्रसिद्धत्वात् सम्प्रतिपन्नत्वात् । केषा, स्थूलानामपि । किलक्षणानां, दुर्दृशा मिथ्यादृष्टीना केन, तत्त्वेन वधादिभावेन । वाशब्दात्स्थूलकृतत्वाच्चेत्यनुक्त समुच्चीयते ॥ ६ ॥

इदानीमौत्सर्गिकमहिंसाणुव्रत व्याचष्टे—

शान्ताद्यष्टकषायस्य सङ्कल्पैर्नवभिस्त्रसान् ।
अहिंसतो दयार्द्रस्य स्यादहिंसेत्यणुव्रतम् ॥ ७ ॥

टीका—स्याद्भवेत् । किं तत्, अणुव्रत । किमाख्यम् अहिंसेति अहिंसाख्य । कस्य, शान्ताद्यष्टकषायस्य शान्ता शमङ्गता शमिता वा आद्या अनन्तानुबन्धिनो अप्रत्याख्यानावरणाश्च अष्टौ कषाया क्रोधादयो यस्य येन वा तस्य । पुन किंविशिष्टस्य, दयार्द्रस्य करुणामृदुहृदयस्य । प्रयोजनोद्देशेन कदाचित् स्थावरघाते प्रवृत्तावप्यनुकम्प्यमानमानसस्येति भाव । किं कुर्वत,, अहिंसतो द्रव्यभावप्राणैरवियोजयत । कान्, त्रसान् द्वित्रिचतुपञ्चेन्द्रियजीवान् । कै, सङ्कल्पै उत्तरसूत्रद्वयनिर्दिष्टैर्हिंसाभिसन्धिभि । कतिभि, नवभि मनोवाक्कायै पृथक्करणकारणानुमननैरित्यर्थ । अत्र करणग्रहणं कर्तु स्वातन्त्र्यप्रतिपत्त्यर्थ । कारणग्रहण परप्रयोगापेक्ष । अनुमननोपादान प्रयोजकस्य मानसपरिणामप्रदर्शनार्थं । तथाहि—त्रसहिंसां स्वय न करोमि त्रसान् हिनस्मीति मन सङ्कल्प न करोमीत्यर्थ । तथा मनसा त्रसहिंसामन्य

न कारयामि त्रसान् हिंसय हिंसयेति मनसाऽन्यप्रयोजको न भवामीत्यर्थः। अत्र हिंसयेति हन्त्यर्थाच्चेति हिनस्तेश्चुरादिपाठाण्णिजन्तस्य रूपं। तथाऽन्यं त्रसहिंसां कुर्वन्तं मनसा नानुमन्ये सुन्दरमनेन क्रियते इति मनःसङ्कल्पं न करोमीत्यर्थः। एवं वाचा स्वयं त्रसहिंसां न करोमि त्रसान् हिनस्मीति स्वयं वाचं नोच्चारयामीत्यर्थः । तथा वाचा त्रसहिंसां न कारयामि त्रसान् हिंसय हिंसयेति वाचं नोच्चारयामीत्यर्थः । तथाऽन्यं त्रसहिंसां कुर्वन्तं वाचा नानुमन्ये साधु क्रियते त्वयेति वाचं नोच्चारयामीत्यर्थः । तथा कायेन त्रसहिंसां स्वयं न करोमि त्रसहिंसने दृष्टिमुष्टिसन्धाने स्वयं कायव्यापारं न करोमीत्यर्थः। तथा कायेन त्रसहिंसां न कारयामि त्रसहिंसने हस्तादिसञ्ज्ञया कायेन परं न प्रेरयामीत्यर्थः । त्रसहिंसां कुर्वन्तमन्यं कायेन नानुमन्ये त्रसहिंसने प्रवर्तमानमन्यं नखच्छोटिकादिना नाभिनन्दामीत्यर्थः ॥ ७ ॥

पुनरेतत् पद्यद्वयेन सङ्गृह्णन्नाह—

> इमं सत्त्वं हिनस्मीति हिन्धि हिन्ध्येष साध्विमम् ।
> हिनस्तीति वदन्नाभिसन्दध्यान्मनसा गिरा ॥ ८ ॥
> वर्तेत न जीववधे करादिना दृष्टिमुष्टिसन्धाने ।
> न च वर्तयेत्परं तत्परे नखच्छोटिकादि न च रचयेत् ॥९॥

टीका·—नाभिसन्दध्यात् न सङ्कल्पयेत् । कोऽसौ, स्वगृहः श्रावकः । कं, वधं हिंसां । केन, मनसा तथा गिरा वाचा । कथमिति किमिति, हिनस्मि हन्मि । कं, सत्त्वं जीवं । किंविशिष्टम् इमं पुरोवर्तिनं । तथा हिन्धि, हिन्धि मारय मारय । कं, इमं । तथा हिनस्ति हन्ति । कोऽसौ, एष पुरुषः कम्, इमं । कथं, साधु सुष्ठु । न वर्तेत न व्याप्रियेत । कोऽसौ, स्वगृहः ।

जीववधे जीवानां सङ्कल्पितत्रसप्राणिनां प्राणव्यपरोपणे । क्व विषये, दृष्टिमुष्टिसन्धाने दृष्टि चक्षुः मुष्टिर्हस्ताङ्गुलीबन्धविशेषः, दृष्टिश्च मुष्टिश्च दृष्टिमुष्टी ताभ्यां सन्धानं संयोजनं यस्मिन् प्रहरणविषयं तत् दृष्टिमुष्टिसन्धानं पुस्तकासनादिकमुपकरणवस्तु तस्मिन् । स्वगृहस्यापि श्रावकस्य सकर्मादिनि रधे करादिना हस्ताङ्गुल्यादङ्गोपाङ्गेन न प्रवर्तेतेत्यर्थः । उक्तं च—

आसन शयन यान मार्गमन्यच्च वस्तु यत् ।
अदृष्ट तत्र सेवेत यथाकाल भजन्नपि ॥

दृष्टिग्रहण ज्ञानक्रियोपलक्षण । मुष्टिग्रहण च ग्रहणादिक्रियोपलक्षण । तथा न च वर्तयेत् । कोऽसौ, त्यक्तगृह । क, पर क, तादृशे जीववधे । तथा न च रचयेत् न कुर्यात् । कि तत् नम्वच्छोटिकादि । क्व, तत्परे जीववधे स्वय मेव वर्तमान पुसि ॥ ८ ॥ ९ ॥

एव त्यक्तगृहस्योपासकस्याहिंसाणुव्रतविधानमुपदिश्येदानीं गृहवर्तिनस्तदु पदिशन्नाह—

इत्यनारम्भजां जह्याद्धिंसामारम्भजां प्रति ।
व्यर्थस्थावरहिंसावद्यतनामावहेद्गृही ॥ १० ॥

टीका—जह्यात् त्यजेत् । कोऽसौ, गृही गृहवर्तिश्रावक । का हिंसा । किंविशिष्टाम्, अनारम्भजा अनारम्भे आसनोपवेशनादौ जाता तत्सम्भ विनीमित्यर्थ । उक्तच—

गृहकार्याणि सर्वाणि दृष्टिपूतानि कारयेत् ।

कथ जह्यात् इति अनेन त्यक्तगृहोपासकोपदिष्टेन प्रकारेण । तथा आवहेत् कुर्यात् । कोऽसौ, गृही । का, यतना समितिपरता । क्व, प्रत्युद्दिश्य का, हिंसा । किंविशिष्टाम्, आरम्भजा कृष्याद्यारम्भसम्भविनीं । किंवत्, व्यर्थस्था वरहिंसावत् निष्प्रयोजनैकेन्द्रियवधे यथा ॥ १० ॥

स्थावरवधादपि निवृत्तिमुपपादयति—

यन्मुक्त्यङ्गमहिंसैव तन्मुमुक्षुरुपासक ।
एकाक्षवधमप्युज्झेद्यः स्यान्नावर्ज्यभोगकृत् ॥ ११ ॥

---

१ हिंसा द्वेधा प्रोक्ताऽऽरम्भानारम्भभेदतो दक्षै ।
गृहवासतो निवृत्तो द्वेधाऽपि त्रायते ता च ॥
गृहवासमेवनरतो मन्दकषाय प्रवर्तितारम्भ ।
आरम्भजा स हिंसा शक्नोति न रक्षितु नियतम् ॥

टीका— यवस्माद्भवति । किं तन्मुक्त्यङ्ग मोक्षसाधन । किं, अहिंसैव द्रव्यभावहिंसाविरमणमेव । तत्तस्मात् । वञ्झेत् त्यजेत् । कोऽसौ, उपासकः श्रावक । किंविशिष्टो, मुमुक्षु बुभुक्षोर्नास्ति नियम इति भाव । कम्, एकाक्षवधमपि त्रसहिंसामिव स्थावरहिंसामपि । य कि, य एकाक्षवध । न स्यात् । किंविशिष्ट , अवर्ज्यभोगकृत् अवर्ज्यानां वर्जयितुमशक्यानामावर्ज्यानां वा अर्जनीयाना भोगाना सेव्यार्थाना कारणम् ॥ ११ ॥

साङ्कल्पिकवध नियमयति–

गृहवासो विनाऽऽरम्भान्न चारम्भो विना वधात् ।
त्याज्यः स यत्नात्तन्मुख्यो दुस्त्यजस्त्वानुषङ्गिकः॥१२॥

टीका—न भवति । कोऽसौ, गृहवासो गेहाश्रम । कथ, विना । कस्मात् आरम्भात् कृष्यादिजीविनोपायात् । तथा न भवति । कोऽसौ, आरम्भ । कथ विना । कस्मात्, वधात्प्राण्युपमर्दनात् । यत एव तत्तस्मात्त्याज्य । कोऽसौ स वध. । किंविशिष्टो, मुख्य इम जन्तुमासाद्यर्थित्वेन हन्मीति सङ्कल्पप्र भव । कस्मात्, यत्नात् अवधानात् । तुर्विशेषे । तेन भवति । कोऽसौ, आरम्भ । किंविशिष्टा, दुस्त्यज त्यक्तुमशक्य । किंविशिष्ट , आनुषङ्गिक कृष्याद्यनुषङ्गो जात कृष्यादौ क्रियमाणे सम्भवतीत्यर्थ ॥ १२ ॥

प्रयत्नहेया हिंसामुपदिशति–

दुःखमुत्पद्यते जन्तोर्मनः संक्लिश्यतेऽस्यते ।
तत्पर्यायश्च यस्यां सा हिंसा हेया प्रयत्नत ॥ १३ ॥

---

१ जे तसकाया जीवा पुव्वुद्दिट्ठा ण हिंसिदव्वा ते ।
एगिंदियावि णिक्कारणेण पढम वद थूलम् ॥
स्तोकैकेन्द्रियघातात् गृहिणा सम्पन्नयोग्यविषयाणाम् ।
शेषस्थावरमारणविरमणमपि भवति कर्तव्यम् ॥
भूपय पवनाग्नीना तृणादीनां च हिंसनम् ।
यावत्प्रयोजन स्वस्य तावत्कुर्यादजन्तुजित् ॥

टीका—हेया त्याज्या गृहिणा । काऽसौ, हिंसा । कस्मात्, प्रयत्नत प्रणिधानेन । उत्पद्यते । किं, दु ख शारीर दु ख क्लेश । कस्य, जन्तोर्जीवस्य परजीवस्य वा । तथा सक्लिश्यते सन्तप्यते । किं तत् मनश्चित्त जन्तो । तथाऽस्यते विनाश्यते । कोऽसौ, तत्पर्याय स चासौ पर्यायश्च तत्पर्यायो वर्तमानभवग्रहणम् ॥ १३ ॥

अहिंसाणुव्रताराधनोपदेशार्थमित उत्तर प्रबन्धः । तत्र तावत्प्रयोक्तारमाश्रित्येदमुच्यते—

सन्तोषपोषतो यः स्यादल्पारम्भपरिग्रहः ।
भावशुद्ध्येकसर्गोऽसावहिंसाणुव्रतं भजेत् ॥ १४ ॥

टीका—भजेत् आराधयेत् । कोऽसौ, गृही । किं तत्, अहिंसाणुव्रतं । य किं, य स्यात् । किंविशिष्टोऽल्पारम्भपरिग्रह आरम्भश्च परिग्रहश्च ममदेमहमस्येति बुद्धिग्राह्यो भार्यार्थ्य आरम्भपरिग्रहौ, अल्पौ दुर्ध्यानप्रकर्षानुस्यादकौ आरम्भपरिग्रहौ यस्य स तथोक्त । कस्मात्, सन्तोषपोषतो धृतेःप्रकर्षात् । पुन किंविशिष्टो, भावशुद्ध्येकसर्गो मन शुद्धावेकाग्र ॥ १४ ॥

पञ्चातिचारान् परिहरन् वाड्मनोगुप्त्यादिभावनापञ्चकेनाहिंसाणुव्रतमुपयुञ्जीतेत्युपदिशति—

मुञ्चन् बन्धं बधच्छेदावतिभारादिरोपणम् ।
भुक्तिरोधं च दुर्भावाद्भावनाभिस्तदाविशेत् ॥ १५ ॥

टीका—आविशेदुपयुञ्जीत । कोऽसौ, व्रतिक किं तत् अहिंसाणुव्रत । काभिः भावनाभि वाग्गुप्त्या मनोगुप्त्या ईर्यास मित्या आदाननिक्षेपणसमित्या आलोकितपानभोजनेनेति पचभिरभ्यासविशिष्टै । किं कुर्वन् मुञ्चन् वर्जयन् । किं तत्, बन्धादिपञ्चक । कस्मात्, दुर्भावादिति समन्वय । वृत्तो विस्तर –बन्धो रज्वादिना गोमनुष्यादीना नियन्त्रण । स च पुत्रादीनामपि विनयग्रहणार्थ विधीयते अतो दुर्भावादित्युक्त । दुर्भाव दुष्परिणाम प्रबलकषायोदयमाश्रित्य क्रियमाणो यो बन्धस्त वर्जयन्नित्यर्थ । अत्राय विधि –बन्धो द्विपदाना चतुष्पदाना वा स्यात् । सोऽपि सार्थकोऽनर्थको वा तत्रानर्थकस्तावच्छ्रावकस्य कर्तुं न युज्यते

सार्थक पुनरसौ द्वेधा । सापेक्षो निरपेक्षश्च । तत्र सापेक्षो यो दामग्रन्थ्या दिना शिथिलेन चतुष्पादाना विधीयते यश्च प्रदीपनादिषु मोचयितु छेत्तु वा शक्येत । निरपेक्षो यन्निश्चलमत्यर्थममी बद्धयन्ते । द्विपदानां तु दामदासीचौरजारादिप्रमत्तपुत्रादीना यदा बन्धो विधीयते तदा सविक्रमणा एवामी बन्धनीया रक्षणीयाश्च यथाऽग्निभयादिषु न विनश्यन्ति । यद्वा द्विपदचतुष्पदा श्रावकेण त एव सग्राह्या ये बद्धा एव तिष्ठन्तीति प्रथमोऽतिचार । वधो दण्डकशाद्यभिघात । सोऽपि दुर्भावाद्विधीयमानो बन्धवदतिचार । यदि पुन कोऽपि न करोति विनय तदा त मर्माणि मुक्त्वा लतया दवरकेण वा सकृत् द्विवा ताडयेदिति द्वितीयोऽतिचार । छेद कर्णनासिकादीनामवयवानामपनयन । सोऽपि दुर्भावात्क्रियमाणोऽतिचारो निर्दय हस्तादीना छेद इत्यर्थ स्वास्थ्यापेक्षया तु गण्डत्रणादिच्छेदनदहनादिक सभावत्वेन कुर्वतोऽपि नातिचार स्यादिति तृतीय । अतिभारारोपण न्याय्यभारादतिरिक्तस्य वोढुमशक्यस्य भारस्यारोपण वृषभादीना पृष्ठस्कन्धादौ वाहनोपाधिरोपण । तदपि दुर्भावात्क्रोधाल्लोभाद्वा क्रियमाणमतिचार । अत्राप्यय विधि –श्रावकेण तावत् द्विपदादिवाहनेन जीविका प्रागेव मोक्तव्येत्येष श्रेष्ठ पक्ष अथान्योऽसौ न स्यात्तदा द्विपदो यावन्त भार स्वयमुत्क्षिपति अवतारयति च तावन्तमेव वा वाह्यते मोच्यते चोचितवेलायाम् । चतुष्पदस्य तु यथोचितभार किञ्चिदून क्रियते । हलशकटादिषु पुनरुचितवेलायामसौ मुच्यते इति चतुर्थ । भुक्तिरोधोऽन्नपानादिनिषेध । सोऽपि दुर्भावाद्बन्धवदतिचार । तीक्ष्णक्षुधादिपीडित प्राणी म्रियत इत्यन्नादिनिरोधो न कस्यापि कर्तव्य । अपराधकारिणि च वाचैव वदेदद्य ते न दास्यते भोजनादिकमिति । स्वभोजनवेलाया तु नियमत एवान्य भोजयित्वा स्वय भुञ्जीतान्यत्रोपवासचिकित्स्यज्वरादिव्याधितेभ्य । शान्तिनिमित्त चोपवासाद्यपि कारयेदिति पञ्चम । किंबहुना मूलगुणस्याहिंसालक्षणस्यातिचारो यथा न भवति तथा यतनया वर्तितव्यम् ॥ १५ ॥

उक्तमेवार्थं मुग्धधिया सुखस्मृत्यर्थं किञ्चिदुपसगृह्याह—

गवाद्यैर्नैष्ठिको वृत्ति त्यजेद्बन्धादिना विना ।
भोग्यान् वा तानुपेयात्तं योजयेद्वा न निर्दयम् ॥ १६ ॥

टीका--त्यजेद्वर्जयेत्। कोऽसौ, नैष्ठिक। पाक्षिकस्य तु नास्ति नियम। का, वृत्ति जीवनार्थं व्यापार। कै, गवाद्यैर्गोमहिषतुरगादिभि। एष प्रशस्यतम पक्ष। वा अथवा। उपेयात् परिगृह्णीयात् नैष्ठिक। कान्, एतान् गवादीन्। किंविशिष्टान्, भोग्यान् वाहदोहादावुपयोक्तु शक्तान्। कथ, विना केन, बन्धादिना नियन्त्रणताडनादिना एष मध्यम पक्ष। अथवा न योजयेत् स्वयमन्येन वा न विधापयेत् नैष्ठिक। क, त बन्धादि। कथ, निर्दय। एषोऽधम पक्ष। 'व्रतानि पुण्याय भवन्ति जन्तो---र्न सातिचाराणि निषेवितानि। सस्यानि किं क्वापि फलन्ति लोके मलोपलीढानि कदाचनापि॥ अत्राह कश्चित्—ननु हिंसैव श्रावकेण प्रत्याख्याता न बन्धादय ततस्तत्करणेऽपि न दोषो हिंसाविरतेरखण्डितत्वात्। अथ बन्धादयोऽपि प्रत्याख्यातास्तदा तत्करणे व्रतभङ्ग एव विरतिखण्डनात्। किं च वधादीना प्रत्याख्येयत्वे व्रतेयत्ता विशीर्येत प्रतिव्रतमतिचारव्रतानामाधिक्यादिति। एवं च न बन्धादीनामतिचारतेति। अत्रोच्यते। सत्यमहिंसैव प्रत्याख्याता न बन्धादय। केवल तत्प्रत्याख्यानेऽर्थतस्तेऽपि प्रत्याख्याता द्रष्टव्या हिंसोपायत्वात्तेषा। न च बन्धादिकारणेऽपि व्रतभङ्ग किन्त्वतीचार एव। कथ? द्विविध हि व्रत अन्तर्वृत्त्या बहिर्वृत्त्या च, तत्र मारयामीति विकल्पाभावेन यदा कोपाद्यावेशात्परप्राणप्रहाणमविगणयन् बन्धादौ प्रवर्तते न च हिंसा भवति तदा निर्दयताविरत्यनपेक्षतया प्रवृत्तत्वेनान्तर्वृत्त्या व्रतस्य भङ्गो हिंसाया अभावाद्बहिर्वृत्त्या पालनमिति देशस्य भङ्गजननाद्देशस्यैव पालनादतिचारव्यपदेश प्रवर्तते। तदुक्त --"न मारयामीति कृतव्रतस्य विनैव मृत्यु क इहातिचार। निगद्यते य कुपित वधादीन करोत्यसौ स्यान्नियमानपेक्ष॥ मृत्योरभावान्नियमोऽस्ति तस्य कोपाद्दयाहीनतया हि भङ्ग। देशस्य भङ्गादनुपालनाच्च पूज्या अतीचारमुदाहरन्ति॥' यच्चोक्त व्रतेयत्ता विशीर्येतेति तदयुक्त विशुद्धाहिंसासद्भावे हि बन्धादीनामभाव एवात स्थितमेतत् बन्धादयोऽतिचारा एवेति॥

एतदेव सगृह्णन्नाह—

न हन्मीति व्रतं क्रुध्यान्निर्दयत्वान्न पाति न।
भनक्त्यघ्नन् देशभङ्गत्राणात्त्वतिचरत्यधीः॥ १७॥

टीका—न पाति न पालयति। कोऽसौ, अधीरस्त्रोऽस्मीद्यकारी। किं सन्, न हन्मीति व्रत न मारयामीति नियम। किं कुर्वन्, कुप्यन् प्रणावेश गच्छन्। कुतो न पाति, निर्दयत्वात् करुणारहितत्वात्। तथा न भनक्ति न नाशयति। काऽसौ, अधी। किं तत्, न हन्मीति व्रत। किं कुर्वन्,–अध्नन् प्राणैर्वियोजयन्। किं तर्हि करोतीत्याह—अतिचरति व्रतमतिक्रम्याधिवर्तते। तु पुन। कस्मात्, देशभङ्गत्राणात् भङ्गश्च त्राण च भङ्गत्राण देशस्यान्तर्बहिर्वृत्त्युभयरूपव्रतैकदेशस्य भङ्गत्राणमन्तर्वृत्त्या भञ्जन बहिर्वृत्त्या च पालन तस्मात्॥ १७॥

अतिचरतीति पदार्थमभिव्यक्तु युक्तिरोधन चेत्यत्र चशब्देन समुचित पाति चारजात वर्णमाह—

सापेक्षस्य व्रते हि स्यादतिचारोंऽशभञ्जनम्।
मन्त्रतन्त्रप्रयोगाद्याः परेऽप्यूह्यास्तथाऽत्ययाः॥ १८॥

टीका—हि यस्मात्। स्याद्भवेत्। कोऽसौ, अतिचार। किं स्यादशभञ्जन अन्तर्वृत्त्या बहिर्वृत्त्या वा खण्डन। कस्य, सापेक्षस्य। क, व्रते प्रतिपन्नमहिंसाव्रत न भनज्मीति अपेक्षमाणस्य पुम। तथा ऊह्या वितर्क्या। क, अत्यया अतीचारा। किंविशिष्टा, मन्त्रतन्त्रप्रयोगाद्या मन्त्र इष्टकर्मसाधनसमर्थ पठितसिद्धोऽक्षरपिण्ड, तन्त्र सिद्धौषधिक्रिया मन्त्रश्च तन्त्र च मन्त्रतन्त्रे तयो प्रयोगो विधिवत्कर्मणि व्यापारण स आद्यो येषां ध्यानादीनां ते मन्त्रतन्त्रप्रयोगाद्या गतिस्तम्भमतिस्तम्भोच्चाटनादिदुष्टकर्मसाधनहेतव, न केवल ते परेऽपि शास्त्रान्तरनिर्दिष्टाश्च। कथमूह्या। तथा तेन व्रतापेक्षापूर्वक तदेकदेशभञ्जनलक्षणेन प्रकारेण मन्त्रादिकृत॥ १८॥

बन्धादीनामतिचारत्वसमर्थनपुरस्सरमतिचारपरिहारे यत्न कारयन्नाह—

मन्त्रादिनाऽपि बन्धादिः कृतो रज्ज्वादिवन्मलः।
तत्तथा यतनीयं स्यान्न यथा मलिनं व्रतम्॥ १९॥

टीका—भवति। कोऽसौ, बन्धादि बन्धनताडनादि। किं स्यात् मल योदितशुद्धिप्रतिबन्धित्वादहिंसाणुव्रतातिचार स्यात्तदेकदेशभञ्जकत्वाविशेषा

त् । किंविशिष्ट, कृतो विहितः । केन, मन्त्रादिना मन्त्रतन्त्रादिना, न केवलं रज्वादिनेत्यपिशब्दार्थ । केनेव, रज्वादिवत् पाशकशादिना यथा । तत्तस्मा-द्यतनीयं मैत्र्यादिभावनालक्षणया प्रमादपरिहारपूर्वकचेष्टारूपया च यतनया वर्तितव्यं । कथं, तथा तेन विशुद्धाध्यवसायलक्षणेन प्रकारेण । यथा किं, यथा न स्यात् । किं तत्, व्रतं । किंविशिष्टं, मलिनं सातिचारम् ॥ १९ ॥

अहिंसाणुव्रतस्वीकारविधिमाह—

हिंस्यहिंसकहिंसातत्फलान्यालोच्य तत्त्वतः ।
हिंसां तथोज्झेन्न यथा प्रतिज्ञाभङ्गमाप्नुयात् ॥ २० ॥

टीका—उज्झेत् वर्जयेत् । कोऽसौ, श्रावक । कां, हिंसां । कथ, तथा तेन स्वशक्त्यनुसारलक्षणेन प्रकारेण । किं कृत्वा, आलोच्य गुरुसधर्मश्रेयोऽर्थिभि. सह विमृश्य । कानि, हिंस्यहिंसकहिंसातत्फलानि । वध्यवधकवधतत्साध्यानि । कस्मात्, तत्त्वत याथात्म्येन ।यथा किं, यथा नाप्नुयात् । कोऽसौ, व्रती प्रतिपन्नव्रत । कं, प्रतिज्ञाभङ्गं नियमखण्डनम् ॥ २० ॥

हिंसकादीँल्लक्षयति—

प्रमत्तो हिंसको हिंस्या द्रव्यभावस्वभावकाः ।
प्राणास्तद्विच्छिदा हिंसा तत्फलं पापसञ्चयः ॥ २१ ॥

टीका—भवति । कोऽसौ, हिंसक । किंरूपः, प्रमत्त कषायाद्याविष्ट । प्रपञ्चित चैतदहिंसामहाव्रतोपदेशप्रस्तावे प्रागिति न पुनरिह प्रपंच्यते । तथा भवन्ति । के, हिंस्या प्राणा । किमात्मानो,द्रव्यभावस्वभावका द्रव्यात्मकाः पुद्गलविवर्तरूपा भावात्मकाश्च चित्परिणामलक्षणा. । तथा भवति । काऽसौ, हिंसा । किंलक्षणा, तद्विच्छिदा तेषां द्रव्यभावप्राणानां वियोगकारणं । तथा भवति । किं तत्, तत्फलं हिंसासाध्य । किं, पापसञ्चय दुष्कर्मबन्ध ॥२१॥

गृहिणोऽप्यहिंसाव्रतनैर्मल्याय विधिविशेषमाह—

कषायविकथानिद्राप्रणयाक्षविनिग्रहात् ।
नित्योदयां दयां कुर्यात्पापध्वान्तरविप्रभाम् ॥ २२ ॥

टीका—कुर्यात् । कोऽसौ, अहिंसाणुव्रतनैर्मल्यार्थी । कां, दयामनुकम्पा । किंविशिष्टां, नित्योदयां अविच्छिन्नोल्लासां । पुन किंविशिष्टां, पापध्वान्तरविप्रभां पापं बन्धाद्यतिचारदुष्कृत तत् ध्वान्तमिव पुण्यप्रकाशविरोधित्वात् तत्र रविप्रभावात्तदनवगाह्यत्वात् । कस्मात्, कषायेत्यादि—कषायाः क्रोधादय , विकथा मार्गविरुद्धा कथा., निद्रा भुक्तान्नपरिणामहेतुः स्वापः, प्रणयो मोहः स्नेहानुबन्धान्ममायमिति ग्रह , अक्षाणि स्पर्शादिविषयरागद्वेषपरिणतानीन्द्रियाणि, तेषा पञ्चदशप्रमादानां विनिग्रहात् विधिपूर्वकनिग्रहात् । अत्र मार्गविरुद्धा कथाः भक्तस्त्रीदेशराजसम्बन्धिन्यः । तत्र भक्तकथा—इद चेद् श्यामाकपायमोदकादि साधु भोज्य, साध्वनेन भुज्यते, अहमपि चेद भोक्ष्ये इत्यादिरूपा । तथा स्त्रीकथा स्त्रीणां नेपथ्याङ्गहारहावभावादिवर्णनरूपा 'कर्णाटी सुरतोपचारचतुरा' लाटी विदग्धा प्रियेत्यादिरूपा वा । तथा देशकथा—दक्षिणपथ प्रचुरान्नपानस्त्रीसम्भोगप्रधान , पूर्वदेशो विचित्रवस्त्रगुडखण्डशाल्मिद्यादिप्रधान , उत्तरापथे शूरा पुरुषा ,जविनो वाजिनो, गोधूमप्रधानानि धान्यानि, सुलभं कुंकुमं, मधुराणि द्राक्षादाडिमकपित्थादीनि, पश्चिमदेशे सुखस्पर्शानि वस्त्राणि सुलभा इक्षव , सित वारीत्येवमादि । राजकथा—शूरोऽस्मदीयो राजा सधन शौण्ड गजपतिर्गौड , अश्वपतिस्तुरुष्क इत्यादिरूपा । एवं प्रतिकूला अपि भक्तादिकथा वाच्याः । यदा तु रागद्वेषावनास्कन्दन् धर्मकथाङ्गत्वेन अर्थकामकथा. कथयति तदा न विकथिक स्यात् । एव प्रणयस्यापि धर्मविरोधित्वेनैव प्रमादत्वं बोध्यम् ॥ २२ ॥

गृहस्थस्याहिंसादुष्परिपाल्यत्वशङ्कामपाकरोति—

विष्वग्जीवचिते लोके क्व चरन् कोऽप्यमोक्षत ।
भावैकसाधनौ बन्धमोक्षौ चेन्नाभविष्यताम् ॥ २२ ॥

---

१ पुण्यं तेजोमयं प्राहु· प्राहु पापं तमोमयम् ।
तत्पापं पुंसि किं तिष्ठेद्दयादीधितिमालिनि ॥
स्नेहानुविद्धहृदयो ज्ञानचरित्रान्वितोऽपि न श्लाघ्य ।
दीप इवापादयिता कज्जलमालिनस्य कार्यस्य ॥

टीका—अमोक्ष्यत मोक्षमगमिष्यत् । कोऽसौ, कोऽपि मुमुक्षु । किं कुर्वन् चरन् चेष्टमान । कस्मिन् क्व न क्वापि प्रदेशे । कस्मिन्, लोके जगति । किंविशिष्टे, निरन्तरजीवचिते समन्तात्तुल्याप्ते । चेद्यदि वा नाभविष्यता नाजनिष्यता । कौ, बन्धमोक्षौ । किंविशिष्टौ, भविकसाधनौ भाव परिणाम एकमुत्कृष्ट प्रधान साधन निमित्त ययो । तत्र शुभाशुभोपयोगौ पुण्यापापरूपबन्धस्य शुद्धोपयोगश्च मोक्षस्य प्रधान कारणमिति विभाग ॥२३॥

एवमतिचारपरिहारद्वारेणाहिंसाणुव्रतपरिपालनमुपदिश्य साम्प्रत रात्रिभोजनवर्जनव्रतबलेन तदुपदिशन्नाह—

अहिंसाव्रतरक्षार्थं मूलव्रतविशुद्धये ।
नक्तं भुक्तिं चतुर्धाऽपि सदा धीरस्त्रिधा त्यजेत् ॥२४॥

टीका—त्यजेत् । कोऽसौ, व्रती । कां, भुक्तिं भोजन । कतिधा, चतुर्धाऽपि अन्नपानखाद्यलेह्यप्रकारमपि । कदा, नक्त रात्रौ । कथ, सदा सर्वदा यावज्जीव । कथ, त्रिधा मनोवाक्कायै । किंविशिष्ट सन्, धीर परीषहाद्युपसर्गै रक्षोभ्य सत्त्वभावनानिष्ठ इत्यर्थ । किमर्थं अहिंसाव्रतरक्षार्थं मूलव्रतविशुद्धये च मूलगुणानिर्मलीकर्तुमहिंसाणुव्रत च रक्षितुमित्यर्थ ॥ २४ ॥

दृष्टादृष्टदोषभूयिष्ठमपि रात्रिभोजनमाचरन्त वक्रभणित्या तिरस्कुर्वन्नाह—

जलोदरादिकृद्यूकाद्यङ्कमप्रेक्ष्यजन्तुकम् ।
प्रेताद्युच्छिष्टमुत्सृष्टमप्यश्नन्निश्यहो सुखी ॥ २५ ॥

टीका—अहा आश्चर्यं कष्ट च । भवति । कोऽसौ, जन । किंविशिष्ट, सुखी सुखिनमात्मान मन्यते इहामुत्र च दु खभागेव भवतीति भाव । किं कुर्वन्, अश्नन् भाज्यमाहरन् । क्व, निशि रात्रौ । किंविशिष्टम् जलोदरादिकृद्यूकाद्यङ्कमपि अपिशब्दोऽन्तर्दीपकत्वाच्चतुर्भिरपि विशेषणै सम्बध्यते । जलोदरमादिर्येषा कुष्ठादीनामपायाना तान् कुर्वन्तीति तत्कृतो जलोदरादिहेतवस्ते च ते यूकादयश्च यूकामर्कटिकादयस्ते तथाविधा अङ्का कलङ्का अङ्के वा उत्सङ्गे मध्ये यस्यान्नपानादेर्भोज्यवस्तुनस्तथोक्त । तत्र यूका । भोजनेन सह भुक्ता जलोदर करोति, कोलिक कुष्ठ, मक्षिका छर्दि, मक्षिका मदोहानि

व्यञ्जनान्तःपतितो वृश्चिकस्तालुव्यथां, कण्टकं काष्ठखण्डं वा गलव्यथां, वालश्च गले लग्नः स्वरभङ्गमित्याद्यो दृष्टदोषा भर्वेषां प्रतीतिकरा, रात्रिभोजने सम्भवन्ति। तथा अप्रेक्ष्यजन्तुकमपि अप्रेक्ष्यास्तमसा छन्नत्वाद्द्रष्टुमशक्या जन्तुका अल्पजन्तवः सूक्ष्मजीवा. कुन्थ्वादयो जलघृतादिमध्ये पतिताः मोदकखर्जूराद्यनुपङ्गिणो वा यत्र तत्तथोक्तं। किं च। निशि भोजने क्रियमाणेऽवश्यं पापः सम्भवति। तत्र च षड्जीवनिकायवधोऽवश्यम्भावी। भाजनधावनादौ च जलगतजन्तुविनाशो जलोज्झने च भूमिगतकुन्थुपिपीलिकादिजन्तुघातश्च संभवति। तथा प्रेताद्युच्छिष्टमपि प्रेता अधमव्यन्तरा आद्यो येषां *पिशाचराक्षसादीनां तैरुच्छिष्टं स्पर्शादिना अभोज्यतां नीतं।* एते पूर्वे चादृष्टदोषा। तथा उत्सृष्टमपि प्रत्याख्यातमपि वस्तु घोरान्धकाररुद्धदृशा तदुपलक्षणामसम्भवादेपोऽप्यदृष्टो दोषः ॥ २५ ॥

वनमालादृष्टान्तेन रात्रिभोजनदोषस्य महत्तां दर्शयति—

त्वां यद्युपैमि न पुनः सुनिवेश्य रामं
लिप्ये वधादिकृदघैस्तदिति श्रितोऽपि।
सौमित्रिरन्यशपथान्वनमालयैकं
दोषाशिदोषशपथं किल कारितोऽस्मिन् ॥ २६ ॥

टीका—किल रामायणे ह्येवं श्रूयते। कारितो विधापितः। कोऽसौ, सौमित्रिर्लक्ष्मणः। कया, वनमालया स्वभार्यया। कं, दोषाशिदोषशपथं दोषाशिनो रात्रिभोजिनो दोषो महापातकाख्य तेन लिप्येऽहमिति शपथं। *किंविशिष्टम्*, एकं शपथान्तररहितं। क, अस्मिन् लोके। किंविशिष्टोऽपि, श्रितोऽपि प्रतिपन्नोऽपि। कान्, अन्यशपथान् शपथान्तराणि। कथं, इति अनेन प्रकारेण। यदि नोपैमि नागच्छामि। का, त्वां। कथं, पुनर्व्याघुट्य किं कृत्वा, सुनिवेश्य सुस्थवस्थितं कृत्वा। कं, रामं। तत् ततः। *लिप्ये* संयुज्येऽहं। कैः कर्तृभिः, वधादिकृदघैः गोस्त्र्यादिघातकादिपापैः। तत्कथा *यथा—लक्ष्मणो दशरथपितुर्निदेशात्सह रामेण सीतया च दक्षिणापथे प्रस्थितो*ऽन्तरा कूबेरनगरे महीधरराजतनयां वनमालां परिणीतवान्। ततश्च रामेण

सह परतो देशान्तर यियासन् स्वभार्या वनमाला प्रति मोचयति स्म । सा तु तद्विरहकातरा पुनरागमनमसम्भावयन्ती लक्ष्मण शपथानकारयत् । यथा प्रिये राम मनीषिते देशे परिसंस्थाप्य यद्यह भवतीं स्वदर्शनेन न प्रीणयामि तदा प्राणातिपातादिपातकिना गतिं यामीति । सा तु तै शपथैर तुष्यन्ती यदि रात्रिभोजनकारिणा शपथ करोषि तदा त्वां प्रति मुञ्चामि नान्यथेति । स च तथेत्यभ्युपगत्य देशान्तर प्रस्थितवानिति ॥ २६ ॥

लौकिकसवाददर्शनेनापि रात्रिभोजनप्रतिषेधमाह—

यत्र सत्पात्रदानादि किञ्चित्सत्कर्म नेष्यते ।
कोऽद्यात्तत्रात्ययमये स्वहितैषी दिनात्यये ॥ २७ ॥

टीका—क, स्वहितैषी आत्मनो लोकद्वयेऽपि पथ्यमिच्छु । अद्यात्, न कश्चित्स्वहितैषी भुञ्जीतत्यर्थ । क्व, तत्र दिनात्यये रात्रिसमये । किंविशिष्टे, अत्ययमये दोषभूयिष्ठे दोषनिवृत्ते वा । यत्र किं, यत्र नेष्यते बाह्यैरपि नाभिमन्यते । कि तत्, सत्कर्म शुभक्रिया । किंविशिष्ट किञ्चित् किमपि । कि पुन सर्वे । किंविशिष्ट तत्, सत्पात्रदानादि सत्पात्रदान स्नान देवार्चन माहुति श्राद्ध विशेषतो भोजन च ॥ २७ ॥

दिनरात्रिभोजनद्वारेण पुंसाम्मुत्तममध्यमजघन्यभावमाह—

भुञ्जतेऽह्नः सकृद्वर्या द्विर्मध्याःपशुवत्परे।
रात्र्यहस्तद्व्रतगुणान् ब्रह्मोद्यानावगामुकाः ॥ २८ ॥

टीका—भुञ्जते अश्नन्ति । के ते, वर्या उत्तमा शुभकर्मणोल्बण । कथ, सकृत् एकवार । कस्य, अह्नो दिनस्य मध्ये । तथा भुञ्जते । के मध्या मध्यमा शुभक्रियाभिरनुत्तमाधमा । कथ, द्वि द्विवार । कस्य अह्न तथा परे अधमा पापकर्माण । भुञ्जते । किवत्, पशुवत् गोमहिषादिभिस्तुल्य । कथ, रात्र्यह नक्तदिन । किंविशिष्टा सन्तो नावगामुका अजानाना । कान्, तद्व्रतगुणान् रात्रिभोजनवर्जनोपकारकधर्मान् । किंविशिष्टान् ब्रह्मोद्यान् सर्वज्ञप्रतिपाद्यान् ॥ २८ ॥

शास्त्रनिदर्शनं विना सकलजनानुभवसिद्धं रात्रिभोजननिवृत्तिफलविशेषमाह—

योऽत्ति त्यजन् दिनाद्यन्तमुहूर्तौ रात्रिवत्सदा ।
स वर्ण्येतोपवासेन स्वजन्मार्द्धं नयन् कियत् ॥ २९ ॥

टीका—योऽत्ति भोजनं करोति । किं कुर्वन्, त्यजन् वर्जयन् । कौ, दिनाद्यन्तमुहूर्तौ दिवसस्यादावन्ते च द्वे द्वे घटिके । किंवत् रात्रिवत् रात्रिं यथा । कथं, सदा नित्यं । स कियत् कियन्मात्रं वर्ण्येत स्तूयेत सद्भिः । किं कुर्वन्, नयन् गमयन् । किं तत्, स्वजन्मार्धं अर्धं निजं जन्म । केन, उपवासेन चतुर्विधाहारपरिहारेण । समांशे विषमांशे वाऽत्रार्धशब्दो व्याख्येयः ॥ २९ ॥

अथ रात्रिभोजनवर्जनवन्मूलव्रतविशुद्ध्यङ्गत्वादहिंसाव्रतरक्षाङ्गत्वाच्च श्रावकस्य भोजनान्तरायान् श्लोकचतुष्टयेन व्याचष्टे—

अतिप्रसङ्गमसितुं परिवर्धयितुं तपः ।
व्रतबीजवृतीर्भुक्तेरन्तरायान् गृही श्रयेत् ॥ ३० ॥

टीका—श्रयेत् प्रतिपद्येत । कोऽसौ गृही व्रतिको गृहस्थः । कान्, अन्तरायान् । कस्याः, भुक्तेः भोजनवर्जनहेतूनित्यर्थः । किंविशिष्टान् व्रतबीजवृतीः बीजस्येव व्रतानामवष्टम्भकान् रक्षोपायत्वात् अहिंसाणुव्रतरक्षाभूतानित्यर्थः । किं कुर्वन् कर्तुं, असितुं क्षेप्तुं । कम्, अतिप्रसङ्गं विहितातिक्रमणोपर्युपरि प्रवृत्तिं । तथा परिवर्द्धयितुं समन्तादुपचेतुं । किं तत्, तपः इच्छानिरोधम् ॥ ३० ॥

तानेव श्लोकत्रयेण विशदतया निर्दिश्य विवृणोति—

दृष्ट्वाऽऽर्द्रचर्मास्थिसुरामांसासृक्पूयपूर्वकम् ।
स्पृष्ट्वा रजस्वलाशुष्कचर्मास्थिशुनकादिकम् ॥ ३१ ॥
श्रुत्वाऽतिकर्कशाक्रन्दविड्वरप्रायनिःस्वनम् ।
भुक्त्वा नियमितं वस्तु भोज्येऽशक्यविवेचनैः ॥ ३२ ॥

संसृष्टे सति जीवद्भिर्जीवैर्वा बहुभिर्मृतैः ।
इदं मांसमिति दृष्टसङ्कल्पे चाशनं त्यजेत् ॥ ३३ ॥

टीका--त्यजेत् । कोऽसौ, व्रतिक । किं तत् अशन तात्कालिकमेवाहार, न तु वैकालिकादिक । किं कृत्वा, दृष्ट्वा स्पृष्ट्वा चेत्यपि द्रष्टव्य । किं तत्, आर्द्रेत्यादि—आर्द्रमशुष्क चर्माजिन, अस्थि च कीकस, तथा सुरा मद्य, मास पिशित, असृक शोणित, पूय व्रणादिगत पक्कासृक्, पूर्वेश=दाद्दशाद्यादि तथा स्पृष्ट्वा । किं तत्, रजस्वला पुष्पवती स्त्री, शुष्के चर्मास्थिनी, शुनक श्वान, आदिशब्देन मार्जारश्वपचादि । तथा श्रुत्वा आकर्ण्य । कम् अतिक-र्कशनि स्वन अस्य मस्तक छिन्धि इत्यादिरूप आक्रन्दनि स्वन हाहेत्याद्या र्तस्वरस्वभाव, विड्वरप्रायनि स्वन परचक्रागमनादिप्रदीपनादिविषय । तथा भुक्त्वा आशित्वा । किं तत्, वस्तु । किंविशिष्ट, नियमित प्रत्याख्यात । तथा अशन त्यजेत् । क सति, भाज्ये भोक्तव्ये द्रव्ये सति । किंविशिष्टे, ससृष्टे मिलिते । कै, जीवै द्वित्रिचतुरिन्द्रियप्राणिभि । किं कुर्वद्भि, जीवद्भि प्राणद्भि । किंविशिष्टै सद्भि, अशक्यविवेचनै भोज्यद्रव्यात्पृथक्कर्तुमशक्यै । वा अथवा ससृष्टे । कै मृतैर्जीवै । कतिभि बहुभिस्त्रिचतुरादिभि । तथा । इदमित्यादि इद भुज्यमान वस्तु मास सादृश्यात् इद रुधिरमिदमस्थ्यय सर्प इत्यादिरूपेण मनसा विकल्प्यमाने भोज्यवस्तुनीत्यर्थ ॥ ३३ ॥

अथाहिंसाणुव्रतशालित्वेन मौनव्रत व्याचिख्यासु पद्मश्लोकीमाह—

गृध्यै हुङ्कारादिसञ्ज्ञा संक्लेशं च पुरोऽनु च ।
मुञ्चन् मौनमदन् कुर्यात्तपःसंयमबृंहणम् ॥ ३४ ॥

टीका-कुर्याद् व्रतिक । किं तत्, मौनमजल्पन । किं कुर्वन् अदन् भोजन कुर्वन् । पुन किं कुर्वन्, मुञ्चन् वर्जयन् । का, हुङ्कारादिसञ्ज्ञा हुङ्कारखात्का रभ्रूसूधांगुलिचलनादिभि स्वाभिप्रायज्ञापन । कस्यै गृध्यै इष्टभोज्यार्थं । तन्निषेधार्थं तु हुङ्कारादिना सञ्ज्ञाकरणे अपि न दोष । अथवा गृध्यै भोज-

१ हुकारागुलिखात्कारभ्रूमूर्धचलनादिभि ।
मौन विदधता सज्ञा विधातव्या न गृद्धये ॥
भ्रूनेत्रहुकारकरागुलीभिर्गृद्धिप्रवृत्यै परिवर्ज्य सञ्ज्ञाम् ।
करोति भुक्ति विजिताक्षवृत्ति स शुद्धमौनव्रतवृद्धिकारी ॥

शास्त्रनिदर्शनं विना सकलजनानुभवसिद्धं रात्रिभोजननिवृत्तिफलवि-
शेषमाह—

> योऽत्ति त्यजन् दिनाद्यन्तमुहूर्तौ रात्रिवत्सदा ।
> स वर्ण्येतोपवासेन स्वजन्मार्द्धं नयन् कियत् ॥ २९ ॥

टीका—योऽत्ति भोजनं करोति । किं कुर्वन्, त्यजन् वर्जयन् । कौ, दिनाद्यन्तमुहूर्तौ दिवसस्यादावन्ते च द्वे द्वे घटिके । किंवत्, रात्रिवत् रात्रिं यथा । कथं, सदा नित्यं । स कियत् कियन्मात्रं वर्ण्येत स्तूयेत सद्भिः । किं कुर्वन्, नयन् गमयन् । किं तत्, स्वजन्मार्धं अर्धं निजं जन्म । केन, उपवासेन चतुर्विधाहारपरिहारेण । समासे विग्रहे वाऽर्द्धशब्दो व्याख्येय ॥ २९ ॥

अथ रात्रिभोजनवर्जनवन्मूलव्रतविशुद्ध्यङ्गत्वादहिंसाव्रतरक्षाङ्गत्वाच्च श्रावकस्य भोजनान्तरायान् श्लोकचतुष्टयेन व्याचष्टे—

> अतिप्रसङ्गमसितुं परिवर्धयितुं तपः ।
> व्रतबीजवृतीर्भुक्तेरन्तरायान् गृही श्रयेत् ॥ ३० ॥

टीका श्रयेत् प्रतिपद्येत । कोऽसौ गृही प्रतिको गृहस्थः । कान्, अन्तरायान् । कस्या, भुक्ते भोजनवर्जनहेतूनित्यर्थः । किंविशिष्टान् व्रतबीजवृती बीजस्येव व्रतानामावरकान् रक्षोपायत्वात् अहिंसाणुव्रतशालिभूतानित्यर्थः । किं कुर्वन् यष्टुं असितुं त्यक्तुं । कम्, अतिप्रसङ्गं विहितातिक्रमणोपर्युपरि प्रवृत्तिं । तथा परिवर्द्धयितुं समन्तादुपचेतुं । किं तत्, तपः इच्छानिरोधम् ॥ ३० ॥

तानेव श्लोकत्रयेण विशेषणानि निर्दिष्टं विवृणाति—

> दृष्ट्वाऽऽर्द्रचर्मास्थिसुरामांसासृक्पूयपूर्वकम् ।
> स्पृष्ट्वा रजस्वलाशुष्कचर्मास्थिशुनकादिकम् ॥ ३१ ॥
> श्रुत्वाऽतिकर्कशाक्रन्दविड्वरप्रायनिःस्वनम् ।
> भुक्त्वा नियमितं वस्तु भोज्येऽशक्यविवेचनैः ॥ ३२ ॥

संसृष्टे सति जीवद्भिर्जीवैर्वा बहुभिर्मृतैः ।
इदं मांसमिति दृष्टसङ्कल्पे चाशनं त्यजेत् ॥ ३३ ॥

टीका--त्यजेत् । कोऽसौ, व्रतिक । किं तत्, अशन तात्कालिकमेवाहारं, न तु वैकालिकादिक । किं कृत्वा, दृष्ट्वा स्पृष्ट्वा चेत्यपि द्रष्टव्य । किं तत्, आर्द्रेत्यादि—आर्द्रमशुष्क चर्माजिन, अस्थि च काकस, तथा सुरा मद्य, मास पिशित, असृक् शोणित, पूय व्रणादिगत पद्मसृक्, पूर्वशब्दाद्दृशाग्रादि तथा स्पृष्ट्वा । किं तत्, रजस्वला पुष्पवतीं स्त्रीं, शुष्के चर्मास्थिनी, शुनकं श्वान, आदिशब्देन मार्जारश्वपचादि । तथा श्रुत्वा आकर्ण्य । कम् अतिकर्कशानि स्वन अस्य मस्तक छिन्धि इत्यादिरूप, आक्र दनि स्वन हाहेत्याद्या र्तस्वरस्वभाव, विड्वरप्रायनि स्वन परचक्रागमनातङ्कप्रदीपनादिविषय । तथा भुक्त्वा आशित्वा । किं तत्, वस्तु । किंविशिष्ट, नियमित प्रत्याख्यात । तथा अशन त्यजेत् । क सति, भोज्ये भोक्तव्ये द्रव्ये सति । किंविशिष्टे, ससृष्टे मिलिते । कै , जीवै द्वित्रिचतुरिन्द्रियप्राणिभि । किं कुर्वद्भि , जीवद्भि प्राणद्भि । किंविशिष्टै सद्भि , अशक्यविवेचनै भोज्यद्रव्यात्पृथक्कर्तुमशक्यै । वा अथवा ससृष्टे । कै ,मृतैर्जीवै । कतिभि , बहुभिस्त्रिचतुरादिभि । तथा । इदमित्यादि इद भुज्यमान वस्तु मास सादृश्यात् इद रुधिरमिदमस्थ्यय सर्प इत्यादिरूपेण मनसा विकल्प्यमाने भोज्यवस्तुनीत्यर्थ ॥ ३३ ॥

अथाहिंसाणुव्रतशीलत्वेन मौनव्रत व्याचिख्यासु पञ्चश्लोकीमाह—

गृध्यै हुङ्कारादिसञ्ज्ञा संक्लेशं च पुरोऽनु च ।
मुञ्चन् मौनमदन् कुर्यात्तपःसंयमबृंहणम् ॥ ३४ ॥

टीका–कुर्याद् व्रतिक । किं तत् , मौनमजल्पन । कि कुर्वन्,अदन् भोजन कुर्वन् । पुन किं कुर्वन्, मुञ्चन् वर्जयन् । का, हुङ्कारादिसञ्ज्ञा हुङ्कारखात्कारभ्रूमूर्धाङ्गुलिचलनादिभि स्वाभिप्रायज्ञापन । कस्यै, गृध्यै इष्टभोज्यार्थं । तन्निषेधार्थं तु हुङ्कारादिना सञ्ज्ञाकरणे अपि न दोष । अथवा गृध्यै भोज-

१ हुङ्काराङ्गुलिखात्कारभ्रूमूर्धचलनादिभि ।
मौन विदधता सज्ञा विधातव्या न गृद्धये ॥
भ्रूनेत्रहुंकारकराङ्गुलीभिर्गृद्धिप्रवृत्त्यै परिवर्ज्य सज्ञाम् ।
करोति भुक्ति विजिताक्षवृत्ति स शुद्धमौनव्रतवृद्धिकारी ॥

नाभिकांक्षाप्रवृत्त्यर्थं । तथा मुञ्चन् । कं, संक्लेशं कोपदैन्याद्यविशुद्धपरिणामं । कथं, पुराऽनु च पूर्वं पश्चाच्च । किंविशिष्टं मौनं, तपःसंयमबृंहणं इच्छानिरोधस्य प्राणेन्द्रियसंयमस्य च पुष्टिकरम् ॥ ३४ ॥

मौनस्य तपोवर्द्धकत्वं श्रेयःसञ्चायकत्वं च श्लोकद्वयेन समर्थयते—

अभिमानावने गृद्धि–रोधाद्वर्धयते तपः ।
मौनं तनोति श्रेयश्च–श्रुतप्रश्रयतायनात् ॥ ३५ ॥

टीका—वर्धयते । किं तत्, मौनं । किं, तपः । कस्मिन्निमित्ते सति, अभिमानावने अयाचकत्वव्रतरक्षायां सत्यां । तथा गृद्धिरोधात् भोजनलौल्यप्रतिबन्धाद्धेतोः । तथा तनोति स्फातीकरोति । किं तत्, मौनं । किं, श्रेयः पुण्यं । कस्मात्, श्रुतप्रश्रयतायनात् श्रुतज्ञानविनयानुबन्धात् ॥ ३५ ॥

शुद्धमौनान्मनःसिध्या शुक्लध्यानाय कल्पते ।
वाक्सिध्या युगपत्साधुस्त्रैलोक्यानुग्रहाय च ॥ ३६ ॥

टीका-कल्पते सम्पद्यते समर्थो भवति । कोऽसौ, साधुर्देशसंयतः संयतश्च । कस्मै, शुक्लध्यानाय । कया, मनःसिध्या चित्तवशीकरणेन । कस्मात्, आतपः, शुद्धमौनात् भोजनादौ निरतिचारमौनव्रतात् । तथा साधुः कल्पते । कस्मै, त्रैलोक्यानुग्रहाय त्रिजगद्भव्यजनानुपकर्तुं । कथं, युगपत् एककालं । कया, वाक्सिद्ध्या युगपत्त्रिजगदनुग्रहसमर्थभारतीविभूत्या ॥ ३८ ॥

नियतकालिकसार्वकालिकमौनयोरुद्योतनविशेषनिर्णयार्थमाह–

उद्योतनं महेनैकघण्टादानं जिनालये ।
असार्वकालिके मौने निर्वाहः सार्वकालिके ॥ ३७ ॥

---

१ सर्वदा शस्यते जोषं भोजने तु विशेषतः
रसायनं सदा श्रेष्ठं सरोगत्वे पुनर्न किम् ॥

टीका—भवति विधीयते वा । किं तत्, उद्द्योतनं फलातिशयलाभमाहात्म्यापादनं । क्व, मौने[1] । किंविशिष्टे, असार्वकालिके यथात्मशक्ति नियतकाल कृते । किं तत्, एकेत्यादि-एकघण्टादान एकस्या घण्टाया दानं वितरण । क्व, जिनालये अर्हच्चैत्यगृहे । कथ, सह । केन, महेनोत्सवेन पूजया वा । तथा सार्वकालिके यावज्जीवं प्रतिपन्ने मौने । उद्द्योतनं भवति । किं तत्, निर्वाहो निराकुलं वहन । नान्यत ॥ ३७ ॥

आवश्यकादिषु शक्तिं कृत्वा मौनं सर्वदाऽपि मौनविधानेन वाग्दोषोच्छेदमाह—

आवश्यके मलक्षेपे पापकार्ये च वान्तिवत् ।
मौनं कुर्वीत शश्वद्वा भूयोवाग्दोषविच्छिदे ॥ ३८ ॥

टीका—कुर्वीत । कोऽसौ, साधु । किं तत्, मौन । क्व, आवश्यके सामयिकादिकर्मषट्के, तथा मलक्षेपे विण्मूत्रोत्सर्गे, तथा पापकार्ये हिंसादिकर्मणि

---

१ सन्तोष भाव्यते तेन वैराग्य तेन दर्श्यते ।
सयम पाल्यते तेन मौन येन विधीयते ॥
लौल्यत्यागात्तपोवृद्धिरभिमानस्य रक्षणम् ।
ततश्च समवाप्नोति मन सिद्धिं जगत्त्रये ॥
श्रुतस्य प्रश्रयात् श्रेयःसमृद्धे स्यात्समाश्रय ।
ततो मनुजलोकस्य प्रसीदति सरस्वती ॥
वाणी मनोरमा तस्य शास्त्रसन्दर्भगर्भिता ।
आदेया जायते येन क्रियते मौनमुज्ज्वलम् ॥
पदानि यानि विद्यन्ते वन्दनीयानि कोविदैः ।
सर्वाणि तानि लभ्यन्ते प्राणिना मौनकारिणा ॥
भव्येन शक्तितः कृत्वा मौन नियतकालिकम् ।
जिनेन्द्रभवने देया घण्टैका समहोत्सवम् ॥
न सार्वकालिके मौने निर्वाहव्यतिरेकत ।
उद्योतन पर प्राज्ञै किंचनापि विधीयते ॥

परेण क्रियमाणे, चशब्देन स्नानाद्यनमैथुनादौ च । यतेस्तु भ्रामरीप्रवेशेऽपि किंवत्, वान्तिवत् । छर्द्यां यथा छर्दनादनन्तरमाचमन यावदित्यर्थ । अथवा मौन कुर्वीत । कथ, शश्वत् नित्य । किमर्थं, भूय इत्यादि–भूयसा कायदोषापेक्षया बहुतराणा वाग्दोषाणा परवादिवचनकृतपापास्रवाणा निच्छेदार्थम् ॥३८॥

अथ सत्याणुव्रतरक्षणार्थमाह–

कन्यागोक्ष्मालीककूटसाक्ष्यन्यासापलापवत् ।
स्यात्सत्याणुव्रती सत्यमपि स्वान्यापदे त्यजन् ॥३९॥

टीका––स्यात् । कोऽसौ, व्रतिक श्रावक । किंविशिष्ट, सत्याणुव्रती । किं कुर्वन्, त्यजन् वर्जयन् । किं तत्, सत्यमपि चौरे चौरोऽयमित्यादिरूपं तथ्यमपि । किमर्थं, स्वान्यापदे स्वपरविपत्त्यर्थं यत्तथाभूत तत्सत्यमपि । किंवत्, कन्यालीकादिवत् । यस्मिन्नुक्ते स्वपरयोर्वधबन्धादिक राजादिभ्यो भवति तत्स्थूलासत्य तादृक् सत्य च स्वयमवदन् परौंश्चावादयन् सत्याणुव्रती स्यादित्यर्थ । तत्र कन्यालीक यथा–भिन्ना कन्यामभिन्ना वा विपर्यय वा वदतो भवति । इद सर्वस्य कुमारादिद्विपदविषयकस्यालीकस्योपलक्षण । गवालीक–अल्पक्षीरा गा बहुक्षीरा विपर्यय वा वदत स्यात् । इदमपि सर्वचतुष्पदविषयालीकस्योपलक्षण । क्ष्मालीक–परसत्कामपि भूमिमात्मसत्कां विपर्यय वा वदतो भवेत् । इद चाशेषपादपाद्यपदद्रव्यविषयालीकस्योपलक्षण । कन्याद्यलीकाना च लोकेऽतिगर्हितत्वेन रूढत्वात् द्विपदादिग्रहण न क्रियते । कन्याद्यलीकत्रय लोकविरुद्धत्वाच्च वाच्य । कूटसाक्ष्य–प्रमाणीकृतस्य लञ्चामत्सरादिना कूट वदत स्यात् । यथाऽहमत्र साक्षीति । अस्य च परपापसमर्थकत्वविशेषेण पूर्वेभ्यो भेद । तच्च धर्मविपक्षत्वाच्च वदेत् । धर्म्यं ब्रूयादधर्म्यमिति विवादिभिरभ्यर्थितत्वात् । न्यासापलाप–न्यस्यते रक्षणार्थमन्यस्मै समर्प्यत इति न्यास. सुवर्णादिद्रव्य तदपलाप नाल्पेत विश्वासनिपातकत्वात् । किं चाज्ञानसंशयादिनाऽप्यसत्य न ब्रूयात्, किं पुना रागद्वेषाभ्याम् ॥ ३९ ॥

लोकव्यवहाराविरोधेन च तत्प्रयोगमुपदिशति–

लोकयात्रानुरोधित्वात्सत्यसत्यादि वाक्त्रयम् ।
ब्रूयादसत्यासत्यं तु तद्विरोधान्न जातुचित् ॥ ४० ॥

टीका-ब्रूयात् । कोऽसौ, सत्याणुव्रती । किं तत् सत्यसत्यादिवाक्यत्रय वक्ष्यमाणलक्षण । कस्मात्, लोकयात्रानुरोधित्वात् लोकव्यवहाराविसंवादित्वात् । न तु ब्रूयात् । किं तत्, असत्यासत्य । कथ, जातुचित् कदाचिदपि । कस्मात्, तद्विरोधात् लोकयात्राविप्रलम्भनात् ॥ ४० ॥

सत्यसत्यादीनि श्लोकत्रयेण लक्षयन्नाह—

यद्वस्तु यद्देशकाल प्रमाकारं प्रतिश्रुतम् ।
तस्मिंस्तथैव संवादि सत्यसत्यं वचो वदेत् ॥ ४१ ॥

टीका-वदेत् सत्याणुव्रती । किं तत्, वच । किंविशिष्ट, सत्यसत्य । किंलक्षण, सवादि तथाभूत । क, तस्मिन् प्रतिज्ञात वस्तुनि । कथ तथैव तेनैव तद्देशकालपरिणामरूपत्वन प्रकारेण । यत्किं, यद्वस्तु । प्रतिश्रुत प्रतिज्ञात । किंविशिष्ट, यद्देशकालप्रमाकार प्रमा परिमाण यस्या च, आकारो वर्णसस्थानादिरूप, देशश्च कालश्च प्रमा च आकारश्च देशकालप्रमाकारा प्रतिज्ञाविषयीकृता यस्य च तत्तथाक्तम् ॥ ४१ ॥

असत्यं वय वासोऽन्धो रन्धयेत्यादि सत्यगम् ।
वाच्यं कालातिक्रमेण दानात्सत्यमसत्यगम् ॥ ४२ ॥

टीका—वाच्य वक्तव्य सत्याणुव्रतिना । किं तद्वच । किंविशिष्ट, असत्य किंविशिष्ट सत्, सत्य सत्याश्रित । असत्यमपि किञ्चित्सत्यमेवेत्यर्थ । तद्वयेत्यादिना दर्शयति-भो कुविन्द वय आतानवितानीभावरूपतया आतन्व त्व । किं तद्वासो वस्त्र । वस्त्रनिर्माणयोग्यतन्तुपु वस्त्रशब्दप्रयोगादसत्यत्व तथा भो भक्तक रन्धय पच त्व । किं तत अन्ध कूर । अन्धयोग्यतण्डुलेष्वन्धशब्दप्रयोगादसत्यत्व । आदिशब्दाद्धो पचक कणिका पिष्टीत्यादिरूप ग्राह्य । अत्र तत्तच्छब्दावाच्यत्वेऽपि लोके तथाव्यवहारात्सत्यत्व । इदमसत्यसत्य ॥ तथा वाच्य । किं तत्, सत्य । किंविशिष्ट, असत्यग सत्यासत्यमित्यर्थ । कुत, सत्यप्रदानात् वितरणात् । केन, कालातिक्रमेण । यथा अर्द्धमासतमे दिवसे तवेद देयमित्यास्थाय मासतमे सवत्सरतमे वा दिवसे ददातीति । अत्र दाना-

व्यभिचारासम्भवः । प्रतिपन्नतत्कालव्यभिचाराभावात्त्वं । इदमपि लोकतथा व्यवहारात्कोचिद्वक्तव्यम् ॥ ४२ ॥

यत्स्वस्य नास्ति तत्कल्ये दास्यामीत्यादिसंविदा ।
व्यवहारं विरुन्धानं नासत्यासत्यमालपेत् ॥ ४३ ॥

टीका–न आलपेत् न ब्रूयात् सत्याणुव्रती । किं तत्, असत्यासत्यं वच । किं कुर्वाणं, विरुन्धानं बाधमानं । कं, व्यवहारं लोकयात्रां । कया, यदित्यादि यद्वस्तु नास्ति । कस्य, स्वस्यात्मनः सम्बन्धी । तद्दास्यामि तुभ्यं वितरिष्यामि । कदा, कल्ये प्रातः । इत्यादिरूपया संविदा प्रतिज्ञया ॥ ४३ ॥

सावद्यव्यतिरिक्तानृतपञ्चकस्य नित्यं वर्जनीयत्वमाह—

भोक्तुं भोगोपभोगाङ्गमात्रं सावद्यमक्षमाः ।
ये तेऽप्यन्यत्सदा सर्वं हिंसेत्युज्झन्तु वाऽनृतम् ॥ ४४ ॥

टीका–अत्रायोग्यताविशेषवचनसाध्यतानिवृत्तावशक्तान् प्रति सावद्यविशेषवचनस्यतानुवृत्त्यर्थो वाशब्दः किं बहुनेत्यर्थः । वा किं बहुना । उज्झन्तु त्यजन्तु । के, तेऽपि धर्मार्थिनः । किं तत्, अनृतं । किंविशिष्टं, अन्यत् सावद्यव्यतिरिक्तं सदपलपनादि । कियत्, सर्वं पञ्चप्रकारमपि । कथं, सदा नित्यं । कथं कृत्वा, हिंसेति यतः सर्वमनृतं हिंसापर्यायत्वाद्धिंसैव प्रमादयोगाविशेषात् । यत्र तु प्रमत्तयोगो नास्ति तद्धिंसाऽनृतादावनृतवदनं नामन्य । एतेनेदमपि सङ्गृहीत– 'सा मिथ्याऽपि न गीर्मिथ्या या गुर्वादिप्रसादिनी' इति । के ते, इत्याह–ये भवन्ति । किंविशिष्टाः, अक्षमा असमर्थाः । किं कर्तुं, मोक्तुं त्यक्तुं । किं तत्, सावद्यं वच क्षेत्रं कृषेत्यादिरूपं प्राणिवधादिप्रवर्तकं । किंविशिष्टं सत्, भोगोपभोगाङ्गमात्रं भोगा भोजनादि, उपभोगः कामिन्यादिः भोगश्चोपभोगश्च भोगोपभोगौ तयोरङ्गं साधनं तदेव तन्मात्रं न पुनरतद्साधनं । सावद्यं वच — तत्र नारकाण्मेत्यादि सदपलपनं । सर्वगत आत्मा श्यामाकतण्डुलमात्रो वेत्यादिकमसदुद्भावनं । गामश्वमभिवदतो विपरीतं । काणं काणमभिदधतोऽप्रियं अरे बान्धकिनेय इत्यादि गर्हितं मार्कंडं मिथ्यात्वं ॥ ४४ ॥

सत्याणुव्रतस्य पञ्चातिचारान् हेयत्वेनाह–

मिथ्यादिशं रहोऽभ्याख्यां कूटलेखक्रियां त्यजेत् ।
न्यस्तांशविस्मर्त्रनुज्ञां मन्त्रभेदं च तद्व्रतः ॥ ४५ ॥

टीका—त्यजेत् । कोऽसौ, तद्व्रत । तत्स्थूलालीकादिवचनविरतिलक्षणं व्रत यस्यासौ सत्याणुव्रतीत्यर्थ । किं तत्, मिथ्यादिशमित्यादि पञ्चक । तत्र मिथ्यादिक् मिथ्योपदेश ।अभ्युदयनि श्रेयसार्थेषु क्रियाविशेषेष्वन्यस्यान्यथा प्रवर्तन । परेण सन्देहापन्नेन पृष्टेऽज्ञानादिनाऽन्यथाकथनमित्यर्थ । अथवा प्रतिपन्नसत्यव्रतस्य परपीडाकर वचनमसत्यमेव । तत प्रमादात्परपीडाकरणे उपदेशे अतिचारो यथा वाह्यन्तां खरोष्ट्रादयो हन्यन्ता दस्यव इति निष्प्रयोजन वचन । यद्वा विवादे स्वय परेण वाऽन्यतरातिसन्धानोपायोपदेशो मिथ्योपदेश ॥ रहोऽभ्याख्या—रहस्येकान्ते स्त्रीपुम्भ्यामनुष्ठितस्य क्रियाविशेषस्याभ्याख्या प्रकाशन यया दम्पत्योरन्यस्य वा पुस स्त्रिया वा रागप्रकर्ष उत्पद्यते । सा च हास्यक्रीडादिनैव क्रियमाणोऽतिचारो न त्वभिनिवेशेन । तथा सति व्रतभङ्ग एव स्यात् ॥ कूटलेखक्रिया—अन्येनानुक्तमननुष्ठित च यत्किञ्चित्तस्य परप्रयोगवशादेव तेनोक्तमनुष्ठित चेति वञ्चनानिमित्त लेखन । अन्यसरूपाक्षरमुद्राकरणमित्यन्ये । न्यस्तांशविस्मर्त्रनुज्ञा—न्यस्तस्य निक्षिप्तस्य हिरण्यादिद्रव्यस्य अशमेकदेश विस्मर्तुर्विस्मरणशीलस्य निक्षेप्तुरनुज्ञा । द्रव्यमनुनिक्षेप्तुर्विस्मृततत्सङ्ख्यस्याल्पसङ्ख्य तद्गृह्णत एवमित्यनुमतिवचन । सोऽय न्यासापहाराख्योऽतिचार ॥ मन्त्रभेद अङ्गविकारभ्रूक्षेपादिभि पराभिप्रायं ज्ञात्वाऽसूयादिना तत्प्रकटन। विश्वसितमित्रादिभिर्वा आत्मना सह मन्त्रितस्य लज्जादिकरस्याथस्य प्रकाशन ॥ यत्तु–'मन्त्रभेद परीवाद पैशून्य कूटलेखनम् । मुधा साक्षिपदोक्तिश्च सत्यस्यैते विघातका' ॥ इति यशस्तिलके अतिचारान्तरवचन तत्परेऽप्यूह्यास्तदात्यया इत्यनेन सगृहीत प्रतिपत्तव्यम ॥ ४५ ॥

अथाचौर्याणुव्रतलक्षणार्थमाह–

चौरव्यपदेशकरस्थूलस्तेयव्रतो मृतस्वधनात् ।
परमुदकादेश्चाखिलभोग्यान्न हरेद्दीत न परस्वम् ॥४६॥

टीका—न हरेत न गृह्णीयात । नापि ददीत न परस्मै वितरेत् । कोऽसौ । चौरेत्यादि—चौरोऽयमुपलक्षणाद्धर्मपातकोऽयं वधकारो अयमित्यादिव्यपदेशं नाम करोतीति चौरादिव्यपदेशकरं, स्थूलस्तेयं बादरचौर्यं खात्रखननादिकं, तत्पूर्वमदत्तादानं वा, तत्र व्रतं नियमस्तस्माद्वा व्रत निवृत्तिर्यस्य स तथोक्तोऽचौर्याणुव्रतीत्यर्थः । किं तत्, परस्वं परस्य धनं चेतनमचेतनं वा द्रव्यं सामर्थ्याददत्तं तस्यैव परस्वामिकत्वोपपत्तेर्दत्तस्य च स्वस्वामिकत्वसम्भवात् । किंविशिष्टं, परमन्यत् । कस्मात् मृतस्वधनात् मृतश्चासौ स्वो ज्ञातिश्च मृतस्वः अर्थात्पुत्रादिरहितो लोकान्तरप्राप्तो बन्धुस्तस्य धनं तस्मात्. अन्यत् जीवतां ज्ञातीनामित्यर्थ । न केवलं तत पर उदकादेश्च तोयतृणप्रभृतेश्च । किंविशिष्टात्, अखिलभोग्यात् अखिलैः सर्वै स्थिरैरागन्तुभिश्च लोकैर्भोक्तु योग्यत्वेन राजादिसमुत्कल्पितात् ॥ ४६ ॥

प्रमत्तयोगात्परकीयतृणस्याप्यदत्तस्यादाने दाने चाचौर्यव्रतभङ्गं दर्शयति—

संक्लेशाभिनिवेशेन तृणमप्यन्यभर्तृकम् ।
अदत्तमाददानो वा ददानस्तस्करो ध्रुवम् ॥ ४७ ॥

टीका—ध्रुव निश्चित भवति । कोऽसौ, पुरुष. । कीदृश., तस्करश्चौर । किं कुर्वाण, आददान आत्मसात्कुर्वन् । ददानो वा परस्मै प्रयच्छन् । किं तत्, तृणमपि किं पुन सुवर्णादिक । किंविशिष्ट, अन्यभर्तृकं अन्य स्वस्मात्परो भर्ता स्वामी यस्य तदन्यभर्तृकमन्यदीयमित्यर्थ । किंविशिष्टं सत्, अदत्तं तत्स्वामिना अवितीर्णं । केन, संक्लेशाभिनिवेशेन रागाद्यावेशेन । एतेनेदमुक्त भवति—प्रमत्तयोगे सत्येवादत्तस्यादाने दाने वा चौर्यं स्यान्नान्यथा ॥ ४७ ॥

निधानादिधनं राजकीयत्वसमर्थनेन व्रतयन्नाह—

नास्वामिकमिति ग्राह्यं निधानादिधनं यतः ।
धनस्यास्वामिकस्येह दायादो मेदिनीपतिः ॥ ४८ ॥

टीका—न ग्राह्यं नादेयमचौर्याणुव्रतिना । किं तत, निधानादि धनं नदीगुहाविवराकरादिस्थितं द्रव्यं । कथं कृत्वा, अस्वामिकमिति नास्य कश्चित् स्वमीति परस्वं न भवतीति सङ्कल्प्य । कुत्, इत्याह यतो यस्मात् । भवति । कोऽसौ,

मेदिनीपति राजा । कीदृश, दायाद साधारण स्वामी । कस्य, धनस्य । कीदृशस्य, अस्वामिकस्य स्वामिरहितस्य । क्व, इह लोके ॥४८॥

स्वामिसांशयिके स्वधनेऽपि नियम कारयन्नाह—

स्वमपि स्वं मम स्याद्वा न वेति द्वापरास्पदम् ।
यदा तदाऽऽदीयमानं व्रतभङ्गाय जायते ॥ ४९ ॥

टीका—जायते सम्पद्यते । किं तत्, स्वमपि स्व आत्मीयमपि द्रव्य । कस्मै, व्रतभङ्गाय अचौर्यव्रतभङ्ग करोतीत्यर्थ । किं क्रियमाण, दीयमान आकारप्रक्षेपादादीयमान च । कदा, तदा तस्मिन् काले । यदा यस्मिन् काले भवति । किं तत्, स्वमपि स्व । किंविशिष्ट, द्वापरास्पद संशयस्थान । कथ कृत्वा, इद धन मम स्याद्वेद्वा न वा स्यादित्येव ॥ ४९ ॥

अचौर्याणुव्रतातिचारप्रहाणार्थमाह—

चोरप्रयोगचोराहृतग्रहावधिकहीनमानतुलम् ।
प्रतिरूपकव्यवहृतिं विरुद्धराज्येऽप्यतिक्रमं जह्यात्॥५०॥

टीका—जह्यात् त्यजेत् । कोऽसौ अचौर्याणुव्रती । किं तत्, चोरप्रयोगाद्य तिचारपञ्चकमिति समन्वय । तत्र चोरप्रयोग–चोरयत स्वयमन्येन वा चोरय त्वमिति चोरणक्रियायां प्रेरण । प्रेरितस्य वा साधु करोषीत्यनुमनन । कुशिकाकर्तरिकाघर्घरिकादिचोरोपकरणानां वा समर्पण विक्रयण वा । अत्र च यद्यपि चौर्यं न करोमि न कारयामीत्येव प्रतिपन्नव्रतस्य चोरप्रयोगो व्रत भङ्ग एव तथाऽपि किमधुना यूय निर्व्यापारास्तिष्ठथ, यदि वो भक्तादिक नास्ति तदाऽह ददामि, भवदानीतमोषस्य वा यदि क्रेता नास्ति तदाऽह विक्रेष्ये इत्यवविधवचनैश्चौरान् व्यापारयत स्वकल्पनया तद्व्यापारण परिहरतो व्रतसापेक्षस्यासावतिचार । चौराहृतग्रह –अप्रेरितेनाननुमतेन च चौरेणानी–तस्य कनकवस्त्रादेरादान मूल्येन मुद्रिकया वा । चौरानीत च काणक्रयेण मुद्रिकया वा प्रच्छन्न गृह्णँश्चौरो भवति ततश्चौर्यकरणाद्व्रतभङ्ग । वाणिज्यमेव मया क्रियते न चौरिकेत्यध्यवसायेन व्रतसापेक्षत्वादभङ्ग इति भङ्गाभङ्ग रूपोऽतिचार ॥ अधिकहीनमानतुल–मान प्रस्थादि हस्तादि च । तुला

उन्मानं । मानं च तुला च मानतुलं, अधिकं च हीनं चाधिकहीनं तच्च तन्मानतुलं च, अधिकमाने हीनमानं, अधिकतुला हीनतुला चेत्यर्थः । तत्र न्यूनेन मानादिनाऽन्यस्मै ददाति, आधिकेनात्मनो गृह्णातीत्येवमादिकूटप्रयोगो हीनाधिकमानोन्मानमित्यर्थः ॥ प्रतिरूपकव्यवहृतिः –प्रतिरूपकं सदृशं व्रीहीणां पलञ्जि, घृतस्य वसा, हिङ्गो खदिरादि वेष्टस्तैलस्य मूत्र, जात्यसुवर्णरूप्ययोर्युक्तसुवर्णरूप्ये, इत्यादिप्रतिरूपकेण व्यवहृतिर्व्यवहारो व्रीह्यादिषु पलञ्ज्यादि प्रक्षिप्य तद्विक्रयणं । एतत् द्वय परधनग्रहणरूपत्वाद्व्रतभङ्ग एव । केवल खात्रखननादिकमेव चौर्यं प्रसिद्धं । मया तु वणिक्कलैव कृतेति भावनया व्रतरक्षणोद्यतत्वादतिचार एवेति ।

विरुद्धराज्येऽप्यतिक्रमः । अपि समुच्चये । विरुद्ध विनष्ट विगृहीतं वा राज्यं राज्ञः पृथ्वीपालनोचित कर्म विरुद्धराज्य छत्रभङ्ग पराभियोगो वेत्यर्थः । तत्रातिक्रम उचितन्यायादन्येनैव प्रकारेणार्थस्य दानग्रहणं । विरुद्धराज्येऽल्पमूल्यलभ्यानि महार्घ्याणि द्रव्याणि इति प्रयतत । अथवा विरुद्धयोर्यो- द्राज्ञो राज्य नियमिता भूमि कटकं वा विरुद्धराज्य तत्र । पष्ठीसप्तम्योरर्थं प्रति भेदाभावात् । तस्यातिक्रमो व्यवस्थालंघन । व्यवस्था च परस्परविरुद्धराजकृतैव एव । तल्लंघन चान्यतरराज्यनिवासिन इतरराज्ये प्रवेश । इतरराज्यनिवासिनो वा अन्यतरराज्ये प्रवेशः । विरुद्धराज्यातिक्रमस्य च यद्यपि स्वस्वामिनोऽननुज्ञातस्यादत्तादानलक्षणयोगेन तत्कारिणा च चौर्यदण्डयोगेन चौर्यरूपत्वाद्व्रतभङ्ग एव, तथाऽपि विरुद्धराज्यातिक्रम कुर्वता मया वाणिज्यमेव कृत न चौर्यमिति भावनया व्रतसापेक्षत्वाल्लोके च चौरोऽयमिति व्यपदेशाभावादतिचारता स्यात् । अथवा चोरप्रयोगादय. पञ्चाप्येते व्यक्तचौर्यरूपा एव । केवल सहकारादिना वा प्रकारेण क्रियमाणास्तेऽतिचारतया व्यपदिश्यन्ते । न चैते राज्ञा तत्सेवकादीनां वा न सम्भवन्तीति वाच्यम् । यत. प्रथमो द्वितीय. स्पष्ट एव । तृतीयस्तुर्यश्च यदा राजा भाण्डागारे हीनाधिकमानोन्मानं द्रव्याणां विनिमय च कारयति तदा राज्ञोऽप्यतिचारौ स्त । विरुद्धराज्यातिक्रमस्तु यदा सामन्तादि कश्चित् स्वस्वामिनो वृत्तिमुपजीवति तद्विरुद्धस्य च सहायो भवति तदा अस्यातिचारः स्यात् । सोमदेवपण्डितस्तु मानन्यूनत्वाधिकत्वेन द्वावतीचारौ मन्यमान इदमाह– मानवन्न्यूनताधिक्ये स्तेनकर्म ततो ग्रहः । विग्रहो संग्रहोऽर्थस्यास्तेयस्यैते निवर्तका ॥ ५० ॥

अथ स्वदारसन्तोषाणुव्रतस्वीकारविधिमाह—

प्रतिपक्षभावनैव न रतौ रिरंसारुजि प्रतीकारः ।
इत्यप्रत्ययितमनाः श्रयत्वहिंस्रः स्वदारसन्तोषम् ॥५१॥

टीका—श्रयतु स्वीकरोतु । कोऽसौ, अहिंस्रः ईषद्धिंसनशीलोऽणुव्रती । क, स्वदारसन्तोषं स्वदारेषु स्वभार्यायां स्वदारैर्वा सन्तोषो मैथुनसञ्ज्ञावेदनाशान्त्या देहमनसोः स्वास्थ्यापादनं । किंविशिष्टः सन्, अप्रत्ययितमना प्रत्ययो विश्वासः प्रत्ययः सञ्जातोऽस्येति प्रत्ययितं न प्रत्ययितमप्रत्ययितं मनो यस्यासावप्रत्ययितमना असञ्जातविश्वासचित्त इत्यर्थः । कथं, इति अनेन सदुपदेशप्रकारेण । तमेव दर्शयति-भवति । कोऽसौ, प्रतीकारः प्रशमनोपायः । कस्यां रिरंसारुजि योन्यादौ रन्तुमिच्छारूपायां वेदनायां । किं प्रतीकारः, प्रतिपक्षभावनैव ब्रह्मचर्यस्य प्रागुक्तविधिना पुनश्चेतसि सन्निवेशनमेव । न पुनर्भवति तत्र प्रतीकारः । किं, रतिः स्त्रीसम्भोगः ॥ ५१ ॥

स्वदारसन्तोषिणं व्याचष्टे—

सोऽस्ति स्वदारसन्तोषी योऽन्यस्त्रीप्रकटस्त्रियौ ।
न गच्छत्यंहसो भीत्या नान्यैर्गमयति त्रिधा ॥ ५२ ॥

टीका—*अस्ति भवति । कोऽसौ, स गृहाश्रमी । कीदृशः,* स्वदारसन्तोषी स्वदारेषु निजधर्मपत्न्या सन्तुष्यति मैथुनसञ्ज्ञां प्रतिचिकीर्षयन् भजतीत्येवं व्रतः । स्वदारेषु सन्तोषोऽस्यास्तीति वा । यः किं यः न गच्छति न भजति । के, अन्यस्त्रीप्रकटस्त्रियौ अन्यस्त्री परदाराः परिगृहीता अपरिगृहीताश्च । तत्र परिगृहीता सस्वामिका अपरिगृहीता स्वैरिणी प्रोषितभर्तृका कुलाङ्गना वा अनाथा । कन्या तु भाविभर्तृकत्वात्पित्रादिपरतन्त्रत्वाद्वा सनाथेत्यन्यस्त्रीतो न विशिष्यते । प्रकटस्त्री वेश्या । अन्यस्त्री च प्रकटस्त्री च अन्यस्त्रीप्रकटस्त्रियौ । ते द्वे अपि यो न भजति । कया, भीत्या भयेन । कस्मात् अंहसः पापात् न राजादेः । नापि यो गमयति उपभोजयति । के, ते द्वे । कैः कर्तृभिः, अन्यैः परदारादिलम्पटैः । कथं, त्रिधा मनोवाक्कायैः कृतकारिताभ्यामनुमतात्ऽपि वा । तदेतद्ब्रह्माणुव्रतं निरतिचारं मद्यामिषक्षौद्रपञ्चोदुम्बरविरतिलक्षणाष्टमूल—

गुणान् प्रतिपन्नवतो विशुद्धसम्यग्दृशः श्रावकस्योपदिश्यते । यस्तु स्वदारव-स्साधारणस्त्रियोऽपि व्रतयितुमशक्तः परदारानेव वर्जयति सोऽपि ब्रह्माणुव्रतीष्यते । द्विविधं हि सद्व्रतं । स्वदारसन्तोषः परदारवर्जनं चेति । एतच्चान्यस्त्रीप्रकटस्त्रियाविति स्त्रीद्वयसेवाप्रतिषेधोपदेशाल्लभ्यते । तत्राद्यमभ्यस्तदेशसंयमस्य नैष्ठिकस्येष्यते । द्वितीयं तु तदभ्यासोन्मुखस्य । तदाह श्रीसोमदेवपण्डित — वधूवित्तस्त्रियौ मुक्त्वा सर्वत्रान्यत्र तज्जने । माता स्वसा तनूजेति मतिर्ब्रह्म गृहाश्रमे ॥ यस्तु—पंचुंबरसहियाइं सत्त वि वसणाइ जो विवज्जेइ । सम्मत्त-विसुद्धमई सो दंसणसावओ भणिओ ॥ इति वसुनन्दिसैद्धान्तिमतेन दर्शन-प्रतिमायां प्रतिपन्नस्तस्येदं ॥ तन्मतेनैव व्रतप्रतिमां बिभ्रतो ब्रह्माणुव्रतं स्यात् तद्यथा—पव्वेसु इत्थिसेवा अणंगकीडा सया विवज्जेइ ॥ थूलयड बंभयारी जिणेहिं भणिदो पवयणम्मि ॥ यस्तु "सम्यग्दर्शनशुद्धः संसारशरीरभोगनिर्विण्णः । पञ्चगुरुचरणशरणो दर्शनिकस्तत्त्वपथगृह्य इति " । स्वामिमतेन दर्शनिको भवेत्तस्येदं ब्रह्माणुव्रतमतिचारवर्जनार्थमेवात्रानूद्यते ॥ ५२ ॥

अथ यद्यपि गृहस्थस्य प्रतिपन्न व्रतमनुपालयतो न तादृशः पापबन्धोऽस्ति तथापि यतिधर्मानुरक्तत्वेन तत्प्राप्तेः प्राग्गार्हस्थ्येऽपि कामभोगविरक्त सन् श्रावकधर्मं प्रतिपालयति तं वैराग्यकाष्ठामुपनेतुं सामान्येनाब्रह्मदोषानाह—

> सन्तापरूपो मोहाङ्गसादतृष्णानुबन्धकृत् ।
> स्त्रीसम्भोगस्तथाऽप्येष सुखं चेत्का ज्वरेऽक्षमा ॥५३॥

टीका—भवति । कोऽसौ, स्त्रीसम्भोगः । कीदृश, सन्तापरूप स्त्रीसम्पर्कस्य पित्तप्रकोपहेतुत्वात्सन्तापयतीति सन्ताप सन्तापकरं रूपं यस्य स सन्तापरूप ज्वरपक्षे तु सन्तपनं सन्तापः सज्वरः स एव रूपमस्येति विग्रह । तथा चोक्तं सन्तापात्कोऽपरो ज्वर इति । पुन कीदृश, मोहेत्यादि—मोहो हिताहितविवेकाविकलत्वं, अंगसादः शरीरग्लानि सहत्वं तृष्णानुबन्ध तदविच्छेदः पक्षे पिपासासातत्यं मोहश्चाङ्गसादश्च तृष्णानुबन्धश्च मोहांगसादतृष्णानुबंधास्तान् करोति । यद्यप्येवंविध एष तथाऽपि सुखं चेत् मन्यसे सो भाग्यन् तदा न काऽपि त्वया कार्या । काऽसौ, अक्षमा । क, ज्वरे ज्वरोऽपि सुखं मन्तव्य इति भाव. । तथा चोक्तमार्षे—स्त्रीभोगो न सुखं चेतस्सम्मोहाद्गात्र-सादनात् । तृष्णानुबन्धात्सन्तापरूपत्वाच्च यथा ज्वर ॥ ५३ ॥

टीका——यो नेच्छेत् नाभिलषेत् । का , स्त्रियः नारी । किंविशिष्टा , अन्या-स्वस्त्रीतो व्यतिरिक्ताः । किंविशिष्टः सन्, सन्तुष्टः सन्तोष गत । केन, स्वस्त्रीमात्रेण निजनार्यैव । स्यात् । कोऽसौ, सोऽपि स्वदारसन्तुष्टोऽपि । किंविशिष्टः, अद्भुतप्रभावो लोकविस्मयनीयमाहात्म्य । कि वर्ण्य । किं, माहात्म्यं स्तुत्यं । कस्य, वर्णिन सर्वस्त्रीनिवृत्तस्य । कथं, पुनः प्राग्वर्णितप्रायत्वा-दित्यर्थ ॥ ५६ ॥

इदानीं स्वभर्तृमात्रसेवनव्रताया स्त्रिया बहुमान्यतां दृष्टान्तेन स्पष्टयति—

रूपैश्वर्यकलावर्यमपि सीतेव रावणम् ।
परपूरुषमुज्झन्ती स्त्री सुरैरपि पूज्यते ॥ ५७ ॥

टीका——पूज्यते सत्क्रियते । काऽसौ, स्त्री । कै , सुरैर्देवै किं पुनर्मनुष्या-दिभिरित्यपिशब्दार्थ । किं कुर्वती, उज्झन्ती मतयन्ती । कं, परपूरुषं स्वभ-र्तुरन्यं पूरुषं । अत्र हेतौ शतृङ्, परपुरुषोज्झनेन सुरपूजाया जन्यत्वात् । किंविशिष्टमपि, रूपेत्यादि——रूपमाकारसौन्दर्यं ऐश्वर्यं पूजार्थाज्ञाधिपत्यं कला गीतनृत्यादिका । रूपं चैश्वर्यं च कलाश्च ताभिर्वर्यमुत्कृष्टमसाधारणरूपा-दिमन्तमित्यर्थ. । अपिर्विस्मये । केव कमित्याह— सीतेव रावणं जानकी यथा लंकेश्वरम् ॥ ५७ ॥

ब्रह्माणुव्रतातिचारानाह——

इत्वरिकागमनं परविवाहकरणं विटत्वमतिचाराः ।
स्मरतीव्राभिनिवेशोऽनङ्गक्रीडा च पञ्च तुर्ययमे ॥ ५८॥

टीका——इत्वरिकागमनादय पञ्चातिचारास्तुर्ययमे सार्वकालिकब्रह्मचर्या-णुव्रते भवन्तीति सम्बन्धः । तत्रेत्वरिकागमनं अस्वामिका असती गणिका-त्वेन पुंश्चलित्वेन वा पुरुषानेति गच्छतीत्येवंशीला इत्वरी । तथा प्रतिपुरुष-मेतीत्येवंशीलेति व्युत्पत्त्या वेश्यापीत्वरी । तत. कुत्सायां के इत्वरिका तस्यां गमनमासेवनं । इय चात्र भावना—भाटिप्रदानान्नियतकालस्वीकारेण स्वक-लत्रीकृत्य वेश्या वेत्वरिकां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन सतसापे-क्षचित्तत्वादल्पकालपरिग्रहाच न भंगो वस्तुतोऽस्वदारत्वाच्च भंग इति भंगा-

भंगरूपत्वादित्वरिकाया वेश्यात्वेनान्यस्यास्त्वनाथतयैव परदारत्वात् । किं चास्य भाट्यादिना परेण किञ्चित्कालं परिगृहीतां वेश्यां गच्छतो भंग कथञ्चित्परदारत्वात्तस्याः । लोके तु परदारत्वारूढेर्न भंग इति भंगाभंगरूपोऽतिचार । अन्ये त्वपरिगृहीतकुलांगनामप्यन्यदारवर्जिनोऽतिचारमाहुः । तत्कल्पनया परस्य भर्तुरभावेनापरदारत्वादभङ्गो लोके च परदारतया रूढेर्भंग इति भङ्गाभङ्गरूपत्वात्तस्य । एतेनेत्वरिकापरिगृहीतापरिगृहीतागमनलक्षणमतिचारद्वयं तत्त्वार्थशास्त्रोद्दिष्टमपि सगृहीतं भवति । परविवाहकरणादयस्तु चत्वारो द्वयोरपि स्फुरन्तीति प्रथमोऽतिचारः ॥ १ ॥

परविवाहकरणं स्वापत्यव्यतिरिक्तानां कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयनविधानं । एतच्च स्वदारसन्तोषवता स्वकलत्रेतरदारवर्जकेन च स्वकलत्रवेश्याभ्यामन्यत्र मनोवाक्कायैर्मैथुनं न कार्यं न च कारणीयमिति व्रतं यदा गृहीतं भवति तदाऽन्यविवाहकरणं मैथुनकरणमित्यर्थतः प्रतिषिद्धमेव च भवति । तद्व्रती तु मन्यते विवाह एवायं मया क्रियते न मैथुनं कार्यत इति व्रतसापेक्षत्वादतिचार. । कन्याफललिप्सा च सम्यग्दृष्टेरप्युत्पन्नावस्थायां सम्भवति । मिथ्यादृष्टेस्तु भद्रकावस्थायामनुग्रहार्थं व्रतादाने सा सम्भवति । ननु परविवाहनवत् स्वापत्यविवाहनेऽपि समान एव दोष इति चेत् सत्यं । किं तर्हि यदि स्वकन्याविवाहो न कार्यते तदा स्वच्छन्दचारिणी स्यात् । ततश्च कुलसमयलोकविरोध. स्यात् । विहितविवाहात्तु पतिनियतस्त्रीत्वेन न तथा स्यात् । एप न्याय पुत्रेऽपि विकल्पनीय । यदि पुन कुटुम्बचिन्ताकारक कोऽपि स्वभ्रात्रादिर्भवेत्तदा स्वापत्यविवाहनेऽपि नियम एव श्रेयान् । यदा तु स्वदारसन्तुष्टो विशिष्टसन्तोषाभावात् अन्यत्कलत्रं परिणयति तदाऽप्ययमतिचारः स्यात् । परस्य कलत्रान्तरस्य विवाहकरणमात्मना विवाहनमिति व्याख्यानादिति द्वितीयोऽतिचार ॥ २ ॥

विटत्व भण्डिमा तत्प्रधानवाक्प्रयोग. ॥ ३ ॥ स्मरतीव्राभिनिवेश -कामेतिमात्रमाग्रह.। परित्यक्तान्यसकलव्यापारस्य तद्व्यवसायितेत्यर्थः । यथा सुखकक्षोपस्थान्तरेष्वतितृप्ततया लिङ्गं प्रक्षिप्य महतीं वेला निश्चलो मृत इवास्ते । चटक इव चटकां मुहुर्मुहु स्त्रियमारोहति । जातबलक्षयश्च वाजीकरणान्युपयुङ्क्ते । अनेन खल्वौषधादिप्रयोगेण गजप्रसेकी तुरगावमर्दी च पुरुषो भव तीति बुध्या इति चतुर्थ ॥ ४ ॥

अनङ्गक्रीडा अङ्गं साधनं देहावयवो वा तच्चेह मैथुनापेक्षया योनिर्मेहनं च ततोऽन्यत्र मुखादिप्रदेशे रतिः। यतश्च चर्मादिमयैर्लिङ्गैः स्वलिङ्गेन कृतार्थोऽपि स्त्रीणामवाच्यदेशं पुनः पुनः कुद्राति। केशाकर्षणादिना वा क्रीडन् प्रबलरागमुत्पादयति साऽप्यनङ्गक्रीडोच्यते। इह च श्रावकोऽत्यन्तपापभीरुस्तया ब्रह्मचर्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तत्कर्तुं न शक्नोति तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते। मैथुनमात्रेण च यापनायां सम्भवत्यां विटत्वादिद्वयमर्थतः प्रतिषिद्धमेव। तत्प्रयोगे हि न कश्चिद्गुणः। प्रत्युत सद्योऽतिरागोद्दीपनं बलक्षयस्तात्कालिकी चित्तदा राजयक्ष्मादिरोगाश्च स्युः। तदुक्तं-ऐदम्पर्यमतो मुक्त्वा भोगानाहारवद्भजेत्॥ देहदाहोपशान्त्यर्थमभिध्यानविहानये ॥ १ ॥ एवं प्रतिषिद्धाचरणाद्भङ्गो नियमावाधनाच्चाभङ्ग इत्येतेऽपि विटत्वादयस्त्रयोऽतिचाराः। यद्वा स्वदारसन्तोषी मैथुनमेव मया वेश्यादौ प्रत्याख्यातमिति स्वकल्पनया तत्र तदेव वर्जयति न विटत्वादिकं। परदारविवर्जकोऽपि परदारेषु मैथुनमेव वर्जयति नालिङ्गनवचनप्रयोगालिङ्गनादीनीति तयोः कथञ्चिद्व्रतसापेक्षत्वाद्विटत्वादयोऽतिचाराः। स्त्रियास्तु पूर्ववत्परविवाहकरणादयः। प्रथमस्तु यदा स्वकीयपतिर्वारकदिने सपत्न्या परिगृहीतो भवति तदा सपत्नीवारकं विलुप्य तं परिभुञ्जानाया अतिचारोऽतिक्रमादिना च परपुरुषं (इव) स्वपतिं वा ब्रह्मचारिणमभिसरन्त्याः स्यात् ॥ ५८ ॥

अथ परिग्रहपरिमाणाणुव्रतं व्याचष्टे—

> ममेदमिति सङ्कल्पश्चिदचिन्मिश्रवस्तुषु ।
> ग्रन्थस्तत्कर्शनात्तेषां कर्शनं तत्प्रमाव्रतम् ॥ ५९ ॥

टीका—भवति। कोऽसौ, ग्रन्थः परिग्रहः। किंलक्षणो, ममेदमिति सङ्कल्पः इदं चेतनमचेतनं मिश्रं वा वस्तु मम सम्बन्धि मदीयं मत्स्वामिकमिति सङ्कल्पो मानसोऽध्यवसायो ममत्वपरिणामो मूर्च्छेति यावत्। केषु, चिद्वस्तुषु कलत्रपुत्रादिषु, अचिद्वस्तुषु गृहसुवर्णादिषु। मिश्रवस्तुषु चेतनाचेतनेषु। बहिः पुष्पवाटिकादिषु। अन्ततश्च मिथ्यात्वादिषु। भवति। किं तत्, तत्प्रमाव्रतं परिग्रहपरिमाणाख्यमणुव्रतं। किं कर्शनमल्पीकरणं। केषां, तेषां चिता-

मचिता चिदचिता च वस्तुना । कस्मात्, तत्कर्शनात् यथोक्तमूर्च्छालक्षणपरि-
ग्रहाल्पीकरणात् ॥ ५९ ॥

अन्तरङ्गसङ्गनिग्रहोपायमाह—

उद्यत्क्रोधादिहास्यादिषट्कवेदत्रयात्मकम् ।
अन्तरङ्गं जयेत्सङ्गं प्रत्यनीकप्रयोगतः ॥ ६० ॥

टीका—जयेत् निगृह्णीयात् । कोऽसौ, पञ्चमाणुव्रतार्थी । क, सङ्ग ग्रन्थ ।
किंविशिष्ट, अन्तरङ्ग आध्यात्मिक । किमात्मक, उद्यदित्यादि उद्यन्ति उच्च-
लन्ति विपच्यमानानि, उदितानां दुर्जयत्वात्, क्रोधादयोऽनन्तानुबन्ध्यप्र-
त्याख्यानावरणवर्जिता, तान्मिथ्यात्वसहितास्त्रिगृह्यैव देशसयमस्य प्रवृत्तत्वात्
अष्टौ प्रत्याख्यानावरणसञ्ज्वलनाख्या इह गृह्यन्त, हास्यादिषट्क हास्यरत्यर-
तिशोकभयजुगुप्सा, वेदा स्त्रीपुंनपुंसकवेदा रागाख्यास्तेषां त्रय वेदत्रय,
क्रोधादयश्च हास्यादिषट्क च वेदत्रय च क्रोधादिहास्यादिषट्कवेदत्रयाणि,
उद्यन्ति च तानि क्रोधादिहास्यादिषट्कवेदत्रयाणि च तान्येव आत्मा स्वरूप
यस्यासौ तदात्मकस्त । केन जयत्, प्रत्यनीकप्रयोगत यथास्वमुत्तमक्षमा-
दिभावनया ॥ ६० ॥

बहिरङ्गसङ्गत्यागविधिमाह—

अयोग्यासंयमस्याङ्गं सङ्ग बाह्यमपि त्यजेत् ।
मूर्च्छाङ्गत्वादपि त्यक्तुमशक्यं कृशयेच्छनैः ॥ ६१ ॥

टीका—त्यजेत् । कोऽसौ, पञ्चमाणुव्रती । क, सङ्ग । किंविशिष्ट, बाह्य
वस्तुक्षेत्रादिक । अन्तरङ्गसङ्गत्यागापेक्षयाऽपिशब्द समुच्चये । किंविशिष्टम्,
अङ्ग साधन । कस्य, अयोग्यासयमस्य अयोग्य श्रावकस्य कर्तुमनुचितोऽ
सयम स चेहानारम्भजत्रसवधो ऽर्थं स्थावरवध परदारगमनादिश्च,
अयोग्यश्चासावसयमश्चायोग्यासयमस्तस्य । कुत हेतो , मूर्च्छाङ्गत्वात् मोहो-
दयनिमित्तत्वात् । यस्त्वसौ त्यक्तुमशक्यस्तत्यागविधिमाह—कृशयेत् स्वल्पी
कुर्यात् । क, त बाह्यसङ्ग । किंविशिष्टमपि, त्यक्तुमशक्यमपि अशक्यवर्जनमपि ।

कथं, शनैः मनाक् समयपरिपाट्या कालक्रमेण परिग्रहसञ्ज्ञाया अनादिसन्तत्या प्रवर्तमानत्वेन सहसा तत्त्यागस्य कर्तुमशक्यत्वात् कृतत्यागस्यापि तद्वासनावशाद्भङ्गसम्भावनाच्चैतदुच्यते ॥ ६१ ॥

एतदेव प्रपञ्चयन्नाह--

देशसमयात्मजात्याद्यपेक्षयेच्छां नियम्य परिमायात्।
वास्त्वादिकमामरणात्परिमितमपि शक्तितः पुनः कृशयेत्॥६२॥

टीका--परिमायात् परिमितं कुर्यात्। किं तत्, वास्त्वादिकं वास्तुक्षेत्रधनधान्यद्विपदचतुष्पदशयनासनयानकुप्यभाण्डलक्षणं दशभेदं बाह्यग्रन्थं। किं कृत्वा, नियम्य सन्तोषभावनया निगृह्य। कां, इच्छां परिग्रहे तृष्णां। कया, देशेत्यादि देशो वास्यमानो जनपद, समयः काल, आत्मा स्वात्मा, जाति वणिक्त्वादि, देशश्च समयश्च आत्मा च जातिश्च ता आद्यो येषां स्वान्वयवय पदव्यादीनां ते देशादयस्तेषामपेक्षया तानाश्रित्येत्यर्थ । कथं परिमायात्, आमरणात् मरणावधि यावज्जीवमित्यर्थः। तथा कृशयेत्श्रावक। किं तत्परिमितमपि वास्त्वादिकं। कथं पुन। कस्मात्, शक्तितः नैस्सङ्ग्यभावनया समुत्पन्नां स्वशक्तिमपेक्ष्येत्यर्थ ॥ ६२ ॥

परिग्रहं वक्रभणित्या दूषयन्नाह—

अविश्वासतमोनक्तं लोभानलघृताहुतिः।
आरम्भमकराम्भोधिरहो श्रेयः परिग्रहः॥६३॥

टीका—अहो आश्चर्यं। श्रेय सेव्य पुंसां कल्याणं वा। कोऽसौ, परिग्रह। किंविशिष्टः, अविश्वासतमोनक्तं अविश्वास एव तमो ध्वान्तं दुःसहेतुत्वात् तत्र नक्तं रात्रिस्तद्धेतुत्वादिति अविश्वासतमोनक्तं। तथा लोभ एवानलोऽग्निश्चित्तसन्तापकत्वात् तत्र घृताहुतिः सर्पिःप्रक्षेप प्रदीपकत्वादिति लोभानलघृताहुतिः। तथा आरम्भमकराम्भोधि आरम्भा कृष्याद्यस्त एव मकरास्त्रासातङ्कनिमित्तत्वात् तत्र अम्भोधिः समुद्रः उत्पत्तिनित्यप्रवृत्तिनिमित्तत्वादित्यारम्भमकराम्भोधि ॥ ६३ ॥

पञ्चमाणुव्रतातिचारपञ्चकनिषेधविधिमाह—

वास्तुक्षेत्रे योगाद्धनधान्ये बन्धनात्कनकरूप्ये।
दानात्कुप्ये भावाच्च गवादौ गर्भतो मितिमतीयात् ॥६४॥

टीका—नातीयान्नातिक्रमेत् । कोऽसौ, परिग्रहपरिमाणाणुव्रती । कां, मितिं व्रतविषयीकृतं परिमाणं । क्व, वास्तुक्षेत्रे वास्तुनि च क्षेत्रे च । कस्मात् योगात् वास्त्वन्तरसंयोजनं क्षेत्रान्तरसंयोजनं चाश्रित्य । तथा धनधान्ये धने च धान्ये च न मितिमतीयात् । कस्मात्, बन्धनात् बन्धनं रज्ज्वादिनियन्त्रणं सत्यङ्कारदानादि चाश्रित्य । तथा कनकरूप्ये सुवर्णे च रूप्ये च न मितिमतीयात् । कस्मात्, दानात् दानमाश्रित्य । तथा कुप्ये सुवर्णरूप्याभ्यामन्यत्र कांस्यरथादिद्रव्ये न मितिमतीयात् । कस्मात्, भावात् भावं परिमाणान्तरं अभिप्रायं वाऽऽश्रित्य । तथा गवादौ गोमहिषीवडवादिचतुष्पदपत्तिशुकादिद्विपदवर्गे न मितिमतीयात् । कस्मात् गर्भतो गर्भमाश्रित्येति समन्वयः ॥

इतस्तदर्थो विस्तरतः कथ्यते—तत्र वास्तु गृहादि ग्रामनगरादि च । तत्र गृहादि त्रेधा खातोच्छ्रिततदुभयभेदात् । तत्र खातं भूमिगृहादिकं उच्छ्रितं प्रासादादिकं, खातोच्छ्रितं च भूमिगृहोपरिगृहादिसन्निवेशः । क्षेत्रं सस्योत्पत्तिभूमिः । तत् त्रेधा सेतुकेतूभयभेदात् । तत्र सेतुक्षेत्रं यदरघट्टादिजलेन सिच्यते । केतुक्षेत्रं आकाशोदकपातनिष्पाद्यसस्यं । उभयमुभयजलनिष्पाद्यसस्यं । वास्तु च क्षेत्रं च वास्तुक्षेत्रमिति समाहारनिर्देशोऽग्रेऽत्र च बाह्यग्रन्थस्य पञ्चविधत्वकल्पनयाऽतीचारपञ्चकस्य सुखप्रयोजनार्थं । तत्र वास्तुक्षेत्रे योगाद्भित्तिवृत्त्याद्यपनयेन वास्तुक्षेत्रान्तरमीलनान्तरमाश्रित्य परिमितं परिग्रहं श्रावको न मितिमतीयात् देवगुरुसाक्षिकव्रतग्रहणकाले यावज्जीवं चतुर्मासादिकालावधि वा प्रतिपन्नां संख्यां नातिक्रमेत् । वास्त्वादिकमेव मया विपुलीक्रियते न प्रतिपन्ना तत्संख्याऽतिक्रम्यते इति बुद्ध्या तद्विषयं वा हस्तादिपरिमाणं सहसाकारादिना नातिक्रमेत् । अन्यथा वास्तुक्षेत्रप्रमाणातिक्रमो नाम प्रथमोऽतिचारः स्यात् । व्रतसापेक्षस्यैव स्वबुद्ध्या व्रतभङ्गमकुर्वतोऽतिचारत्वव्यवस्थापनात् ॥ १ ॥

धनं गणिमादिभेदात् चतुर्विधं । तत्र गणिमं पूगफलजातिफलादि । धरिमं कुंकुमकर्पूरादि । मेयं स्नेहलवणादि । परीक्ष्यं रत्नवस्त्रादि । धान्यं व्रीह्या-

दिभेदात्सप्तदशधा । उक्तं च-व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः अणवः प्रियंगुकोद्रवमकुष्ठिकाशाल्याढक्यः ॥ १ ॥

किं च बन्धनाद्धनिर्या धनधान्ययोर्मितिं च । धनं च धान्यं च धन-धान्यं । तत्र स्वगृहगतधनादेर्विक्रये व्यये वा कृते गृहिष्यामीति भावनया बन्धनात् सत्यकारादिनिबन्धनलक्षणात् मम गृहादानीतिकरात् स्वीकृत्य धनधान्यं विक्रेतृगृहे एव स्थापयन्न मितिमतीयात् । अन्यथा द्वितीयोऽतिचारः स्यात् ॥ २ ॥

कनकं सुवर्णं घटितमघटितं वाऽनेकप्रकारमेवं रूप्यमपि, कनकं च रूप्यं च तत्र । दानात् स्वयमतत्कालपरार्थं पूर्णे गृहिष्यामीति अभिप्रायेण गुरुराद्यादिभ्यः स्वपरिग्रहसंख्या ततोऽधिकं सर्वेऽन्यस्मै वितरणान्न मितिमतीयात् अन्यथा तृतीयोऽतिचारः स्यात् ॥ ३ ॥

कुप्ये रूप्यसुवर्णव्यतिरिक्ते कांस्यलोहताम्रसीसकत्रपुमृद्भाण्डवंशविकारोदुम्बरिकाकाष्ठमयशकटहलमुसलादिकमुपस्करे-भावात् द्वयोर्द्वयोर्मी-लनेनैकीकरणलक्षणात् पर्यवसानकालावधौ पूर्णे गृहिष्यामीति अभिप्रायेण वा स्वपरस्परात्तेनार्धिक्यकरणाभिप्रायाद्वा न मितिमतीयादन्यथा चतुर्थोऽतिचारः स्यात् । कुप्यस्य हि द्वे भाजने सन्ति तेन तयोः कश्चिद् द्विगुणत्वे सति मत-ग्रहणभयात् भावतो द्वयोर्द्वयोर्मीलनेनैकीकरणलक्षणात्परस्परं पूर्वापरवि-संख्याकरणात् संख्यामात्रपूरणात्पर्यवसानात् । अथवा भावतोऽभिप्रायाद्वि-वक्षितकालादिपरिमाणावधेः पश्चात् गृहिष्यामीति भावतोऽस्मै प्रदेयतया अन्यस्याप्रयच्छतोऽपि स्यात् ॥ ४ ॥

एते च क्षेत्रवास्तुहिरण्यरूप्यधनधान्यदासीदासकुप्यप्रमाणातिक्रमा इति तत्त्वार्थमतेन पञ्चातिचाराः प्रपञ्चिताः । स्वामिमतेन त्विमे-अतिवाहनाति सङ्ग्रहविस्मयलोभातिभारवहनानि । परिमितपरिग्रहस्य च विक्षेपाः पञ्च लक्ष्यन्ते ॥ १ ॥ अत्रातिवाहनं लोभावशवशात् वृषभादीनां शक्त्यतिक्रमेण दूरामार्गे नयनं । अतिसंग्रहः इदं धान्यादिकमग्रे विशिष्टं लाभं दास्यतीति लोभावेशादतिशयेन संग्रहणं । आतिविस्मयो धान्यादौ प्रपञ्चलाभेन विक्रीते मूलतोऽप्यसंगृहीते वा तत्क्रयाणकनाधिकेऽर्थे लब्धे लोभावेशादतिविषादः । अतिलोभो विशिष्टेऽर्थे लब्धेऽपि अधिकलाभाकांक्षा । अतिभारवहनं लोभावेशादधिकभारारोपणं ॥ सोमदेवपण्डितास्त्विदमाहु-कृतप्रमाणो लोभेन धनाद्यधिकसंग्रहः ॥ पञ्चमाणुव्रतज्यानीं करोति गृहमेधिनाम् ॥ १ ॥ तच्चैतत्त्व परेऽप्यूह्यास्तदत्यया इत्यनेन संगृहीतम् ॥ ६४ ॥

एवं निर्मलीकृतपरिग्रहव्रतपालकस्य फलं दृष्टान्तेन स्फुटयन्नाह—

यः परिग्रहसंख्यानव्रतं पालयतेऽमलम् ।
जयवाञ्जितलोभोऽसौ पूजातिशयमश्नुते ॥ ६५ ॥

टीका—यः पालयते रक्षयति । किं तत् परिग्रहसंख्यानव्रतं । कथं कृत्वा, अमलं यथोक्तातिचाररहितं । असौ श्रावकः पूजातिशयं शक्रादिकृतामर्चनां मश्नुते लभते । किंविशिष्टः, यतो जितलोभः जितलोभत्वादित्यर्थः । किंवत्, जयवत् मेघस्वराख्यकुरराजो यथा ॥ ६५ ॥

इत्थं निरतिचाराणुव्रतपरिणत्यनुपालनाय निर्मलशीलसप्तकपालनायामुपासकमुत्थापयितुं तदनुभावमाह—

पञ्चाप्येवमणुव्रतानि समतापीयूषपानोन्मुखे
सामन्येतरभावनाभिरमलीकृत्यार्पितान्यात्मनि ।
त्रातुं निर्मलशीलसप्तकमिदं ये पालयन्त्यादरात्
ते सन्यासविधिप्रमुक्ततनवः सौवीःश्रियो भुंजते ॥६६॥

टीका—भुञ्जते अनुभवन्ति । के, ते निर्मलाणुव्रतशीलपालिनो भव्या । का, श्रियः सम्पदः । किंविशिष्टाः, सौर्वीः स्वर्भवा ययास्व सौधर्माद्यच्यु-

सान्तकल्पसम्बन्धिनी । किंविशिष्टाः सन्तः, सन्न्यासेत्यादि सन्न्यासविधिना सप्तदशाध्यायोक्तेन प्रकर्षेण सल्लेखनाममक्षतालक्षणेन मुक्ता त्यक्ता तनुः शरीरं यैस्ते यथोक्ता । सति साधने निस्तरणभणितिरियं । ये के, ये पालयन्ति । किं तत्, इदमनन्तराध्याये वक्ष्यमाणं । निर्मलशीलसप्तकं । कस्मात्, आदरात् तत्परतया । किं कर्तुं, त्रातुं पालयितुं । निर्वहणार्थमिदं । यानि, अणुव्रतानि । कति, पञ्च अपिशब्दादेकं द्वे त्रीणि चत्वारि वा । कथं, एवं उक्तप्रकारेण । किंविशिष्टानि सन्ति, अर्पितानि परिणमितानि । क्व, आत्मनि अन्तस्तत्त्वे । उद्यपनप्रकाशनेयं । किंविशिष्टे, समतापायूपपानोन्मुखे साम्यामृतपानाद्यभिमुखे । किं कृत्वा, अमलीकृत्य तत्तदतीचारेभ्यः प्रच्याव्य । उद्द्योतनोक्तिरियं । काभिः, सामान्येतरभावनाभिः सामान्यभावनाभिर्मैत्र्यादिभिर्विशेषभावनाभिः प्रतिव्रतं पञ्चशो नियमिताभिर्महाव्रताधिकारोक्ताभिरिति भद्रम् ॥ ६६ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितस्त्रयोदश
प्रक्रमाश्च चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

अथ शीलसप्तकं व्याकर्तुकामस्तावद्विकल्पभूतानि गुणव्रतानि तावल्लक्षयति—

यद्गुणायोपकारायाणुव्रतानां व्रतानि तत् ।
गुणव्रतानि त्रीण्याहुर्दिग्विरत्यादिकान्यपि ॥ १ ॥

टीका—तत्तस्मादाहुर्ब्रुवन्ति । स्वामिमतानुसारिणः । कानि, गुणव्रतानि । कति, त्रीणि । तानि, दिग्विरत्यादिकानि दिग्विरतिमनर्थदण्डविरतिं भोगोपभोगपरिमाणं । अपिशब्दः सितपटोक्तखरकर्मज्ञापनार्थः । यद्यस्मात् भवन्त्यमूनि व्रतानि । कस्मै, गुणाय । कोऽर्थः, उपकाराय । केषाम्, अणुव्रतानाम् ॥ १ ॥

किं तद्दिग्व्रतमित्याह—

यत्प्रसिद्धैरभिज्ञानैः कृत्वा दिक्षु दशस्वपि ।
नात्येत्यणुव्रती सीमां तत्स्याद्दिग्विरतिर्व्रतम् ॥ २ ॥

टीका—स्यात् । किं तत् । व्रतं गुणव्रतमित्यर्थः । नामैकदेशो हि व्रतशब्दो नाम्न्यपि वर्तते भीमादिवत् । किं नाम, दिग्विरतिः दिक्षु विरतिर्नियमितसीम्नो बहिर्यानायाननिवृत्तिः । यस्कि, यस्मात्येति नातिक्रम्य गच्छति । कोऽसौ, अणुव्रती न तु महाव्रती तस्य सर्वारम्भपरिग्रहविरतत्वेन समितिपरत्वेन च नृलोके यथाकाम सञ्चारादिविरत्यनुपपत्तेः । कां नात्येति, सीमां मर्यादां । किं कृत्वा, प्रतिपद्य । कां, सीमां । कासु, दिक्षु । कतिषु, दशसु । अपिशब्दादेकद्वित्र्यादिष्वपि यावज्जीवमल्पकालं चापि । कैः, अभिज्ञानैः समुद्रनद्यादिभिश्चिन्हैः किंविशिष्टैः, प्रसिद्धैः दिग्विरतिमर्यादाया दातृगृहीतृश्च प्रतीतैः ॥ २ ॥

दिग्व्रतेनाणुव्रतिनोऽपि महाव्रतित्वमुपपादयति—

दिग्विरत्या बहिः सीम्नः सर्वपापनिवर्तनात् ।
तप्तायोगोलकल्पोऽपि जायते यतिवद्गृही ॥ ३ ॥

टीका—जायते भवति । गृही । किंवत्, यतिवत् महाव्रती यथा । कस्मात्, सर्वपापनिवर्तनात् सर्वपापानि स्थूलेतरहिंसादीनि भोगोपभोगादीनि च तेभ्यो निवर्तनात् विरमणात् तेषां निवारणाद्वा । क, बहि परतः । कस्याः, सीम्नः प्रतिपन्नमर्यादायाः । कया, दिग्विरत्या दिग्विरतिगुणव्रतेन । किंविशिष्टोऽपि गृही, तप्तायोगोलकल्पोऽपि सन्तप्तलोहपिण्ड इव आरम्भपरिग्रहपरत्वेन सर्वत्र गमनभोजनशयनादिक्रियासु जीवोपमर्दकरत्वात् ॥ ३ ॥

एतदेव दृढयन्नाह—

दिग्व्रतोद्रिक्तवृत्तघ्नकषायोदयमान्द्यतः ।
महाव्रतायतेऽलक्ष्यमोहे गेहिन्यणुव्रतम् ॥ ४ ॥

टीका—महाव्रतायते महाव्रतमिवाचरति नियमितदिग्विभागाद्बहिः सर्वसावद्यनिवर्तकत्वात् । न तु महाव्रतं भवति तत्प्रतिबन्धकोदयसद्भावात् । किं तत्, अणुव्रतं । क, गेहिनि गृहस्थे । किंविशिष्टे, अलक्ष्यमोहे निश्चेतुमशक्यभावे

प्रत्याख्यानावरणाख्यचारित्रमोहपरिणामे । कस्मात्, दिग्व्रतेत्यादि दिग्व्रतेनो-द्दिष्टमुत्कर्षं नीतं प्रतनुकषायाणां प्रत्याख्यानावरणाख्यद्रव्यक्रोधादीनामुदयस्य विपाकस्य मान्द्यमनीकत्वं यतस्मात् दिग्विरतिमन्दतरीकृतप्रत्याख्यानावरणविपाकादित्यर्थः ॥ ४ ॥

दिग्विरत्यतिचारानाह–

सीमविस्मृतिरूर्ध्वाधस्तिर्यग्भागव्यतिक्रमाः ।
अज्ञानतः प्रमादाद्वा क्षेत्रवृद्धिश्च तन्मलाः ॥ ५ ॥

टीका–भवन्ति । के ते, तन्मलाः दिग्व्रतातिचाराः । कति, पञ्च । कथं, सीमविस्मृतिरूर्ध्वभागव्यतिक्रमोऽधोभागव्यतिक्रमस्तिर्यग्भागव्यतिक्रमः क्षेत्रवृद्धिश्चेति । कस्मात्, अज्ञानतः प्रमादाद्वेति संक्षेपः । इतो विस्तरः—तत्र सीमविस्मृतिः—नियमितमर्यादाया अज्ञानतो मत्यपाटवसन्देहादिना प्रमादाद्वाऽतिव्याकुलत्वान्यमनस्कत्वादिना स्मृतिभ्रंशः । तथाहि—केनचित्पूर्वस्यां दिशि योजनशतरूपं परिमाणं कृतमासीत् । गमनकाले च स्पष्टतया न स्मरति किं शतं परिमाणं कृतमुत पञ्चाशत् तस्य चैवं पञ्चाशतमतिक्रामतोऽतिचारः । शतमतिक्रामतो भङ्गः सापेक्षत्वनिरपेक्षत्वाभ्यामिति प्रथमोऽतिचारः । ऊर्ध्वेत्यादि ऊर्ध्वं गिरिशिखरशिखरादेः, अधो ग्रामभूमिगृहकूपादेः, तिर्यक्पूर्वादिदिक्षु येऽमी भागा नियमितप्रदेशास्तेषां व्यतिक्रमाः । एतद्लङ्घनानि । एते च त्रयोऽनाभोगातिक्रमादिभिरेवातिचारा भवन्ति । अन्यथा प्रवृत्तौ तु भङ्ग एव । क्षेत्रवृद्धिः—क्षेत्रस्य पूर्वादिदेशस्य दिग्विरतिविषयस्य ह्रस्वस्य सतो वृद्धिः पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणं । तथाहि—केनचित्पूर्वापरदिशोः प्रत्येकं योजनशतं परिमाणं कृतमेकत्र क्षेत्रं गमनकाले वर्धयतो व्रतसापेक्षत्वादतिचारः । यदि चाप्रणिधानात् क्षेत्रपरिमाणमतिक्रान्तं भवति तदा निवर्तितव्यं ज्ञाते वा न गन्तव्यमन्योऽपि न विसर्जनीयः । अथाज्ञतया कोऽपि गतः स्यात्तदा यत्तेन लब्धं तत्त्याज्यमिति पञ्चमः ॥ ५ ॥

अथानर्थदण्डव्रतं लक्षयति—

पीडा पापोपदेशाद्यैर्देहाद्यर्थाद्विनाऽङ्गिनाम् ।
अनर्थदण्डस्तत्त्यागोऽनर्थदण्डव्रतं मतम् ॥ ६ ॥

टीका—मत सम्मत सूरीणां । किं तत् , अनर्थदण्डव्रत । किं तत्, तस्यागस्त स्यानर्थदण्डस्य वर्जन । य कि, योऽनथदण्ड । किं, पीडा पीडन । केषा, अङ्गिनां त्रसस्थावरजीवानां । कै पापोपदेशाद्यैं पापोपदेशहिंसादानदु श्रु त्यपध्यानप्रमादचर्याख्यैर्व्यापारै । कथ, विना । कस्मात्, देहाद्यर्थात् स्वस्य स्वकीयजनानां वा शारीरवाङ्मन प्रयोजनात् ॥ ६ ॥

पापोपदेशस्वरूप तद्विरति चाह—

पापोपदेशो यद्वाक्यं हिंसाकृष्यादिसंश्रयम् ।
तज्जीविभ्यो न तं दद्यान्नापि गोष्ठ्यां प्रसञ्जयेत् ॥ ७ ॥

टीका—भवति । कोऽसौ, स पापोपदेश । य कि, यद्वाक्य । किंविशिष्ट हिंसाकृष्यादिसश्रय । हिंसा मृषावादादिभि कृषिवाणिज्यादिभिश्च सश्रय सम्बन्धो यस्य ततश्चोक्त तद्विषयमित्यर्थ । हिंसाद्यारम्भेति पाठे तु हिंसा दिप्रधाना आरम्भा उपक्रमा इति व्याख्येय । न दद्यात् मृगास्तोयाशयमा याता किमुपविष्टास्तिष्ठन्तीत्यादिरूपेण न सम्पादयेत् । को सौ अनर्थदण्डव्र तार्थी । क त पापोपदेश । केभ्य , तज्जीविभ्य व्याधवञ्चकचोरादिभ्य कृषीवलकिरातादिभ्यश्च । नापि प्रसञ्जयेत् पुन पुन प्रवर्तयेत् कथान्तरप्र सङ्गे वा नावतारयेत् । क त । कस्यां, गोष्ठ्यां सङ्कथायाम् ॥ ७ ॥

हिंसोपकरणदानपरिहारमाह—

हिंसादानं विषास्त्रादिहिंसाङ्गस्पर्शनं त्यजेत् ।
पाकार्थ च नाग्न्यादि दाक्षिण्याविषयेऽर्पयेत् ॥ ८ ॥

टीका त्यजेत् कुर्यादनर्थदण्डव्रतार्थी । किं तत् हिंसोपकरणाना दान हिंसादान । मयूरव्यंसकत्वात्समास । तदेव व्याचष्ट विषास्त्रादिना विषा स्त्रादीनां गरलप्रहरणहलशकटकुशिकुद्दालादीनां हिंसाङ्गानां प्राणिवधसाध नानां स्पर्शन दान विषास्त्रादिहिंसाङ्गस्पर्शन । न चार्पयेत् नापि ढौकयेद्दद्यात् । किं तत्, अग्न्यादि वह्निघरट्टमुसलोदूखलादि । किमर्थ, पाकार्थ पचनपेष णकुट्टनादिनिमित्त । क दाक्षिण्याविषये परस्परव्यवहाराविषयादन्यत्र ॥ ८ ॥

दुःश्रुत्यपध्यानयो स्वरूप परिहार चाह—

चित्तकालुष्यकृत्कामहिंसाद्यर्थश्रुतश्रुतिम् ।
न दुःश्रुतिमपध्यानं नार्तरौद्रात्म चान्वियात् ॥ ९ ॥

टीका—नान्वियात् नानुवर्तयेत् प्रसङ्गवशादायातमपि तत्क्षणान्निवर्तयेदित्यर्थः । कोऽसौ, अनर्थदण्डव्रतार्थी । का, दुःश्रुतिं । कीदृशीं, चित्तेत्यादि । कामश्च मन्मथो हिंसा च प्राणातिपातः कामहिंसे ते आदी येषां आरम्भादीनां ते कामहिंसादयोऽर्था अभिधेया येषां तानि कामहिंसाद्यर्थानि तानि श्रुतानि शास्त्राणि । तत्र कामशास्त्रं वात्स्यायनादि । हिंसाशास्त्रं स्टक्कादिमतं । आरम्भपरिग्रहशास्त्रं वार्तानीतिः । साहसशास्त्रं वीरकथा । मिथ्यात्वशास्त्रं ब्रह्माद्वैतादि मतं । मदशास्त्रं वर्णानां ब्राह्मणो गुरुरित्यादिग्रन्थः । रागशास्त्रं वशीकरणादितन्त्रं । तेषां श्रुतिराकर्णनं उपलक्षणादर्जनाद्यपि । चित्तस्य मनसः कालुष्यं रागद्वेषाद्यावेशश्चित्तकालुष्यं तत्करोतीति चित्तकालुष्यकृत् । सा चासौ । कामहिंसाद्यर्थश्रुतश्रुतिश्च ताम् । न चान्वियादसौ । किं तत्, अपध्यानं अपकृष्टं ध्यानमेकाग्रचिंतानिरोधः । किंरूपं, आर्तरौद्रात्म आर्ते ऋते दुःखे भवं । अर्दि वा अर्तिः पीडा यातना च तत्र भवं । रौद्रं रोधयति अपरानिति रुद्रो दुःखहेतुस्तेन कृतं तस्य वा कर्म । आर्तं च रौद्रं च आर्तरौद्रे ते आत्मानौ स्वभावौ यस्य तदार्तरौद्रात्म आर्तरौद्रविकल्पमित्यर्थः । न दुःश्रुतिमपध्यानमार्तरौद्रात्म चान्वियादिति पाठे तु–दुःश्रुतिं कामादिशास्त्रश्रवणलक्षणां, अपध्यानं च नरेन्द्रत्वखचरत्वाप्सरोविद्याधरीपरिभोगादिविषयं, आर्तं वैरिघाताग्निघातादिविषयं, रौद्रं वा नान्वियादिति व्याख्येयम् ॥ ९ ॥

प्रमादचर्यालक्षणं तत्त्यागं च श्लोकद्वयेनाह—

प्रमादचर्यां विफलक्ष्मानिलाग्न्यम्बुभूरुहाम् ।
खातव्याघातविध्यापसेकच्छेदादि नाचरेत् ॥ १० ॥

टीका–नाचरेत् न कुर्यादनर्थदण्डविरतः । कां, प्रमादचर्यां । किंरूपां, विफलमित्यादि । विफलं निष्प्रयोजनं क्ष्मादीनां खातादिविफलभूखननादिलक्षणमित्यर्थः । तत्र क्ष्मायाः भूमेः खातं खननं विफलं नाचरेत् । अनि-

स्य वातस्य व्याघातं स्वयमागच्छतः कवाटादिना प्रतिबन्धं विफलं नाचरेत्। अग्नेर्विध्यापनं जलादिना विध्यापनं विफलं नाचरेत्। अम्बुनो जलस्य सरः सेचनं भूम्यादौ प्रक्षेपं विफलं नाचरेत्। भूरुहां वनस्पतीनां छेदादि छेदनपत्रपुष्पफलत्रोटनादि विफलं नाचरेत् ॥ १० ॥

तद्वच्च न सरेद्व्यर्थं न परं सारयेन्महीम् ।
जीवघ्नजीवान् स्वीकुर्यान्मार्जारशुनकादिकान् ॥ ११ ॥

टीका–न सरेत् चरणादिव्यापारं न कुर्यात्। किंविशिष्टं, व्यर्थं निष्प्रयोजनं। किंवत्, तद्वच्च क्ष्माखननादिवदय तथा न सारयेत् करचरणादिव्यापारं न कारयेत्। कं, परं भृत्यादिकं। कथं, व्यर्थं वृथा। न स्वीकुर्यात् न परिगृह्णीयात्। कान्, जीवघ्नजीवान् प्राणिघातकप्राणिनः। किंविशिष्टान्, मार्जारशुनकादिकान् बिडालमण्डलमकुक्कुटप्रभृतीन्। कथं, नियमेन पञ्चाणोऽपि नामसात्कुर्यादित्यर्थः ॥ ११ ॥

अनर्थदण्डव्रतातिचारपरिहारमाह–

मुञ्चेत्कन्दर्पकौत्कुच्यमौखर्याणि तदत्ययान् ।
असमीक्ष्याधिकरणं सेव्यार्थाधिकतामपि ॥ १२ ॥

टीका–मुञ्चेदनर्थदण्डविरतः। कान्, तदत्ययान् तद्व्रतातिचारान् किंविशिष्टान्, कन्दर्पादीन् पञ्च। तत्र कन्दर्पः कामस्तद्धेतुस्तत्प्रधानो वाक्प्रयोगोऽपि कन्दर्पो रागोद्रेकात्प्रहासमिश्रोऽशिष्टवाक्प्रयोग इत्यर्थः। कौत्कुच्यं कुदिति कुत्सायां निपातो निपातानामनेकार्थत्वात्। कुत् कुत्सितं कुचति भ्रूनयनौष्ठनासाकरचरणमुखविकारैः सङ्कुचतीति कुत्कुचः सङ्कोचादिक्रियाभाक् तद्भावः कौत्कुच्यं। प्रहासो भण्डिमावचनं च भण्डिमोपेतकायव्यापारप्रयुक्तमित्यर्थः। एतद् द्वयमपि प्रमादचर्याविरतस्यातिचारः। मौखर्यं मुखमस्यास्तीति मुखरोऽनालोचितभाषी वाचाटस्तस्य भावः धार्ष्ट्यप्रायमसम्बद्धबहुप्रलापित्वं। अयं च पापोपदेशविरतेरतिचारः। मौखर्ये सति पापोपदेशसम्भवादिति कृत्वा। असमीक्ष्याधिकरणं प्रयोजनमनालोच्य कार्यस्याधिकरणं करणं। यथा बहुमपि कर्मानयनं, यावता न प्रयोजनं तावदर्द्धं ज्वालामि

शेषमन्ये बहवोऽर्थिन सन्ति तेऽपि ग्रहीष्यन्ति अह विज्ञापयिष्यामीत्येवम-नालोच्य यद्धारस्भतृणाजीविभि कारयति । एव काष्ठच्छेदेष्टकापाकादिष्वपि वाच्य । तथाहि स्वोपकरण हिंसोपकरणान्तरेण सयुक्त धारयति यथा सयुक्त मुसलखलेन मुसल हलेन फाल शकटेन युग धनुषा शरान् इत्यादि । तथा सति च कश्चित सयुक्तमुसलखलमुसलादिकमाददीत । वियुक्ते तु तस्मिन् सुखेन पर प्रतिषेद्धु शक्यते । एतद्धिंसोपकारिदानविरतेरतीचार । सेव्यार्थाधिकतो सेव्यस्य भोगोपभोगलक्षणस्य जनको यावानर्थस्ततोऽधिकस्य तस्य करण भोगोपभोगानर्थक्यमित्यर्थ । अत्राय सम्प्रदाय यदि बहूनि स्नानसाधनानि तैलखल्यामलकादीनि गृह्णाति तदा लौल्येन बहव स्नानार्थं तडागादौ गच्छन्ति । ततश्च पूरकाप्कायिकादिवधोऽधिक स्यात् । न चैव युज्यते ततो गृह एव स्नातव्य । तदसम्भवे तु तैलादिभिर्गृह एव शिरो घर्षयित्वा तानि सर्वाणि साधयित्वा तटागादितटे निविष्टो गालितजलेनाञ्जलिभि स्नायात् । तथा येषु पुष्पादिषु सत्त्वसत्ति सम्भवति तानि परिहरेदिति सर्वत्र वक्तव्यामिति पञ्चाऽपि प्रमादविरतेरतिचार ॥ १२ ॥

अथ भोगोपभोगपरिमाणाख्यतृतीयगुणव्रतस्वीकरणविधिमाह—

भोगोऽयमियान् सेव्यः समयमियन्तं सदोपभोगोऽपि ।
इति परिमायानिच्छँस्तावधिकौ तत्प्रमाव्रतं श्रयतु ॥ १३ ॥

टीका—श्रयतु स्वीकरोतु । कोऽसौ, गुणव्रती । किं तत्, तत्प्रमाव्रत तयो र्भोगोपभोगयो प्रमा परिमाण तत्प्रमा तत्प्रमैव व्रत तत्र वा व्रत तत्प्रमाव्रत भोगोपभोगपरिमाणव्रतमित्यर्थ । कि कुर्वन्, अनिच्छन् अनाकाङ्क्षन् । कौ, तौ भोगोपभोगौ । किंविशिष्टौ, अधिकौ सव्यासेव्यतया प्रतिज्ञाताभ्यामतिरिक्तौ । किं कृत्वा, परिमाय परिमितीकृत्य । कथमिति विनिमिति भाग इत्यादि । अत्रैक प्रतिपक्षमुखेन वाक्यमन्यच्च विधिमुखेन । तत्राद्य भोगोऽय समयमि यन्त न सेव्य इति । द्वितीय भोगोऽयमियान्वा समयमियन्त सेव्य इति । तत्राद्य व्याख्यायते—न सेव्यो नोपयोक्तव्य । कोऽसावय भोग्यतया प्रसिद्धो भोगो माल्यताम्बूलादि । कन, मया । क, समय काल । कियन्तम्, इयन्त एतावन्मात्र यावज्जीव दिवसमासादिपरिच्छिन्न वा कालमित्यर्थ । द्वितीय-

त्याग्या इन्द्रिय। था अथवा। सेव्य कोऽसौ, अय भोग । केन, मया। कियान्, इयान् एतावान्। क, समय। किंविशिष्ट, इय त। तथा उपभोगोऽय समय-मियन्त न सेव्यो मयेत्येक उपभोगाऽयमियान्य। समयमियन्त मया न सेव्य ति द्वितीय। एतयोरपि पूर्ववद्व्याख्या। १३॥

भोगोपभोगयोर्लक्षण तत्त्यागस्य च यावज्जीविकस्य नियतकालस्य च सञ्ज्ञाविशेषमाचष्टे—

भोगः सेव्यः सकृदुपभोगस्तु पुनःपुनः स्रगम्बरवत्।
तत्परिहारः परिमितकालो नियमो यमश्च कालान्तः॥१४॥

टीका— स भोगो भण्यते। य सकृदेकवार सत्य सेव्यते भुक्त्वा पुनर्न भुज्यत इत्यर्थ। किंवत्, स्रग्वत् उपलक्षणमेतत् माल्यचन्दनताम्बूलादिर्यथा। स उपभोगो भण्यते तुर्विशेषे। य पुन पुन सेव्यो भूयाभूय सेव्यते सेवित्वाऽपि पुन सेव्यते इत्यर्थ। किंवत्, अम्बरवत् अत्राप्युपलक्षणाद्-वस्त्राभरणकामिन्यादिर्यथा। अथवा स्रगम्बरवच्चेति भोगोपभोगलक्षणयोर्यथा सङ्ख्यमुदाहरणे उदाहरणस्य दिङ्मात्रप्रदर्शकत्वात्। एव तयोर्लक्षणमुक्त्वा तत्त्यागविशेषयो सञ्ज्ञाविशेषप्रकाशनार्थमाह तदित्यादि व्यपदिश्यते। कोऽसौ, तत्परिहार किं, नियम। नियम इति सञ्ज्ञया व्यवह्रियते इत्यर्थ किंविशिष्ट, परिमितकाल एकद्व्यादिघटिकापरिच्छिन्नदिवसमासादिसमय। तथा व्यपदिश्यते। कोऽसौ तत्परिहार। किं, यम यम इति नाम्ना व्यवह्रियत इत्यर्थ। किंविशिष्ट, कालान्त काल मरणमन्तोऽवसान यस्य स कालान्त। मरणपर्यन्त इत्यर्थ॥ १४॥

त्रसघातबहुवधप्रमादविषयानिष्टानुपसेव्यार्थत्यागमत्रप्रकारमध्येनैवान्तर्भा-वयितुमाह—

पलमधुमद्यवदखिलस्त्रसबहुघातप्रमादविषयोऽर्थः।
त्याज्योऽन्यथाऽप्यनिष्टोऽनुपसेव्यश्च व्रताद्धि फलमिष्टम्॥

टीका—त्याज्य प्रत्याख्यातव्य। कोऽसौ, अर्थ इन्द्रियोपभोग्यो वस्त्र। केन, भोगोपभोगपरिसङ्ख्यानव्रतिना। किंविशिष्ट, त्रसेत्यादि—त्रस

द्वीन्द्रियादिजीवा बहवः प्रचुराश्चसस्थावरजीवाः त्रसाश्च बहवश्च त्रसबहवस्तेषां घातौ त्रसबहुघातौ त्रसघातो बहुघातश्चेत्यर्थः । प्रमादो धर्मं प्रतानोपायः । त्रसबहुघातौ च प्रमादश्च त्रसबहुघातप्रमादाः ते विषया यस्य स त्रसबहुघातप्रमादविषयः । किंविशिष्टोऽखिलं सर्वं । किंवत्, पल-मधुमद्यवत् । यथा त्रसघाताश्रयत्वात्पिशितं त्यज्यते, यथा च बहुवधाश्रयत्वान्माक्षिकं त्यज्यते, यथा च प्रमादाश्रयत्वान्मद्यं त्यज्यते तथा यदन्यत् त्रसघाताद्याश्रयोऽर्थस्त्याज्य इत्यर्थः । तत्र त्रसघातविषयोऽन्तःसुषिरप्राय-नालीनलपलक्यामृणालनालप्रमुखमागन्तुजन्तूनां सम्मूर्छिमजन्तूनां च योग्यमभ्यावकाशं तथा बहुजन्तुयोग्यस्थानं केतकीनिम्बार्जुनारणिशिग्रुपुष्पम-धूकबिल्वादिफलादि च वस्तु । बहुघातविषयो गुडूचीमूलकल्गुनार्द्रशृङ्ग-बेरादिकं । प्रमादविषयो दूषिविषभाङ्गिकाधत्तूरकादि वस्तु । एतेन धनार्थं क्रूरव्यापाराणामपि त्याज्यत्वमुक्तं प्रतिपत्तव्यं । तथा त्याज्यो धर्मार्थिना । कोऽसौ, अखिलोऽर्थः । किंविशिष्टोऽनिष्टः । कथं, अन्यथाऽपि त्रसघाताद्यवि-षयोऽप्यर्थो योऽनिष्टो यदा स्वस्याप्यनभिमतः प्रकृतिसात्म्यको न भवति सोऽपि तदा प्रत्याख्येय इत्यर्थः । तथा त्याज्यः । कोऽसौ, अखिलोऽर्थः । किंविशिष्टो,ऽनुपसेव्यः इष्टोऽपि शिष्टानां शीलनायोग्यः चित्रवस्त्रविकृतवेषा-भरणादिरङ्गारलालामूत्रपुरीषश्लेष्मादिश्च । एतत्प्रत्याख्यानस्याप्यभिमतार्थहे-तुत्वमुखेन करणीयत्वं समर्थयते व्रताद्धि फलमिष्टमिति–हि यस्माद्भवति । किं तत्, फलं साध्यं । किंविशिष्टं, इष्टमभिप्रेतमभ्युदयादिकं । कस्मात्, व्रतात् योग्याद्विषयादभिसन्धिकृतात्ता विरतेः ॥ १५ ॥

उक्तमेवार्थं सव्यवहारप्रसिद्ध्यर्थं श्लोकत्रयेण दर्शयति–

नालीसूरणकालिन्दद्रोणपुष्पादि वर्जयेत् ।
आजन्म तद्भुजां ह्यल्पं फलं घातश्च भूयसाम् ॥ १६ ॥

टीका–वर्जयेत् धर्मार्थी त्यजेत् । किं तत्, नाल्यादि–आदिशब्देन मूल-कार्द्रकनिम्बकुसुमकेतक्यादि । कथं, आजन्म यावज्जीवं । कुतः, इत्याह–हि यस्मात् भवति । किं तत्, फलं जिह्वेन्द्रियप्रीणनमात्रं । किंविशिष्टं, अल्पं स्तोकं भक्ष्यमाणक्षणमात्रभावि । केषां, तद्भुजां नालीसूरणादिभक्षकाणां ।

भवति च । कोऽसौ, घात तद्भक्षणे वध । केषा, भूयसां बहुतराणां तदाश्रितजीवानाम् ॥ १६ ॥

उक्तमेवार्थं मतदार्ढ्यार्थं पुनर्विशेषतोऽभिधत्ते–

अनन्तकायाः सर्वेऽपि सदा हेया दयापरैः ।
यदेकमपि तं हन्तुं प्रवृत्तो हन्त्यनन्तकान् ॥ १७ ॥

टीका–हेया प्रत्याख्येया । सदा नित्य । के, अनन्तकाया । कति सर्वेऽपि । कै, दयापरै अनुकम्पाप्रधानै श्रावकै । कुत, इत्याह–यद्यस्मात् । हन्ति हिनस्ति । कोऽसौ, पुरुष । कान्, अनन्तकान् अनन्तप्रमितान् जीवान् कशब्देनात्र जीवार्थस्य विवक्षितत्वादनन्ताश्च ते कायाश्च जीवाश्चेति विग्रह । किंविशिष्ट, प्रवृत्त । किं कर्तुं, हन्तु भक्षणादिद्वारेण मारयितु । क तमनन्तकाय । किंविशिष्ट, एक व्यवहारेणैकसत्यमपि किं पुनर्द्व्यादीन् । एते चानन्तैर्जीवैरुपलक्षित कायो येषां तेऽनन्तकाया मूलादिप्रभवा वनस्पतिकायिका । तथा हि मूलजा आर्द्रकहरिद्राप्रभृतय । अग्रजा आर्यकोदिश्च (?) प्रभृतय । पर्वजा देवनालेक्षुवेत्रादय । कन्दजा पलाण्डुसूरणादय । स्कन्धजा सल्लकीकण्टकपलाशादय । बीजजा शालिगोधूमादय । सम्मूर्च्छिमा नियतबीजाभावे स्वयोग्यपुद्गलैर्निष्पन्नशरीरा । उक्त च–मूलग्गपोरबीजा कदा तह खंदबीजबीजरुहा । सम्मुच्छिमा य भणिया पत्तेया णतकाया य ॥ १७ ॥

आमगोरससम्पृक्तं द्विदलं प्रायशोऽनवम् ।
वर्षास्वदलितं चात्र पत्रशाकं च नाहरेत् ॥ १८ ॥

टीका—नाहरेत् न भक्षयेद्दयापर । किं तत्, द्विदल मुद्गमाषादिधान्य । किंविशिष्ट आमेत्यादि–आमेनानग्निपक्वेन गोरसेन क्षीरेण दध्ना अक्वथितक्षीरादिसम्भूतेन तक्रेण च सम्पृक्त मीलित । तद्धि सूक्ष्मबहुलजन्त्वाश्रितमागमे श्रूयते । तथा नाहरेत् । किं तत्, द्विदल । किंविशिष्ट, अनव पुराणकथ, प्रायश प्रायोग्रहणात्पुराणमपि चिरकालकृष्णीभूतकुलित्यादेरदृष्टजन्तुसम्मूर्च्छनस्याप्रतिषेध । तथा नाहरेत् । किं तत्, द्विदल । किंविशिष्ट, अदलितमकृतद्विधाभाव । कदा, वर्षासु प्रावृषि हि मुद्गादीनामन्त प्ररोहस्या

युर्वेदे प्रसिद्धत्वात् त्रससम्मूर्छनस्य च दृष्टत्वेन सम्भाव्यमानत्वाद्भोज्यत्व । एतेन रुद्धानामपि तेषां निषेध उक्त स्यात् । तथा नाहरेत् । किं तत् पत्र शाक पत्ररूपं हरितकं न तु फलादिरूपं । तत्र त्रसपरंपरानुभूयिष्ठत्वात् । कदा, वर्षासु तदा त्रसस्थावरससक्तिबहुलत्वात्पत्रशाकस्याल्पफलत्वाच्च ॥ १८ ॥

एतद्व्रतस्य विशेषादानृशंस्यमिष्टफलत्वमुपदिशति—

भोगोपभोगकृशनात्कृशीकृतधनस्पृहः ।
धनाय कोट्टपालादिक्रियाः क्रूराः करोति कः ॥१९॥

टीका—क करोति न कोऽपि विदधातीत्यर्थः । किंविशिष्ट, कृशीकृतधनस्पृहः स्वल्पीकृतद्रविणाभिलाषः । कस्मात्, भोगोपभोगकृशनात् भोगोपभोगयोर्विवेकबलेनाल्पीकरणात् । का कोट्टपालादिक्रियाः तलारचान्द्रिशालवीतपालशौल्किकादिव्यापारान् । किंविशिष्टाः क्रूराः प्राणिघातकर्कशाः । किमर्थं, धनाय द्रव्यार्थम् ॥ १९ ॥

भोगोपभोगव्रतातिचारपञ्चकं लक्षयति—

सचित्तं तेन सम्बद्धं सम्मिश्रं तेन भोजनम् ।
दुष्पक्वमप्यभिषवं भुञ्जानोऽत्येति तद्व्रतम् ॥ २० ॥

टीका—अत्येति अतिचरति श्रावकः । किं तत्, तद्व्रतं भोगोपभोगपरिमाणव्रतं । किं कुर्वाणो, भुञ्जानोऽभ्यवहरन् । किं तत्, भोजनं भुज्यत इति भोजनमाहारो भोज्यद्रव्यं । किं किं, सचित्तं तेन सम्बद्धं सम्मिश्रं तेन सचित्तेन सम्मिश्रं सम्बद्धं । दुष्पक्वमभिषवं च । अतिचारार्थः । तत्र सचित्तं चेतनावद्द्रव्यं हरितकाय । अपक्वं कर्कट्यादि । प्रमादबहुघातादिना निवृत्तेऽप्यत्र प्रवृत्तौ भङ्गमतोऽत्यतिचाराभिधानं मनमार्गेऽस्याप्रणिधानाति‑क्रमादिना प्रवृत्तौ द्रष्टव्यमिति प्रथमः ॥ १ ॥

तेन सम्बद्धं सचित्तेनाश्लिष्टं सचेतनवृक्षादिना सबद्धं गोन्द्रादिकं पक्वफलादिकं वा सचित्तान्तर्बीजं खर्जूराम्रादि च तद्भक्षणं हि सचित्तभोजनवर्जकस्य प्रमादादिना सावद्याहारप्रवृत्तिरूपत्वादतिचारः । अथवा बीजं

त्यक्ष्यामि तस्यैव सचेतनत्वात् कटाहं तु भक्षयिष्यामि तस्याचेतनत्वादिति बुध्या पक्वं खर्जूरादिफलं मुखे प्रक्षिपतः सचित्तवर्जकस्य सचित्तप्रतिबद्धाहारोऽसौ द्वितीयः ॥ २ ॥

सम्मिश्रं तेन सचित्तेन व्यतिकीर्णं विभक्तुमशक्यं सूक्ष्मजन्तुकमित्यर्थः । अथवा सचित्तशबलं तत्सम्मिश्रं यथा आर्द्रकदाडिमबीजचिर्भटादिमिश्रं पूरणादिकं तिलमिश्रं च यवधानादिकं अयमपि पूर्ववदतिचारस्तृतीयः ॥ ३ ॥

दुष्पक्वं सा तस्तण्डुलभावेन अतिक्लेदनेन वा दुष्टं पक्वं मन्दपक्वं वा दुष्पक्वं, तच्चार्धस्विन्नं पृथुकतण्डुलयवगोधूमस्थूलमण्डकफलादिकमामदोषात् चेह चैहिकमपायकारणं । तथा यावतांशेन तत्सचेतनं तावता तत्परलोकमप्युपहन्ति । पृथुकाद्दुष्पक्वतया किञ्चित्सचेतनावयवत्वात्पक्वं चाचेतनं चेतनमिति भुञ्जानस्यातिचारश्चतुर्थः ॥ ४ ॥

अभिषवं सौवीरादिद्रवं वा वृष्यं वा । अयमप्यतिक्रमादिनाऽतिचारः पञ्चमः ॥ ५ ॥

चारित्रसारे पुनः सचित्ताद्याहाराणामतिचारत्वोपपादनार्थमिदमुक्तं एतेषामभ्यवहरणे सचित्तोपयोग इन्द्रियमदवृद्धिर्वातादिप्रकोपो वा स्यात् । तत्प्रतीकारविधाने पापलेपो भवति । अतिथयश्चैनं परिहरेयुरिति ॥

अत्राह स्वामी यथा—विषयविषतोऽनुपेक्षाऽनुस्मृतिरतिलौल्यमतितृषानुभवौ ॥ भोगोपभोगपरिमा व्यतिक्रमाः पञ्च कथ्यन्ते ॥ १ ॥ विषयविषतो विषकल्पेषु विषयेषु अनुपेक्षा आदरो विषयानुभवात्तद्वेदनाप्रतीकारे जातेऽपि पुनरभीष्टाङ्गनासम्भाषणालिङ्गनाद्यवर्जनरूपः प्रथमः ॥ अनुस्मृतिस्तु तदनुभवात्तत्प्रतीकारे जातेऽपि पुनः पुनर्विषयाणां सौन्दर्यसुखसाधनत्वाद्यनुचिन्तनमत्यासक्तिहेतुत्वाद‌तिचारः ॥ अतिलौल्यं अतिगृद्धिस्तत्परिहारे जातेऽपि पुनः पुनस्तदनुभवाकाङ्क्षेत्यर्थः ॥ अतितृषा कामिनीभोगादेरतिगृध्या प्राप्त्याकाङ्क्षा । अ यनुभवो नियतकालेऽपि यदा भोगोपभोगावनुभवति तदा अत्या सक्त्याऽनुभवति न पुनर्वेदनाप्रतीकारतयाऽतोऽतिचार इति ॥ एतेऽपि चात्र ग्रन्थे परेऽप्यूह्यास्तद्‌ यथा इतिवचनात्संगृहीता एव ॥

तद्वचेमेऽपि श्रीसोमदेवबुधाभिमता —दुष्पक्वस्य निषिद्धस्य जन्तुसम्बद्धमिश्रयोः ॥ अवीक्षितस्य च प्राशस्तत्संख्याक्षतिकारणम् ॥ १ ॥ अत्राह

सिताम्बराचार्यैः–भोगोपभोगसाधनं यद्द्रव्यं तदुपार्जनाय यत्कर्म व्यापारस्त-
दपि भोगोपभोगशब्देनोच्यते कारणे कार्योपचारात्। ततः कोटपालत्वादिखर-
कर्मापि त्याज्यं। तत्र खरकर्मत्यागप्रसङ्गे भोगोपभोगव्रते अङ्गारजीविका-
दीन् पञ्चदशातिचारांस्त्यजेदिति। तदचारु। लोके सावद्यकर्मणां परिगणनस्य
कर्तुमशक्यत्वात्। अथोच्यते अतिमन्दमतिप्रतिपत्त्यर्थं तदुच्यते तर्हि तान्
प्रतीदमप्यस्तु। मन्दमतीन् प्रति पुनस्त्रसबहुघातविषयार्थत्यागोपदेशेनैव तत्प-
रिहारस्य प्रदर्शितत्वादिति ॥ २० ॥

एतदेव श्लोकत्रयेण संगृह्णन्नाह—

व्रतयेत्खरकर्मात्र मलान् पञ्चदश त्यजेत्।
वृत्तिं वनाग्न्यनस्फोटभाटकैर्यन्त्रपीडनम् ॥ २१ ॥
निर्लाञ्छनासतीपोषौ सरःशोषं दवप्रदाम्।
विषलाक्षादन्तकेशरसवाणिज्यमङ्गिरुक् ॥ २२ ॥
इति केचिन्न तच्चारु लोके सावद्यकर्मणाम्।
अगण्यत्वात्प्रणेयं वा तदप्यतिजडान् प्रति ॥ २३ ॥

टीका—व्रतयेत् प्रत्याख्यायाच्छ्रावकः। किं तत्, खरकर्म खरं क्रूरं प्राणि-
बाधकं कर्म व्यापारं। तथा त्यजेत् तद्व्रती। कान्, मलान् कर्मादानसञ्ज्ञान्।
कति, पञ्चदश वृत्तिमित्यादिना निर्दिष्टान्। क्व, अत्र खरकर्मव्रते। अत्र
तावत् वृत्तिं जीविकां त्यजेत्। कैः, वनाग्न्यनस्फोटभाटकैः वनं चाग्निश्च
अनश्च स्फोटश्च भाटकं च ते पञ्चभिः। तथा यन्त्रपीडनं त्यजेत्। तथा
निर्लाञ्छनासतीपोषौ त्यजेत् निर्लाञ्छनं चासतीपोषश्चेति द्वन्द्वः। तथा
सरःशोषं त्यजेत्। तथा दवप्रदां दवदानं त्यजेत्। तथा विषादिवाणिज्य-
पञ्चकं त्यजेत्। किंविशिष्टं, अङ्गिरुक्। प्राणिबाधकं ॥

तत्र वनजीविका छिन्नस्याच्छिन्नस्य वा वनस्पतिसमूहादेर्विक्रयेण तथा
गोधूमादिधान्यानां घरट्टशिलादिना पेषणेन दलनेन वा वर्तनम् ॥ १ ॥

अग्निजीविका अङ्गारजीविकाख्या षड्जीवनिकायविराधनाहेतुना अङ्गार-
करणादिकर्मणा जीवनं ॥ २ ॥

अनोजीविका शकटजीविका शकटरथतच्चक्रादीनां स्वय परेण वा निष्पादनेन वाहनेन विक्रयणेन वृत्तिर्बहुभूतग्रामोपमर्दिका गवादीना च बन्धादिहेतु ॥ ३ ॥

स्फोटजीविका उड्डादिकर्मणा पृथिवीकायिकाद्युपमर्दहेतुना जीवन ॥ ४ ॥

भाटकजीविका शकटादिभारवाहनमूल्येन जीवन ॥ ५ ॥

यन्त्रपीडाकर्म तिलयन्त्रादिपीडन तिलादिक च दत्वा तैलादिप्रतिग्रहणम् । तत्कर्मणश्च पीलनाय तिलादिक्षोदात्तद्गतत्रसघाताच्च दुष्टत्व ॥ ६ ॥

निर्लाञ्छन निर्लाञ्छनकर्म वृषभादेर्नासावेधादिना जीविका । निर्लाञ्छन नितरां लाञ्छनमङ्गावयवच्छेद ॥ ७ ॥

असतीपोष प्राणिघ्नप्राणिपोषो भाटिग्रहणार्थं दासपोषश्च ॥ ८ ॥

सर शोषो धान्यवपनाद्यर्थं जलाशयेभ्यो जलस्य सारण्या कर्षण । तत्र च जलस्य तद्गताना त्रसानां तत्पालिताना च षण्णा जीवनिकायानां घात इति दूष्यत्वम् ॥ ९ ॥

दवदान दावाग्नेस्तृणादिदहनार्थं वितरण । तच्च फलानिरपेक्षतात्पर्याद्वन चरैर्बह्निज्वालन व्यसनजमुच्यते । पुण्यबुद्धिज तु यथा मदीये मरणकाले इयन्तो मम श्रेयोऽर्थं दीपोत्सवा करणीया इति पुण्यबुद्ध्या क्रियमाण । तृणदाहे सति नवतृणाङ्कुरोद्भेदाद्गावश्चरन्तीति वा क्षेत्रे वा सस्यसम्पत्तिवृद्धयऽ ग्निज्वालनं अत्र जीवकोटीनां वधो व्यक्त एव ॥ १० ॥

विषवाणिज्य जीवघ्नवस्तुविक्रय ॥ ११ ॥

लाक्षावाणिज्य लाक्षाविक्रयण । लाक्षाया सूक्ष्मत्रसजन्तुघातानन्तकायिकप्रवालजालोपमर्दाविनाभाविना स्वयोनिवृक्षादुद्धरणेन टङ्कणमन शिलासकृ मालिप्रभृतीना बाह्यजीवघातहेतुत्वेन गुग्गुलिकाया धातकीपुष्पत्वचश्च मद्यहेतुत्वेन तद्विक्रयस्य पापाश्रयत्वात् ॥ १२ ॥

दन्तवाणिज्य हस्त्यादिदन्ताद्यवयवानां पुलिन्दादिषु द्रव्यदानेन तदुत्पत्ति स्थाने वाणिज्यार्थं ग्रहण । ते हि तथा ग्रहण तत्प्रतिक्रयार्थं हस्त्यादिवध कुर्वन्ति । अनाकारे तु दन्तादिक्रयविक्रये न दोष ॥ १३ ॥

केशवाणिज्य द्विपदादिविक्रय । तत्र च दोष तेषा पारवश्यवधबन्धादय क्षुत्पिपासापीडा चेति ॥ १४ ॥

रसवाणिज्यं नवनीतादिविक्रयः । नवनीते हि जन्तुसम्मूर्छनं । मधुमद्यादौ तु जन्तुघातोद्भवत्व । मद्येन मदजनकत्व तद्गतनिमित्तविघातश्चेति तद्वि क्रयाय दुष्टत्व ॥ १५ ॥

इति केचित् एव मिताम्बराचार्या ब्रुवते । न तच्चारु तदसुन्दरं । कुतः, अगण्यत्वात् परिसंख्यानुपपत्तेः स्यात् । येषां, सावद्यकर्मणां सपापक्रियाणां च, लोके व्यवहाराधिजने वर्तमानानां प्रणेयं वा प्रतिपाद्यं वा । किं तत् तदपि खरकर्मव्रतमपि । कथं, प्रति उद्दिश्य । कान्, अतिजडान् अतिमुग्ध-बुद्धीन् । जडान् प्रति प्रसवबहुघातेत्यादिनैवोक्त्यादिति भाव ॥ इति गुणव्रतप्रकरणम् ॥ २१।२२।२३ ॥

अथ शिक्षाव्रतविधानार्थमाह—

शिक्षाव्रतानि देशावकाशिकादीनि संश्रयेत् ।
श्रुतचक्षुस्तानि शिक्षाप्रधानानि व्रतानि हि ॥ २४ ॥

टीका—संश्रयेत् प्रतिपद्येत श्रावक । कानि, शिक्षाव्रतानि शिक्षा विद्योपादान, *शिक्षाप्रधानानि व्रतानि शिक्षाव्रतानि* । किंविशिष्टानि, देशावकाशिकादीनि देशावकाशिक, सामायिक, प्रोषधोपवास, अतिथिसंविभाग च । कथम्भूतो भूत्वा, श्रुतिचक्षु श्रुतज्ञानलोचन । पुन, इत्याह–हि यस्मात् भवन्ति । कानि, तानि व्रतानि । किंविशिष्टानि, शिक्षाप्रधानानि ॥ २४ ॥

देशावकाशिक निरुक्त्या लक्षयति—

दिग्व्रतपरिमितदेशविभागेऽवस्थानमस्ति मितसमयम् ॥
यत्र निराहुर्देशावकाशिकं तद्व्रतं तज्ज्ञाः ॥ २५ ॥

टीका—निराहु प्रतिपादयन्ति निश्चितं ब्रुवन्ति । के, तज्ज्ञा तद्व्रतनिर्वचनविद । किं, तद्व्रत । किंनामकं, देशावकाशिकं देशे दिग्व्रतगृहीतपरिमाणस्य क्षेत्रस्य विभागे अवकाशोऽवस्थानं देशावकाश, सोऽस्यास्तीति । यत्र *यस्मिन् व्रते । अस्ति विद्यते । किं तदवस्थानमवस्थिति* श्रावकस्य । क्व, दिग्व्रतेत्यादि–दिग्व्रते परिमित प्रतिज्ञातपरिमाणो देश क्षेत्र

दिग्व्रतपरिमितदेशस्तस्य विभागस्तत्काले स्वावस्थानविषयाकृतोऽस्तत-स्मिन् । किंविशिष्टमवधान, मितसमय परिमितकाल ॥ ९५ ॥

तद्व्रतयुक्त लक्षयति—

स्थास्यामीदमिदं यावदियत्कालमिहास्पदे ॥
इति सङ्कल्प्य सन्तुष्टस्तिष्ठन्देशावकाशिकी ॥ २६ ॥

टीका-भवति । कोऽसौ,श्रावक । किंविशिष्टो,देशावकाशिकी। कि कुर्वन्, तिष्ठन् लक्षणहेत्वो क्रियाया इति शतृच् । कालपरिच्छित्या नियतदेशे सन्तुष्टतयाऽवस्थानेन देशावकाशिकव्रतत्वपरिमाणस्य लक्ष्यमाणत्वात् । कि कृत्वा, सङ्कल्प्य मनसा सम्प्रधार्य । कथ, इति । किमिति स्थास्यामि स्थिति करिष्याम्यह । क्व, इहास्मिन्नास्पदे स्थाने । कथ, इदमिद यावत् गृहगिरिग्रामादिमवधि कृत्वा । कियत्काल, इयत्काल घटिकादिप्रहरदिनादिमात्र । किंविशिष्ट सन्, सन्तुष्ट सीमभ्यो बहिर्निगृहीततृष्ण सन् । दिग्व्रतनदस्यापि नियमितदेशाद्बहिर्लोभनिग्रहेण हिंसादीना च सवशो निवर्तनेनात्र फलवत्त्वात् अणुव्रतैश्वर्यसम्पादकत्वाच्च सुतरा करणीयत्व चास्य शिक्षाव्रतत्व च शिक्षाप्रधान वाल्पपरिमितकालभावित्वाच्चोच्यते ।न खल्वेतद्दिग्व्रतवद्यावज्जीविकमपी ष्यते॥यत्तु तत्त्वार्थादौ गुणव्रतत्वमस्य श्रूयते तद्दिग्व्रतसक्षेपणलक्षणत्वमात्रस्यैव विवक्षितत्वाविवक्षितत्वाल्लक्ष्यते । दिग्व्रतसक्षेपकरण चात्रागुणव्रतादिसक्षेप कारणस्याप्युपलक्षण द्रष्टव्य । एषामपि सक्षेपस्यावश्यकर्तव्य वाप्रतिव्रत च सक्षेपकरणस्य भिन्नव्रतत्वे गुणा स्युर्द्वादशेति सख्याविरोध स्यात् ॥ २६ ॥

तद्व्रतातिचारत्यागार्थमाह—

पुद्गलक्षेपणं शब्दश्रावणं स्वाङ्गदर्शनम् ।
प्रैषं सीमनहिर्देशे ततश्चानयनं त्यजेत् ॥ २७ ॥

टीका—त्यजेत् तद्व्रतनैर्मल्यार्थी । कि, पुद्गलक्षेपणादिपञ्चक । तत्र पुद्गलक्षेपण परिगृहीतदेशाद्बहि स्वयमगमनात्कार्यार्थितया व्यापारकारकाणा चोदनाय लोष्टादिप्रेरण ॥ १ ॥ शब्दश्रावण शब्दस्याभ्युत्कशिकादे श्रावणमाह्वानीयाना श्रोत्रेऽनुपातन शब्दानुपातन नामातिचारमित्यर्थ ॥ २ ॥ स्वाङ्गदर्शन

शब्दोच्चारणं विना आह्वानीयानां दृष्टौ स्वरूपस्यानुपातनं रूपानुपातोऽयमतिचारं । पुनरयं मायावितयाऽतिचारत्वं याति ॥ ३ ॥ प्रेष्यं मर्यादीकृतदेशे स्थित्वा ततो बहिः प्रेष्यं त्वमेव कुर्विति व्यापारणं । देशावकाशिकव्रतं हि मा भूद्गमनागमनादिव्यापारजनितः प्राण्युपमर्द इत्यभिप्रायेण गृह्यते । न तु स्वयंकृतोऽन्येन कारित इति न कश्चित्फलविशेषः । प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः । परस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति प्रेष्यप्रयोगं नाम चतुर्थमतिचारं त्यजेदिति सर्वत्र योज्यम् ॥ ४ ॥ ततश्चानयनं सीमबहिर्देशादिष्टवस्तुनः प्रेष्येण विवक्षितक्षेत्रे प्रापणं । चशब्देन सीमबहिर्देशे स्थितं प्रेष्यं प्रति इदं कुर्वित्याज्ञापनं वा । एतौ चाव्युत्पन्नबुद्धितया सहसाकारादिना वाऽतिचारौ स्तः । सर्वत्र च-सापेक्षस्य व्रते हि स्यादतिचारोंऽशभञ्जनम्-इत्युपजीव्यम् ॥ २७ ॥

अप्ररूपितस्वरूपस्यानुष्ठानं न स्यादिति सामायिकस्वरूपं प्ररूपयति—

एकान्ते केशबन्धादिमोक्षं यावन्मुनेरिव ।
स्वं ध्यातुः सर्वहिंसादित्यागः सामायिकव्रतम् ॥२८॥

टीका—भवति । किं तत्, सामायिकव्रतं समस्य रागद्वेषविमुक्तस्य सतः अयो ज्ञानादीनां लाभः प्रशमसुखरूपः स समायः, समाय एव सामायः सामायः प्रयोजनमस्येति वा सामायिकं रागद्वेषहेतुषु मध्यस्थतेत्यर्थः अथवा समये आप्तसेवोपदेशस्तत्र नियुक्तं कर्म सामायिकं व्यवहारेण जिनस्नपनार्चास्तुतिजपाः । निश्चयेन च स्वात्मध्यानमेव सामायिकं । सामायिकमेव व्रतं सामायिकव्रतं । किं, सर्वहिंसादित्यागः सर्वेषां सर्वथा च हिंसादीनां प्रमत्तयोगभाविनां प्राणव्यपरोपणादिपञ्चपापानां त्यागः परिहारः सर्वेति व्याख्यानाद्देशावकाशिकादस्य भेदः सूच्यते । कस्य, शिक्षाव्रतिनः । किंविशिष्टस्य, ध्यातुः सोत्साहेन तात्पर्येण वा ध्यायतः । कं, स्वमात्मानं अन्तर्मुहूर्तमात्रं धर्मध्याननिष्ठस्येत्यर्थः । कस्येव, मुनेरिव सर्वारम्भपरिग्रहाग्रहरहितस्य यतिना तुल्यस्य । क्व, एकान्ते विविक्तस्थाने । कियत्कालं, केशबन्धादिमोक्षं यावत् केशबन्धः आदिर्येषां मुष्टिबन्धवस्त्रग्रन्थ्यादीनां गृहीतनियमकालावच्छेदहेतूनां ते केशबन्धादयः तेषां मोक्षो मोचनं तमवधीकृत्य स्थितस्येत्यर्थः । सामायिकं हि चिकीर्षुर्यावदयं केशबन्धो वस्त्रग्रन्थ्यादिर्वा

मया न मोच्यते तावत्साम्याच्च प्रचलिष्यामीति प्रतिज्ञा करोति ॥ (साधु-त्वेनेत्यत्र साकल्येनेति पाठभेद) २८ ॥

सामायिकभावनासमय नियमयन्नाह—

परं तदेव मुक्त्यङ्गमिति नित्यमतन्द्रितः ।
नक्तं दिनान्तेऽवश्यं तद्भावयेच्छक्तितोऽन्यदा ॥२९॥

टीका—भावयेदभ्यस्येन्मुमुक्षु । कि तत्सामायिकव्रत । क नक्तदिनान्ते नक्त च दिन च नक्तदिने तयोरन्ते निशावसाने दिवसावसाने चेत्यर्थ । कथ, अवश्य नियमेन । अथवा नास्तिवश्य व्याध्यादिपारतन्त्र्य यत्र भावन कर्मणि तदवश्य यथा भवति । किंविशिष्ट सन्, अतन्द्रित अनलस । कथ, नित्य सर्वकाल । कुतो हेतो, इति यतो भवति । कि तत्, तदेव सामायिक-मेव । किंविशिष्ट मुक्त्यङ्ग मोक्षसाधन । किंविशिष्ट ,परमुत्कृष्ट । परमप्रक र्षप्राप्तचारित्रस्यैव साक्षान्मोक्षहेतुत्वसिद्धे ॥ एव तर्हि मध्याह्नादौ तन्न भाव-यितव्यमिति शङ्कायामिदमाह—शक्तितोऽन्यदति । भावयेन्मुमुक्षुस्तत् । कदाऽ न्यदाऽन्यस्मिन्मध्याह्नादौ काल । कथ, शक्तित स्वशक्तिमपेक्ष्य । नियमकाला दन्यदाऽपि तद्भावने दोषाभावाद्गुणसद्भावाच्च ॥ २९ ॥

सामायिकस्थेन परीषहोपसर्गोपनिपाते सति तयोर्जयार्थं किं ध्यातव्यमि-त्याह—

मोक्ष आत्मा सुखं नित्यः शुभः शरणमन्यथा ।
भवोऽस्मिन्वसतो मेऽन्यत्किं स्यादित्यापदि स्मरेत्॥३०॥

टीका—स्मरेत् ध्यायेत् । कोऽसौ, प्रतिपन्नसामायिक कि तत्, इति एतत् । कस्या सत्या, आपदि विनिपाते परीषहोपसर्गसंसर्गे इत्यर्थ । एतेन प्रतिपन्नसामायिकेन परीषहोपसर्गा सोढव्या इत्याक्षिप्यते । किमेतादित्याह— भवति । कोऽसौ मोक्ष । कि, आत्मा अनन्तज्ञानादिरूपत्वात् । तथा सुख अनाकुलचिद्रूपत्वात् । तथा नित्य अनन्तकालभाविप्रध्वसाभावरूपत्वात् । तथा शुभ शुभकारणप्रभवत्वाच्छुभकार्यत्वाच्च । तथा शरण समस्तविपदग-म्यतया अपायपरिरक्षणोपायत्वात् । ससार किंरूप इत्याह—अस्ति । काऽसौ,

भव स्वोपात्तकर्मोदयवशाच्चतुर्गतिविवर्तपरिवर्तनं । कथं, अन्यथा मोक्षविपरीतलक्षणं अनात्मा दुःखमनित्योऽशरणमित्यर्थः । अस्मिंश्च भवे । वसतोऽवतिष्ठमानस्य मम किमन्यत्सुखदुःखादि स्यादभूदस्ति भविष्यति च किन्त्वापात एव पुनः पुनर्भवेदित्यर्थः ॥ ३० ॥

सामायिकसिद्ध्यर्थमन्यत्र श्रावकेण किं कर्तव्यमित्यत्राह—

स्नपनार्चास्तुतिजपान् साम्यार्थं प्रतिमार्पिते ।
युंज्याद्यथाम्नायमाद्यादृते सङ्कल्पितेऽर्हति ॥ ३१ ॥

टीका—युञ्ज्यात्प्रयोजयेत् मुमुक्षुः । कान्, स्नपनार्चास्तुतिजपान् स्नपनमाभ्युत्येत्यादौ व्याख्यास्यते, अर्चादयो ज्ञानदीपिकायामत्र च प्राग्यथास्थानं व्याख्याताः । क्व, स्नपनादीन् युञ्ज्यात् अर्हति भगवदर्हद्देवे । किंविशिष्टे, प्रतिमार्पिते साकारस्थापनामवतारिते । कथं, यथाम्नायं उपासकाध्ययनाद्यागमानतिक्रमेण । किमर्थं, साम्यार्थं परमार्थसामायिकसिद्ध्यर्थं अन्यत्र किं प्रयोक्तव्यमित्याह—आद्यादित्यादि—युञ्ज्यात्स्नानवर्जां । किं तत्, आद्यात्स्नपनात् । ऋते विना अन्यदर्चादित्रय । क्व, अर्हति । किंविशिष्टे, सङ्कल्पिते निराकारस्थापनार्पिते । एतेन कृतप्रतिमापरिग्रहाः सङ्कल्पितार्हत्पूजाग्रहाधीना ये देवमेवाधिकृता इति सूच्यते ॥ ३१ ॥

सामायिकस्य सुदुष्करत्वशङ्कामपाकरोति—

सामायिकं सुदुःसाधमप्यभ्यासेन साध्यते ।
निम्नीकरोति वार्बिन्दुः किं नाश्मानं मुहुःपतन् ॥ ३२ ॥

टीका—साध्यते निष्पाद्यते । किं तत्, सामायिकं । केन अभ्यासेन भूयःकृत्या । किंविशिष्टमपि, दुःसाधमपि अतिशयेन निष्पादयितुमशक्यमपि । अत्र दृष्टान्तमाह किं न निम्नीकरोति अनिम्नं निम्नं करोति । कोऽसौ, वार्बिन्दुः जलबिन्दुः । कम्, अश्मानं शिलां । किं कुर्वन्, पतन् । कथं, मुहुः वारंवारं । अत्र वाक्यं अभ्यासात्—अभ्यासो हि कर्मणां कौशलमावहति । न हि सकृन्निपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधातीति ॥ ३२ ॥

सद्वृतिधारपरिहारार्थमाह—

पञ्चात्रापि मलानुज्झेदनुपस्थापनं स्मृतेः ।
कायवाङ्मनसां दुष्टप्रणिधानान्यनादरम् ॥ ३३ ॥

टीका—उज्झेत् त्यजेत् । सामायिकी । कान्, पञ्च मलान् । क, अत्रापि सामायिकव्रतेऽपि । किं किं, स्मृत्यनुपस्थापनं कायवाङ्मनसां दुष्टप्रणिधानानि त्रीणि, अनादरं च, तत्र स्मृतेरनुपस्थापनं सामायिके अनैकाग्र्यमित्यर्थः । अथवा सामायिकं मया कर्तव्यं न कर्तव्यमिति वा सामायिकं मया कृतं न कृतमिति वेति प्रबलप्रमादात्स्मरणानवधारणं वा । स्मृतिमूलत्वान्मोक्षमार्गानुष्ठानस्य । कायस्यादि दुष्टप्रणिधानं सावद्ये प्रवर्तनं तत्र हस्तपादादीनामनिभृतत्वावस्थापनं कायदुष्प्रणिधानं । वर्णसंस्काराभावोऽर्थानवगमश्चापलं च वाग्दुष्प्रणिधानं । क्रोधलोभद्रोहाभिमानेर्ष्यादयः कार्यव्यासङ्गसंभ्रमश्च मनोदुष्प्रणिधानं । एते त्रयोऽतिचाराः । मनोदुष्प्रणिधानस्य स्मृत्यनुपस्थापनस्य चायं भेदः क्रोधाद्यावेशात्सामायिके मनसोऽनवस्थापनं प्रथमं । चिन्ताया परिस्पन्दमात्रेणानवधारणमन्त्यम् । अनादरोऽनुत्साहः प्रतिनियतवेलायां सामायिकस्याकरणं यथाकथंचिद्वा करणं । करणानन्तरमेव भोजनादिव्यापारप्रवृत्तं च । न चात्रातिचारत्वमयुक्तमित्याशङ्क्यायमुच्यते प्रमादेन कृत्य सहसाभोगेन वा सामायिकस्यातिचारा इति कर्तव्याः । यतोऽनाभोगादिना सामायिकव्रतविराधनस्य संभवात् । न चैवं प्रतिपन्नसामायिकस्याल्पतोऽपि सामायिकं नास्तीति तत्प्रतिपत्तावप्यतिचारत्वेनैव सामायिकस्याप्यभावः । तत्त्वार्थसूत्रादिकारणामतिचारत्वेनैव । शुभावलम्बनस्य सामायिकस्य यदा अभ्यासो भविष्यति तदा तृतीयपदमेवाभ्युपगमिष्यतीति सुष्ठो मनिक्स्यातिचारपरिहाराय यत्न ॥ ३३ ॥

अथ प्रोषधोपवासव्रतं लक्षयति—

स प्रोषधोपवासो यच्चतुष्पर्व्यां यथागमम् ।
साम्यसंस्कारदार्ढ्याय चतुर्भुक्त्युज्झनं सदा ॥ ३४ ॥

टीका—भवति । कोऽसौ, स प्रोषधोपवास प्रोषधे पर्वण्युपवास उपवसनं । यत्किं, यच्चतुर्भुक्त्युज्झनं चतसृणां भुक्तीनां भुक्तिक्रियाणां च त्यागः । एका हि भुक्ति-

त्रियां धारणकदिने द्वे उपवासदिने चतुर्थी च पारणकदिने प्रत्याख्यायेत। कस्यां, चतुष्पर्व्यां चतुर्णां पर्वणां समाहारश्चतुष्पर्वी तस्यां। मासे मासे द्वयोरष्टम्योश्चतुर्दश्योरित्यर्थः। कथं, यथागमं आगमानतिक्रमेण। किमर्थं, साम्यसंस्कारदार्ढ्यार्थं साम्यस्य सामायिकस्य संस्कार उत्कर्षस्तस्य दार्ढ्यं स्थिरीकरणं परीषहाद्युपातेऽपि अविचलनं तस्मै। कदा, सदा सर्वस्मिन् काले यावज्जीवमित्यर्थः ॥ ३४ ॥

एवमुत्तमं प्रोषधविधानमुक्त्वा मध्यमं जघन्यं च तदुपदेष्टुमाह—

उपवासाक्षमैः कार्योऽनुपवासस्तदक्षमैः।
आचाम्लनिर्विकृत्यादि शक्त्या हि श्रेयसे तपः ॥ ३५ ॥

टीका—कार्यः कर्तव्यः। कोऽसौ, अनुपवासः जलवर्जनचतुर्विधाहारत्यागः। ईषदुपवासोऽनुपवास इति व्युत्पत्तेः। कैः, उपवासाक्षमैः प्रागुक्तलक्षणमुपवासं कर्तुमसमर्थैः। तथा कार्यं। किं तत्? आचाम्लनिर्विकृत्यादि। कैः, तदक्षमैः अनुपवासमपि कर्तुमसमर्थैः। तत्राचाम्लमसंस्कृतमौवीरमिश्रौदनभोजनं। निर्विकृति विक्रियेते जिह्वामनसी येनेति विकृतिर्गोरसेक्षुरसफलरसधान्यरसभेदाच्चतुर्धा। तत्र गोरसः क्षीरघृतादि, इक्षुरसः खण्डगुडादि, फलरसो द्राक्षाम्रादिनिष्पन्दो, धान्यरसस्तैलमण्डादि। अथवा यद्येन सह भुज्यमानं स्वदते तत्तत्र विकृतिरित्युच्यते। विकृतेर्निष्क्रान्तं भोजनं निर्विकृति। आदिशब्देनैकस्थानैकभक्तरसत्यागादि। हि यस्मात्। भवति। किं तत्तपः। कस्मै, श्रेयसे पुण्याय वा। कया चरितं, शक्त्या बलेन वीर्येण च ॥ ३५ ॥

यथागममित्यस्यार्थं चतुःश्लोक्या व्याचष्टे—

पर्वपूर्वदिनस्यार्धे भुक्त्वाऽतिथ्यशितोचरम्।
लात्वोपवासं यतिवद्विविक्तवसतिं श्रितः ॥ ३६ ॥
धर्मध्यानपरो नीत्वा दिनं कृत्वाऽऽपराह्णिकम्।
नयेत्त्रियामां स्वाध्यायरतः प्रासुकसंस्तरे ॥ ३७ ॥

टीका—नयेदतिवाहयेत् प्रोषधोपवासी। कां, त्रियामां रात्रिं। क्व, प्रासुकसंस्तरे निर्जन्तुकायां भूमौ निर्जन्तुकैश्च तृणदर्भादिभिः कृते शयने। किंविशिष्टः

सन्, स्वाध्यायरतः। एतेन निद्रालस्ये त्यजेदिति लक्षयति। किं कृत्वा, विधाय। कि तत्, आपराह्णिकं अपराह्णे भव कर्म सांप्रतं क्रियाकदम्बमित्यर्थः। कि कृत्वा, नीत्वा अतिक्रम्य। किं सत्, दिनं। किंविशिष्ट सन्, धर्मध्यानपर आज्ञापायविपाकलोकसंस्थानविचयैकाग्रचिन्तानिरोधलक्षणधर्मध्यानपरः। ध्यानोपरमे स्वाध्यायानुप्रेक्षाचिन्तनादिकमपि कार्यमिति परशब्देन प्रधानार्थेन सूच्यते। किंविशिष्टो भूत्वा, श्रित अधिष्ठितः। कां, विविक्तवसतिं विविक्तां प्रासुकां अयोग्यजनरहितां निर्जनां वा वसतिं स्थानं। किं कृत्वा, गत्वा स्वीकृत्य। कं, उपवासं। किंवत्, यतिवत् यतिना तुल्यं यथा यतिर्भोजनानन्तरमेवोपवासं गृह्णाति विधिवद्गुरोश्च समीपे गत्वा पुनरुच्चारयति। सावद्यव्यापारं शरीरसंस्कारमब्रह्म च सदा त्यजति एवं प्रोषधे श्रावकोऽपि प्रवर्ततामित्यर्थः॥ किं कृत्वा, भुक्त्वा यथाविधि भोजनं कृत्वा। कथं, अतिथ्यशितोत्तरं अतिथेरशिताद्भोजनविधापनादनन्तरमतिथिं भोजयित्वेत्यर्थः। क्व, अर्धे। कस्य, पर्वपूर्वदिनस्य सप्तम्यास्त्रयोदश्याश्च अर्धे प्रहरद्वये वा किञ्चिन्न्यूनेऽधिकेऽपि वा। समेऽप्यसमेऽपि वाऽर्देऽर्धशब्दस्य रूढत्वात्॥ ३६।३७॥

ततः प्राभातिकं कुर्यात्तद्वद्यामान् दशोत्तरान्।
नीत्वाऽतिथिं भोजयित्वा भुञ्जीतालौल्यतः सकृत्॥

टीका—कुर्याद्विदध्यात् प्रोषधोपवासी। किं तत्, प्राभातिकं प्रभाते भवं कर्मावश्यकादिकं। कस्मात्, ततः यथोक्तविधिना प्रहरषट्कनयनादनन्तरं। ततश्च भुञ्जीत भोजनं कुर्यात् असौ। कस्मादलौल्यतः भोजने आसक्तिमकृत्वेत्यर्थः। कथं, सकृदेकवारं पारणकदिनेऽप्येकभुक्तं कुर्यादित्यर्थः। किं कृत्वा, नीत्वा लङ्घयित्वा। कान्, यामान् प्रहरान्। कति, दश। किंविशिष्टानुत्तरान्। अष्टावुपवासगोचराहोरात्रस्य द्वौ चोत्तरदिनस्य। किंवत्, तद्वत् पूर्वोक्तषट्प्रहरवत्॥ ३८॥

पूजयोपवसन् पूज्यान् भावमय्यैव पूजयेत्।
प्रासुकद्रव्यमय्या वा रागाङ्गं दूरमुत्सृजेत्॥ ३९॥

कर्तुमाह–द्रव्यविशेषवितरण वक्ष्यमाणलक्षणगविशिष्टद्रव्यदानं। कस्मै, पात्र विशेषाय। कस्य कर्तु, दातृविशेषस्य। केन, विधिविशेषेण। कस्मै, फलविशेषाय ॥ ४१ ॥

अतिथिशब्दव्युत्पादनमुखेनातिथिलक्षणमाह—

ज्ञानादिसिद्ध्यर्थतनुस्थित्यर्थान्नाय यः स्वयम् ।
यत्नेनातति गेहं वा न तिथिर्यस्य सोऽतिथिः ॥४२॥

टीका—भवति। कोऽसावतिथि। य किं, योऽतति सर्वदा गच्छति। किं तत्, गेह दातृगृह। केन, यत्नेन सयमाविराधनेन। कथ, स्वय आह्वानादिना विना। किमर्थ, ज्ञानादीत्यादि–ज्ञानादीना सिद्धि साधन सम्पूर्णीकरण ज्ञानादिसिद्धिरर्थ प्रयोजन यस्या सा ज्ञानादिसिद्ध्यर्था सा चासौ तनुश्च शरीर ज्ञानादिसिध्यथतनु तस्या स्थितिर्यावदायुरवस्थान सैवार्थ प्रयोजन यस्य तत्तदर्थं तच्च तदन्न च भोजन तस्मै वा। अथवा सोऽतिथिर्भण्यते। उपलक्षणात्पर्वोत्सवौ च। नास्ति तिथिर्यस्येत्यतिथिरिति व्युत्पत्ते। उक्त च–" तिथिपर्वोत्सवा सर्वे त्यक्ता येन महात्मना। अतिथिं त विजानीयाच्छेषमभ्यागत विदु" ॥ ४२ ॥

पात्रस्वरूपसख्या निर्णयार्थमाह–

यत्तारयति जन्माब्धेः स्वाश्रितान्यानपात्रवत् ।
मुक्त्यर्थगुणसंयोगभेदात्पात्रं त्रिधा मतम् ॥ ४३ ॥

टीका—अस्ति भवति। किं तत्पात्र। कतिधा, त्रिधा त्रिभेद। कस्मात्, मुक्तेरर्थो निमित्त कारण, मुक्तिर्वाऽर्थ प्रयोजन येषा ते मुक्त्यर्थास्ते च ते गुणाश्च सम्यग्दर्शनादयो मुक्त्यर्थगुणास्तेषा सयोग सयुज्यमानत्व तेन भेदो विशेषस्तस्मात्। यत्किं, यत्तारयति पार प्रापयति। कान् स्वाश्रितान् दानस्य कर्तृहेतुकर्त्रनुमन्तॄन्। कस्मात्, जन्माब्धे ससारार्णवादिव। किंवत्, यानपात्रवत् यानपात्रमम्भोधिस्थ यथा स्वाश्रितान् सांयात्रिकादीन् समुद्रात्तारयति तथा समाराद्वाश्रितान् यत्तारयति तत्पात्रमित्यर्थ ॥ ४३ ॥

एतदेव विशेषयन्नाह—

यतिः स्यादुत्तमं पात्रं मध्यमं श्रावकोऽधमम् ।
सुदृष्टिस्तद्विशिष्टत्वं विशिष्टगुणयोगतः ॥ ४४ ॥

टीका—स्यात । किं तत्, पात्र । किंविशिष्ट, उत्तममुत्कृष्ट । किं तत्, यति सयुज्यमानरत्नत्रय । तथा मध्यम पात्र स्यात् । किं तत्, श्रावक सयुज्यमानसम्यग्दर्शनज्ञानविकलसंयम । तथा अधम पात्र स्यात् । किं तत्, सुदृष्टिरसयतसम्यग्दृष्टि । स्याच्च । किं तत्, तद्विशिष्टत्व तेषामुत्तम-मध्यमाधमपात्राणा विशेष परस्परत परेभ्यश्च भेद । कस्मात्, विशिष्टगुण-योगत गुणविशेषसम्बन्धात् ॥ ४४ ॥

दानविधे प्रकारान् वैशिष्ट्य चाह—

प्रतिग्रहोच्चस्थानांघ्रिक्षालनार्चानतीर्विदुः ।
योगान्नशुद्धीश्च विधीन् नवादरविशेषितान् ॥ ४५ ॥

टीका—विदु जानन्ति पूर्वाचार्या । कान्, विधीन् दानप्रयोगोपायान् । कति, नव । किमाख्यान्, प्रतिग्रहादीन् । किंविशिष्टान्, आदरविशेषितान् आदरेण यथायोग्यभक्त्युपचारेण वैशिष्ट्य नीतान् ॥ तत्र प्रतिग्रह स्वगृहद्वारे यतिं दृष्ट्वा प्रसाद कुरुतेत्यभ्यर्थ्य नमोऽस्तु तिष्ठतेति त्रिर्भणित्वा स्वीकरण ॥ उच्चस्थान स्वगृहान्त स्वीकृतयतिं नीत्वा निरवद्यानुपहतस्थाने उच्चासने निवेशन ॥ अंघ्रिक्षालन तथास्वीकृतनिवेशितसंयतस्य प्रासुकोदकेन पाद-धावन तत्पादोदकवन्दन च ॥ अर्चा तथाक्षालिताघ्रे संयतस्य गन्धाक्षता-दिभि पादपूजन ॥ आनति तथापूजितसयतस्य पञ्चाङ्गप्रणामकरण । एवं पञ्च ॥ तथा योगशुद्धयो मनोवाक्कायप्रसत्तयस्तिस्र ॥ एका चान्नशुद्धि तत्र मन शुद्धिरार्तरौद्रवर्जन । वाक्शुद्धि परुषकर्कशादिवचोवर्जन ॥ काय शुद्धि सर्वत्र सवृताचारतया प्रवर्तन ॥ अन्नशुद्धि चतुर्दशमलरहितस्याहा रस्य यतनया शोधितस्य हस्तपुटेऽर्पणम् ॥ ४५ ॥

देयद्रव्यविशेषनिर्णयार्थमाह—

पिण्डशुद्ध्युक्तमन्नादिद्रव्यं वैशिष्ट्यमस्य तु ।
रागाद्यकारकत्वेन रत्नत्रयचयाङ्गता ॥ ४६ ॥

टीका—भवति । कि तत्, द्रव्यमर्थाद्देय । किंविशिष्टमशादि आहारौप धावासपुस्तकपिच्छिकादि । किंविशिष्ट तत् पिण्डशुध्युक्त पिण्डशुद्धौ पिण्ड शुद्धिप्ररूपणार्थे पूर्वमनगारधर्मस्कन्धे पञ्चमाध्याये प्रतिपादित । अस्य तु यथोक्तदेयद्रव्यस्य पुनर्भवति । कि तत्, वैशिष्ट्य विशेष । कि तत्, रत्नत्रयचयाङ्गता सम्यग्दर्शनादिवृद्धिकारणत्व । केन, रागाद्यकारकत्वेन रागद्वेषासयममदुदु खचयाद्यजनकत्वेन ॥ ४६ ॥

दातृलक्षण तद्वैशिष्ट्य चाह—

नवकोटीविशुद्धस्य दाता दानस्य य पतिः ।
भक्तिश्रद्धासत्त्वतुष्टिज्ञानालौल्यक्षमागुणः ॥ ४७ ॥

टीका-स दाता भण्यते पूर्वाचार्यै । य कि यो भवति । किंविशिष्ट पति स्वामी प्रयोक्ता । कस्य, दानस्य देयस्य दत्तिक्रियाया वा । किंविशिष्टस्य, नवकोटीविशुद्धस्य नवकोट्य मनोवाक्कायै प्रत्येक कृतकारितानुमतानि । अथवा देयशुद्धिस्तत्कृते च दातृपात्रशुद्धी, दातृशुद्धिस्तत्कृते च देयपात्रशुद्धी पात्रशुद्धिस्तत्कृते च देयदातृशुद्धी चेत्यार्पोक्ता । नवकोटीभिर्विशुद्धमकृतपिण्डशुध्युक्तदोपसम्पर्कं आर्पोक्त तत्पक्षे तु नवकोट्या विशुद्धा सुप्रसिद्धा यत्रेति विग्रह । किंविशिष्ट सन्, भक्त्यादि भक्त्यादय सप्तगुणा विशेषणानि परासाधारणानि यस्य स तथोक्त । तत्र भक्ति पात्रगुणानुराग । श्रद्धा पात्रदानफले प्रतीति । सत्त्व सत्त्वारत्य मनोगुण स्व पवित्तस्यापि स्वाड्याश्चर्यकारिदानप्रवृत्त्यङ्ग । तुष्टि दत्ते दीयमाने च प्रहर्ष । ज्ञान द्रव्यादिवेदित्व । अलौल्य सांसारिक फलानपेक्षा । क्षमा दुर्निवारकालुष्यकारणोत्पत्तावपि कोपाभाव ॥ तदुक्त—भाक्तिकं तौष्टिक श्राद्ध सविज्ञानमलोलुपम् ॥ सात्त्विक क्षमक सन्तो दातार सप्तधा विदु ॥ १ ॥ कि च । सत्त्वादिगुणदातृक दानमपि सात्त्विकादि भेदात्त्रिविधमिष्यते । तदुक्त— आतिथेय हित यत्र यत्र पात्रपरीक्षणम् ॥ गुणा श्रद्धादयो यत्र तद्दान सात्त्विक विदु ॥ १ ॥ यदात्मवर्णनप्राय क्षणिकाहार्यविभ्रमम ॥ परप्रत्ययसम्भूत दान तद्राजस मतम् ॥ २ ॥ पात्रापात्रसमावेक्षमसत्कारमसम्तुतम् ॥ दासभृत्यकृतोद्योग दान तामसमूचिर ॥ ३ ॥ उत्तम सात्त्विकं दान मध्यम राजस भवेत् ॥ दानानामेव सर्वेषा जघन्य तामस पुन ” ॥ ४७ ॥

दानफलं तद्विशेषं च व्याचष्टे–

रत्नत्रयोच्छ्रयो भोक्तुर्दातुः पुण्योच्चयः फलम् ।
मुक्त्यन्तचित्राभ्युदयप्रदत्वं तद्विशिष्टता ॥ ४८ ॥

टीका––भवति । किं तत्, फलं दानस्य साध्यं । कस्य, भोक्तुराहाराद्युपयोक्तुः । किं तत् रत्नत्रयोच्छ्रयः सम्यग्दर्शनादीनामुद्गतिः तथा तत्फलं भवति । कस्य, दातुर्दायकस्य । किं तत्पुण्योच्चयः सुकृतराशिः । भवति । काऽसौ, तद्विशिष्टता तस्य दानस्य फलस्य वैशिष्ट्यं । किं तत्, मुक्त्यन्तेत्यादि चित्रा नानाप्रकारा इन्द्रचक्रिबलदेवतीर्थकरादिपदलक्षणा विश्वविस्मयकराश्च अभ्युदयाश्चित्राभ्युदयाः, मुक्तिरनन्तज्ञानादिचतुष्टयप्राप्तिलक्षणं निःश्रेयसं अन्ते अवसाने फलोपभोगच्छेदे येषां ते मुक्त्यन्तास्ते च ते चित्राभ्युदयाश्च मुक्त्यन्तचित्राभ्युदयास्तान् प्रकर्षेणाप्रतिबन्धलक्षणेन ददाति सम्पादयतीति तत्प्रदः, तस्य भावस्तत्त्वम् ॥ उक्तं च–– 'पात्रदानं फलं मुख्यं मोक्षः सस्यं कृषेरिव ॥ पलालमिव भोगास्तु फलं स्यादानुषङ्गिकम् ' ॥ ४८ ॥

गृहस्थव्यापारप्रभवपातकापनोदनसामर्थ्यं मुनिदानस्य दर्शयति––

पञ्चसूनापरःपापं गृहस्थःसञ्चिनोति यत् ।
तदपि क्षालयत्येव मुनिदानविधानतः ॥ ४९ ॥

टीका––यत्पापं सञ्चिनोति सम्बध्नाति गृहस्थः । किंविशिष्टः सन्, पञ्चसूनापरः, पेषणी कुट्टनी चुल्ली उदकुम्भी प्रमार्जनी चेति पञ्च क्रिया सूना इति प्रसिद्धाः । सूना इव सूना प्राणिघातस्थानसाधर्म्यात् । पञ्च सूना पराः प्रधानानि यस्य स पञ्चसूनापरः । आसामवश्यम्भाविन्वाद्गृहस्थस्य प्राधान्येनोपादानं । तेन ततो अन्यान्यपि पापकर्माणि गुणभावेन गृहिणः सगृह्यन्ते । क्षालयत्येव अवश्यं स्फेटयति । गृहस्थः । किं तत्, तदपि पञ्चावश्यकार्यव्यापारहेतुकं पापं । अपिर्विस्मये समुच्चये वा । न केवलं तदेव पापं क्षालयति व्यापारान्तरप्रभवमपीत्यर्थः । कस्मात्, मुनिदानविधानतः मुनये उत्तमपात्राय दानं स्वपरोपकाराय स्वद्रव्यातिसर्जनं मुनिदानं तस्य विधानं विधिवत्प्रयोगस्तस्मात्तेन वा ॥ ४९ ॥

दानस्य कर्त्रादीना फलानि दृष्टान्तमुखेन स्पष्टयति—

यत्कर्ता किल वज्रजङ्घनृपतिर्यत्कारयित्री सती
श्रीमत्यप्यनुमोदका मतिवरव्याघ्रादयो यत्फलम् ।
आसेदुर्मुनिदानतस्तदधुनाऽप्याप्तोपदेशाद्दृक-
व्यक्तं कस्य करोति चेतसि चमत्कारं न भव्यात्मनः ॥५०॥

टीका—किल एवं ह्यार्षे श्रूयते । यदासेदु प्राप्ता । के ते, मुनिदानस्य कर्त्रादिभावमापन्ना वज्रजङ्घमहाराजप्रभृतय । किं तत्फल । कस्मात् मुनिदानत । तत्कस्य चेतसि चमत्कारं न करोतीति समुदायेनार्थकथनं । इय तु प्रत्येकवाक्यपरिसमाप्तिरिदानीं प्रदर्श्यते । यत्किल वज्रजङ्घनृपतिरूप, उत्खेटनगराधिपतिर्वज्रजङ्घो नाम नृपतिरासस़ाद प्राप्त । किं तत्फल । कस्मान्मुनिदानत । किंविशिष्ट सन्, कर्ता दानस्य स्वातंत्र्येण विधाता । यच्च आससाद । काऽसौ, सती पतिव्रता । किनाम्नी, श्रीमती पुण्डरीकिणीनाथस्य वज्रदन्तचक्रिण पुत्री वज्रजङ्घनृपते पत्नी । कि तत्, फल । कस्मात्, मुनिदानत । किंविशिष्टा सती, कारयित्री स्वभर्तुर्दानं कुर्वत प्रयोजयित्री । अपि समुच्चये पूर्वत्रोत्तरत्र च चशब्दार्थे योज्य । यच्च आसेदु प्राप्ताः । के ते, मतिवरव्याघ्रादयो मुनिदानत फलं । मतिवरो वज्रजङ्घनृपतेर्मन्त्री आदिशब्दादानन्दो नाम तस्यैव पुरोहितोऽकम्पनाभिधान सेनापतिर्धनमित्रनामा च श्रेष्ठी । पुनरादिशब्दात्सूकरो वानरो नकुलश्च गृह्यते । मतिवरश्च व्याघ्रश्च मतिवरव्याघ्रौ तावादी येषामानन्दाख्यपुरोहितादीना तद्वनवासिसूकरादीनां च ते मतिवरव्याघ्रादय इति विग्रह । किंविशिष्टा सन्तोऽनुमोदका एप साधु करोतीति तद्दानस्यानुमन्तार. तत्कर्तृत्वकारयितृत्वानुमोदकस्वपरिणामद्वारायातसुकृतसंघातहेतुकं मुनिदानफल कर्तृकस्य भव्यात्मन· चेतसि चमत्कार न करोति ? सर्वस्यापि करोतीत्यर्थ. । कदा, अधुनाऽपि । कि पुनस्तत्काले । किंविशिष्टं सत्, आप्तोपदेशाद्दृकव्यक्तं आप्ताना परापरगुरूणामुपदेशो रहस्यवाक्यमाप्तोपदेश स एवाद्दृक आदर्श. स्वविषयार्थस्पष्टप्रतीतिनिमित्तत्वादाप्तोपदेशाद्दृकस्तत्र तेन वा व्यक्तं प्रतीतियोग्यतां नीतम् ॥ ५० ॥

अधुना अतिथ्यन्वेषणविधि श्लोकद्वयेनाह—

कृत्वा माध्याह्निकं भोक्तुमुद्युक्तोऽतिथये ददे ।
स्वार्थं कृतं भक्तमिति ध्यायन्नतिथिमीक्षताम् ॥ ५१ ॥

टीका–ईक्षतामतिथिसंविभागव्रती श्रावक अन्वेषयतु । क, अतिथि । किं कुर्वन्, ध्यायन् एकाग्रतया चिन्तयन् । किमिति, एतत् । किमेतदित्याह–ददे प्रयच्छाम्यह । किं तत्, भक्तमाहार । कस्मै, अतिथये प्रागुक्तलक्षणाय । किंविशिष्ट, कृत साधित । किमर्थं, स्वार्थं आत्मार्थं आत्मनो निमन्त्रणादौ सत्यात्मीयार्थमपि । स्वस्मै इद स्वार्थमित्यस्य कृता पदेन विग्रह । कीदृशो भूत्वा, एतद्ध्यायन्नतिथिमीक्षतामित्यत्राह–उद्युक्त उद्यत । किं कर्तुं, भोक्तुं भोजन करिष्याम्यहमित्यध्यवसानाभिमुख । किं कृत्वा, कृत्वा विधाय । किं तत्, माध्याह्निक मध्याह्ने भव कर्म स्नानदेवार्चनादिक ॥ ५१ ॥

द्वीपेष्वर्धतृतीयेषु पात्रेभ्यो वितरन्ति ये ।
ते धन्या इति च ध्यायेदतिथ्यन्वेषणोद्यतः ॥ ५२ ॥

टीका—ध्यायेच्च चिन्तयेत् । कोऽसौ, अतिथ्यन्वेषणोद्यत श्रावक । किं, इति एतत् । वर्तन्ते । के, ते गृहस्था । किंविशिष्टा, धन्या पुण्यवन्त । ये किं, ये वितरन्ति यथाविधि प्रयच्छन्ति । केभ्य, पात्रेभ्य । केषु, द्वीपेषु किंविशिष्टेषु, अर्धतृतीयेषु जम्बूद्वीपे धातकीखण्डे पुष्करवरद्वीपस्य चार्धे अर्धं तृतीयो येषा ते अर्धतृतीया इति विग्रह ॥ ५२ ॥

भूम्यादीनां देयत्व ग्रहणादौ च दान नैष्ठिकस्य हिंसासम्यक्त्वोपघातहेतु त्वप्रकाशनेन निषेद्धुमाह—

हिंसार्थत्वान्न भूगेहलोहगोऽश्वादि नैष्ठिकः ।
दद्यान्न ग्रहसङ्क्रान्तिश्राद्धादौ च सुदृग्द्रुहि ॥ ५३ ॥

टीका–न दद्यान्न प्रयच्छेत् । कोऽसौ, नैष्ठिको दर्शनिकादिगृही । किं तत्, भूगेहलोहगोऽश्वादि भूश्च भूमिर्गेह च गृह लोह च शस्त्रोपादान गौश्चानड्वाही अश्वश्च घोटको भूगेहलोहगोऽश्वास्ते आदयो यस्य कन्याहेमतिलरथ्यादयोऽस्य पुण्यार्थतया देयत्वेन समर्थितस्य द्रव्यस्य तत् भूगेहादिद्रव्यं नैष्ठिको न

दद्यात् । कस्मात्, हिंसार्थत्वात् प्राणिवधनिमित्तत्वात् । एतस्योत्तरस्य च समर्थनं ज्ञानदीपिकायां विस्तरतोऽभिहितं प्रतिपत्तव्यं । न च दद्यान्नैष्ठिकः स्वद्रव्यं । कस्मिन्, ग्रहसंक्रान्तिश्राद्धादौ ग्रहः सूर्याचन्द्रमसोरुपरागः, संक्रान्तिः सूर्यस्य राश्यन्तरसंक्रमणं श्राद्धं, मृतपित्राद्युद्देशेन दानं, ग्रहश्च संक्रान्तिश्च श्राद्धानि तान्यादयो यस्य वारव्यतिपातादेर्वाहि पुण्यार्थत्वेन समर्थितस्य पर्वणस्तद्ग्रहादि पर्व तस्मिन् । तस्य पुण्यार्थदानविषयत्वकल्पनाया दोषसमर्थनार्थमाह—किंविशिष्टे तत्र, सुदृग्द्रुहि सम्यक्त्वघातके । यद्यपि च नैष्ठिक इति वचनात्पाक्षिकस्यानुत्पन्नसम्यक्त्वावस्थतया भूम्यादिदानं न प्रतिषिध्यते तथापि ग्रहणादौ तस्यापि दानमविधेयमेव सम्यक्त्वोपघातस्य तेनाप्यवश्यं परिहार्यत्वात् ॥ ५३ ॥

तद्व्रतातिचारपरिहारार्थमाह—

त्याज्याः सचित्तनिक्षेपोऽतिथिदाने तदावृतिः ।
सकालातिक्रमपरव्यपदेशश्च मत्सरः ॥ ५४ ॥

टीका—त्याज्या तद्व्रतिना वर्जनीया । के ते, सचित्तनिक्षेपस्तदावृतिः कालातिक्रमपरव्यपदेशाभ्यां सह मत्सरश्चेत्यमी पञ्चातिचाराः । क अतिथिदाने अतिथिसंविभागव्रते । तत्र सचित्तनिक्षेपः—सचित्ते सजीवे पृथिवीजल कुम्भोप(चुल्लि)भुवलिधान्यादौ निक्षेपो देयस्य वस्तुनः स्थापनं । तच्चादानबुध्या तत्र निक्षेप्यमाणमतिचारः । तुच्छबुद्धिः खलु सचित्तनिक्षिप्तं किल संयता न गृह्णन्तीत्यभिप्रायेण देयं सचित्ते निक्षिपतीति तत्त्वं । संयतस्वगृहृत्सु लाभोऽयं ममेति च मन्यत इति प्रथमः ॥ १ ॥ तदावृतिः तेन सचित्तेन पत्रपुष्पादिना तथाविधयैव बुध्या आवृतिराच्छादनं द्वितीयः ॥ अथवा सचित्तनिक्षिप्तं तत्पिहितं च संयतस्याजानतः प्रयुज्यमानमतीचारः ॥ २ ॥ कालातिक्रमः साधूनामुचितस्य भिक्षासमयस्य लङ्घनं । स च दर्शनयोग्ये काले भोजयतोऽनगारवेलाया वा प्रागेव पश्चाद्वा भुञ्जानस्य च तृतीयः स्यात् ॥ ३ ॥ परव्यपदेशः परस्यान्यस्य सम्बन्धीदं गुडखण्डादीनि विशेषेणापदेशो व्याजादिः वाऽयमत्र दाता दीयमानोऽप्ययमस्येति समर्पणं चतुर्थः ॥ ४ ॥ मत्सरः कोपः । यथा मार्गितः सन् कुप्यति, [illegible]

मार्गितं न ददाति प्रयत्नेनोऽप्यादराभावाद्वा, अन्यदीयगुणासहिष्णुत्वं वा मत्सरः । यथाऽनेन तावच्छ्रावकेण मार्गितं दत्तं किमहमस्मादपि हीन इति परोन्नतिवैमनस्याद्ददाति । एतच्च मत्सरशब्दस्यानेकार्थत्वात्समगच्छत॥ तदुक्तम्—मत्सरः परसम्पत्त्यक्षमायां तद्वति क्रुधि ॥ एत एव चाज्ञानप्रमादानामतिचाराः । अन्यथा तु भङ्गा एवेति विभावनीयम् ॥ ५४ ॥

प्रकृतार्थोपसंहारपुरस्सरमुक्तदोषं निर्दिशन् श्रावकस्य महाश्रावकत्वमाह-

एवं पालयितुं व्रतानि विदधच्छीलानि सप्तामला-
न्यागूर्णः समितिष्वनारतमनोदीप्राप्तवाग्दीपकः ।
वैयावृत्यपरायणो गुणवतां दीनानतीवोद्धर-
श्चर्या दैवसिकीमिमां चरति यः स स्यान्महाश्रावकः ॥५५॥

टीका—स्यात् भवेत् । योऽसौ स गृही । किंविशिष्टो महाश्रावकः महानिन्द्रादीनां पूज्यः । शृणोति तत्त्वं गुरुभ्य इति श्रावकः महांश्चासौ श्रावकश्च महाश्रावकः । यः किं, चरति अनुतिष्ठति । कां, चर्याम् आचारम् । किंविशिष्टाम्, दैवसिकीं दिवसे अहोरात्रे भवां दैवसिकीं ताम् । पुनः किंविशिष्टाम्, इमाम् अनन्तराध्याये वक्ष्यमाणाम् । किं कुर्वन् विदधत् आचरन् । कानि, शीलानि व्रतपरिरक्षणानि । कति, सप्त गुणव्रतत्रयशिक्षाव्रतचतुष्टयलक्षणानि । किंविशिष्टानि विदधत्, अमलानि निरतिचाराणि । कथमेवमुक्तप्रकारेण । किं कर्तुं, पालयितुं पालयिष्याम्यहमित्यभिप्रायेण । कानि, व्रतानि सम्यग्दर्शनपूर्वाणि निरतिचारपञ्चाणुव्रतानि । किंविशिष्टः सन् आगूर्णः उद्यतः । कासु समितिषु श्रुतनिरूपितक्रमणभाषैषणादाननिक्षेपोत्सर्गप्रभृतिषु संयमरूपाणुव्रतनिष्ठ इत्यर्थः । अणुव्रतमहाव्रतानि हि समितिसहितानि संयमस्तद्रहितानि विरतिरिति सिद्धान्तः । तदुक्तम्—अणुवयमहव्वयाइं समिदीसहियाइं संजमो समिदीहिं विणा विरदी इति ॥ पुनः किंविशिष्टः अनारतमनोदीप्राप्तवाग्दीपकः आप्तानां परापरगुरूणां वाग्वचनमाप्तवाक् तज्जन्यश्रुतज्ञानमिह गृह्यते । कारणे कार्योपचारात् । आप्तवागेव दीपकः प्रदीपः स्वपरप्रकाशकत्वादाप्तवाग्दीपकः परमागमप्रदीपकः, अनारतं सततं मनसि चित्ते दीप्रो दीपनशीलोऽनारतमनोदीप्रस्तथाविध आप्तवाग्दीपको यस्य स तथोक्तः । पुनः किंविशिष्टो, वैया-

भृत्यपरायणो वैयावृत्त्यं निरवद्यवृत्त्या आपत्प्रतीकार तत्र परायणस्तत्परः। केषां, गुणवतां गुणभाजां संयमविकल्पातिशयभाजां रत्नत्रयाराधकानां वा । पुनः किं कुर्वन्, उद्धरन् दु खाद्विमोचयन् । कान्, दीनान् अवृत्तिव्याधिशोकार्तान् । कथमतीव पाक्षिकाद्यपेक्षयाऽतिशयेन । एतेन सम्यग्दर्शनशुद्धत्वं व्रतभूषणभूषितत्वं निर्मलशीलनिधित्वं संयमनिष्ठत्वं जिनागमज्ञत्वं गुरुशुश्रूषकत्वं दयादिसदाचारपरत्वं चेति सप्तगुणयोगान्महाश्रावकत्वं कस्यचित्सुकृतिन कालादिलब्धिविशेषवशाद्भवतीति तात्पर्यार्थोऽत्र प्रतिपत्तव्य इति भद्रम् ॥ ५५ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मटीकायां भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितश्चतुर्दश प्रकमाच पञ्चमोऽध्याय समाप्त. ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

इदानीमाहोरात्रिकमाचारं श्रावकस्योपदेष्टुकाम पूर्वं पौर्वाह्णिकीमितिकर्तव्यतां चतुर्दशभि श्लोकैर्व्याकरोति—

ब्राह्मे मुहूर्ते उत्थाय वृत्तपंचनमस्कृतिः ।
कोऽहं को मम धर्मः किं व्रतं चेति परामृशेत् ॥ १ ॥

टीका—परामृशेत् चिन्तयेत् श्रावक । किं, इति एतत् । तद्यथा—कोऽहं क्षत्रियो ब्राह्मणादिर्वा इक्ष्वाकुचरोद्भवोऽन्यवंशोद्भवो वाऽहमित्यादि चिन्तयेत् । तथा को मम धर्मो जैनोऽन्यो वा श्रावकीयो यत्यादिसंबधी वा मे देवादिसाक्षिकं प्रतिपन्नो नृप इति चिन्तयेत् । तथा किं व्रत मूलगुणरूपमणुव्रतादिरूपं वा मम । चशब्दात् के गुरवो ममेति । कुत्र ग्रामे नगरादौ वा वसामीति । कोऽयं काल. प्रभातादिरिति चेत्यादि समुच्चीयते । स्ववर्णादिस्मृतौ हि तद्विरुद्धपरिहारं सुखेन करोति । कथम्भूतो भूत्वा, वृत्तपञ्चनमस्कृतिः अन्तर्जल्पेन बहिर्जल्पेनापि वा वृत्ता पठिता पञ्चनमस्कृति णमो अरहंताणमित्यादिगाथारूप पञ्चनमस्कारो येन स तथोक्तः । किं कृत्वा

अनुवादमुखेन चैत्यालयव्रजनविधिमाह–

यथाविभवमादाय जिनाद्यर्चनसाधनम् ।
व्रजन्कौत्कुटिको देशसंयतः संयतायते ॥ ६ ॥

टीका—सयतायते सयत यतिमिवात्मानमाचरति । कोऽसौ, देशसयतः श्रावक । किं कुर्वन्, व्रजन्गच्छन् । किंविशिष्ट सन्, कौत्कुटिक पुरो युगमात्रप्रेक्षीत्यर्थं । किं कृत्वा, आदाय गृहीत्वा । किं तत्, जिनादीनामर्हच्छुताचार्याणामर्चनसाधन पूजाङ्ग जलगन्धाक्षतादिक । कथ यथाविभव स्वसम्पदनुसारेण ॥ ६ ॥

दृष्ट्वा जगद्बोधकरं भास्करं ज्योतिरार्हतम् ।
स्मरतस्तद्गृहशिरोध्वजालोकोत्सवोऽघहृत् ॥ ७ ॥

टीका—भवति । कोऽसौ, तद्गृहशिरोध्वजालोकोत्सव जिनचैत्यालयशिरस्केतनदर्शनानन्द । किंविशिष्टोऽघहृत् पापहर । कस्य, तथागच्छत श्रावकस्य । किं कुर्वत, स्मरत स्मृतिविषयीकुर्वत । किं तत्, ज्योति ज्ञानमय वाङ्मय वा तेज । किंविशिष्टमार्हत जैन । किं कृत्वा, दृष्ट्वा आलोक्य । क भास्करमादित्य । किंविशिष्ट, जगद्बोधकर जगता दिवाचरप्राणिनां बोध निद्रापनोद करोतीत्येवशील उद्यन्तमित्यर्थं । पक्षे बहिरात्मप्राणिनां मोहनिद्राप्रहरणशीलम् ॥ ७ ॥

वाद्यादिशब्दमाल्यादिगन्धद्वारादिरूपकैः ।
चित्रैरारोहदुत्साहस्तं विशेन्निसहीगिरा ॥ ८ ॥

टीका—विशेत् प्रविशेदसौ । क, त जिनालय । कया, निसहीगिरा निसहीति शब्दमुच्चारयन्नित्यर्थं । किंविशिष्ट सन्, आरोहदुत्साह प्रवर्द्धमानधर्माचरणोद्योग । कै, वाद्यादीत्यादि वाद्याना प्राभातिकतूर्याणामादिशब्देन स्वाध्यायस्तुतिमङ्गलगीतादीना च शब्दैर्निनादै । तथा माल्यादीना चम्पकपुष्पादिमालानां आदिशब्देन धूपचूर्णादीना च गन्धैरामोदैस्तथा द्वारस्य प्रवेशमुखस्य आदिशब्देन तोरणस्तम्भशिखरादीनां च रूपैश्चेतनाचेतनप्रतिच्छन्दै । किंविशिष्टैश्चित्रैर्नानाप्रकारैर्विस्मयकरैश्च ॥ ८ ॥

क्षालितांघ्रिस्तथैवान्तःप्रविश्यानन्दनिर्भरः ।
त्रिः प्रदक्षिणयेन्नत्वा जिनं पुण्याः स्तुतीः पठन् ॥ ९ ॥

टीका—प्रदक्षिणयेत् प्रदक्षिणीकुर्यादसौ । कं, जिनं स्थापनार्हन्तं । कथं, त्रिस्त्रीन् वारान् । किं कुर्वन्, पठन् निगदन् । काः, स्तुतीः स्तवनवाक्यानि । किंविशिष्टा, पुण्याः ज्ञानसंवेगादिगुणप्रव्यक्तीकरणेन अशुभकर्मनिर्जरणीः पुण्यास्रवणीश्च । किं कृत्वा, नत्वा त्रि प्रणम्य जिनं । किंविशिष्ट सन्, आनन्दनिर्भरः प्रमोदपूरितसर्वांग । किं कृत्वा, प्रविश्य आक्रम्य । किं तत्, अन्तः चैत्यालयमध्यदेशं । कथं, तथैव निसहीगिरैव । कथम्भूतो भूत्वा, क्षालिताङ्घ्रि धौतपाद. ॥ ९ ॥

सेयमास्थायिका सोऽयं जिनस्तेऽमी सभासदः ।
चिन्तयन्निति तत्रोच्चैरनुमोदेत धार्मिकान् ॥ १० ॥

टीका—अनुमोदेत साधु इमे अनुतिष्ठन्तीति मनसाऽभिनन्देदसौ । कान्, धार्मिकान् धर्मं चरतोऽनगारसागारभव्यजनान् । कथमुच्चैरतिशयेन मुहुर्मुहु-रित्यर्थे । क, तत्र चैत्यालये । प्रदक्षिणीकरणे वा । किं कुर्वन्, चिन्तयन् परामृशन् । कथमिति । किमिति इयं चैत्यालयभूमि । सा आगमप्रसिद्धा । आस्थायिका समवसरणभूमिः । तथा अयं प्रतिमार्पितो जिन स आगमप्रसिद्धोऽष्टमहाप्रातिहार्यादिविभूतिभूषितोऽर्हन् ।अमी आराधकभव्यास्ते आगम-प्रसिद्धा सभासदः सभ्या यत्यादयो द्वादश साक्षादर्हद्देवसेवावहिता ॥ १० ॥

अथेर्यापथसंशुद्धिं कृत्वाऽभ्यर्च्य जिनेश्वरम् ।
श्रुतं सूरिं च तस्याग्रे प्रत्याख्यानं प्रकाशयेत् ॥ ११ ॥

टीका—प्रकाशयेत् प्रतिपादयेदेष महाश्रावकः । किं तत्, प्रत्याख्यानं प्राग्गृहे गृहीतं । क, अग्रे । कस्य, तस्य सूरेः । किं कृत्वा, अभ्यर्च्य अभिमुख पूजयित्वा । कं, जिनेश्वरं श्रुतं सूरिं च । किं कृत्वा, कृत्वा विधाय । कां, ईर्यापथसंशुद्धिं । कथं, अथ प्रणामपूर्वकपुण्यस्तुतिपाठविशेषप्रदक्षिणीकरणा-नंतरमिति समन्वयः । अयमत्र विशेषः । ईर्या ईरणं गमनं पन्था मार्गो यस्य तदीर्यापथं संयमविराधन तस्य संशुद्धिः सम्यक् शोधनं प्रतिक्रमण-

मित्यर्थः । अभ्यर्च्य "जावरहंताणं भयवंताणं णमोकारं करोमीति" वचनात् । प्रतिक्रमणानन्तरं नमोऽर्हद्भ्य इत्यनेन " जयन्ति निर्जिताशेषसर्वथैकान्तनीतय । सत्यवाक्याधिपा शश्वद्विद्यानन्दा जिनेश्वरा " इत्यादिना वाचनिकनमस्कारेण जलादिपूजाष्टकेन वा अभिमुखं पूजयित्वा । एष क्रमः श्रुतसूर्योरपि यथास्वं कल्प्य । स एव जघन्येन वन्दनाविधि प्रकर्षेणृत्याऽस्य प्रथममेव गृहेऽनुष्ठानोपदेशात् ।। ११ ॥

ततश्चावर्जयेत्सर्वान्यथार्हं जिनभाक्तिकान् ।
व्याख्यातः पठतश्चार्हद्वचः प्रोत्साहयेन्मुहुः ॥ १२ ॥

टीका--ततश्च प्रत्याख्यानप्रकाशनावसानक्रियाकल्पनिवर्तनानन्तरं आवर्जयेदनुरञ्जयेदसौ । कान्, जिनभाक्तिकान् अर्हद्देवाराधकान् । किंविशिष्टान्, सर्वान् उत्तमादिभेदभिन्नान् । कथं, यथार्हं यथायोग्यप्रतिपत्त्या । तत्र मुनीन्नमोऽस्त्विति आर्यिका वंदे इति । श्रावकानिच्छामीत्यादिप्रसिद्धविनयकर्मणोपचरेदित्यर्थ । उक्तं च-अर्हद्रूपे नमोऽस्तु स्यादिरतौ विनयक्रिया । अन्योन्य क्षुल्लके चाहमिच्छाकारवच सदा ॥ तथा प्रोत्साहयेत् प्रकर्षेण उद्योगवत कुर्यादसौ । कान्, पुरुषान् । किं कुर्वतो, व्याख्यात पदपदार्थादिसमर्थनलक्षणेन विशेषेण आ शिष्यप्रबोधोत्पत्तेर्वर्णयत उपाध्यायादीनित्यर्थ. । किं तद्याख्यातोऽर्हद्वचः परमागमयुक्त्यागमशब्दागमादिभेदं जिनप्रवचनं । न केवल व्याख्यात. पठतश्च अधीयानान् शिष्यादीनित्यर्थ । कथ, मुहु पुन पुन ॥ १२ ॥

स्वाध्यायं विधिवत्कुर्यादुद्धरेच्च विपद्धतान् ।
पक्वज्ञानदयस्यैव गुणाः सर्वेऽपि सिद्धिदाः ॥ १३ ॥

टीका--कुर्यादसौ । क, स्वाध्यायं श्रुताध्ययनं यथोचितं वाचनादिरूपं वा किंचित्, विधिवत् शास्त्रोक्तविधानेन व्यञ्जनशुद्ध्यादिलक्षणाष्टविधवचनेन । तथा उद्धरेत् विपदो विमोचयेदसौ । कान्, विपद्धतान् शारीरमानसागन्तुकव्यसितदाशीन् दीनानित्यर्थ । यतो भवन्ति । के ते, गुणा काठिन्यत्यागशौर्यसौन्दर्योदय । किं विशिष्टा , सिद्धिदा वाञ्छितार्थसम्पादका मुक्तिप्रदा वा । किं केचिदेवेत्याह, सर्वेऽपि निःशेषा । कस्य, पक्वज्ञानदयस्यैव पुंसः. ज्ञानं तत्त्वाव-

बोध दया सर्वप्राणिषु करुणा तु खेदिष्वभिलापलक्षणा, ज्ञान च दया च ज्ञानदये, पक्वे परिणते मार्गीभूते ज्ञानदये यस्य स पक्वज्ञानदयस्तस्यैव । न तु यद्दिर्योतिज्ञानस्य कदाचित्कानुकम्पस्य चैवेत्येवशब्दार्थ ॥ १३ ॥

एव विधेयमाचरणमुपदिश्य निषिद्ध तदुपदेष्टुमाह—

मध्येजिनगृहं हासं विलासं दुःकथां कलिम् ।
निद्रां निष्ठ्यूतमाहारं चतुर्विधमपि त्यजेत् ॥ १४ ॥

टीका—त्यजेदसौ हास्यादीन् सप्त । क, मध्येजिनगृह जिनगृहमत्र महा श्रावकापेक्षया सकलश्चैत्यालय इतरापेक्षया तदेकदेशो गन्धकुट्यादि । जिनगृहस्य मध्ये मध्येजिनगृह । पारे मध्ये तया वेत्यनेनाव्ययीभाव । हासो हास्य । विलास शृगारचेष्टाविशेष । दु कथा दुष्टा चित्तकालुष्यकारिणी कथा कामक्रोधादिकथा राजादिकथा वा । कलि कलह । निद्रा स्वाप । निष्ठ्यूत मुखश्लेष्मादिनिरसन । आहार चतुर्विध खाद्यस्वाद्यलेह्यपानलक्षणम् ॥ १४ ॥

एव प्राभातिक धर्मकर्मोपदिश्यानन्तरविधेयमर्थार्जनादिविधिमभिधत्ते—

ततो यथोचितस्थानं गत्वाऽर्थेऽधिकृतान् सुधीः ।
अधितिष्ठेद्व्यवस्येद्वा स्वयं धर्माविरोधतः ॥ १५ ॥

टीका—तत प्राभातिकधर्मानुष्ठाननिष्ठापनानन्तर अधितिष्ठेत् सनाथीकुर्यात् । कोऽसौ, सुधी लोकद्वयहिताहितविचारचतुर श्रावक । कान्, अर्थेऽधिकृतान् अर्थस्यार्जने रक्षणे वर्द्धने च नियुक्तान् । किं कृत्वा गत्वा प्राप्य । किं तत्, स्थान प्रदेश । किविशिष्ट, यथोचित यद्यद्स्यार्थार्जनादियोग्य तत्तेन गम्यमित्यर्थ । वा पक्षान्तरे । तादृक्सामग्र्यभावे । पुन सुधी स्वयमात्मना अथ व्यवस्येत् तदर्जनादौ व्याप्रियेत । कस्मात्, धर्माविरोधत प्रतिपन्नजिनधर्मानुपघातेन । स च राज्ञा दरिद्रेश्वरयोर्मान्यामान्ययोरुत्तमनीचयोश्च माध्यस्थ्येन न्यायदर्शनात् नियोगिना च राजार्थप्रजार्थसाधनेन, वणिजा च कूटतुलामानादिपरिहारेण वनजीविकादिपरिहारेण च बोद्धव्य ॥ १५ ॥

पौरुषस्य वैफल्यसाफल्यादौ विषादहर्षपरिहारार्थमाह—

•

निष्फलेऽल्पफलेऽनर्थफले जातेऽपि पौरुषे ।
न विषीदेन्नान्यथा वा हृष्येल्लीला हि सा विधेः ॥ १६ ॥

टीका—न विषीदेत् न विषादं गच्छेदसावर्थानुबंधपरः । क्व सति, पौरुषे पुरुषकारे । किंविशिष्टे, जाते निष्पन्ने । कीदृशे, निष्फले चिकीर्षितप्रयोजनवन्ध्ये । तथा अल्पफले सम्भावितार्थलाभान्न्यूनार्थलाभे । तथाऽनर्थफले अनर्थोऽर्थनाशादिलक्षणपुरुषार्थभ्रंश फल साध्यं यस्य सोऽनर्थफलस्तस्मिन् । अपिः समुच्चये । न वा हृष्येत् हर्षं गच्छेदसौ । क्व सति, पौरुषे जाते सति । कथमन्यथा सफले बहुफलेऽर्थानुबन्धफलेऽपीत्यर्थः । कुत इत्याह, हि यस्मात् वर्तते । काऽसौ, सा पौरुषस्य नैष्फल्यसाफल्यादिजननलक्षणा लीला निरंकुशप्रवृत्ति । कस्य, विधे पुरार्जितपापपुण्यकर्मणः ॥ १६ ॥

अथ प्राणयात्राविध्यर्थं नवश्लोकीमाह—

कदा माधुकरी वृत्तिः सा मे स्यादिति भावयन् ।
यथालाभेन सन्तुष्ट उत्तिष्ठेत तनुस्थितौ ॥ १७ ॥

टीका—ततश्च उत्तिष्ठेत अर्थचिन्तातो विरम्योद्यमं कुर्यादसौ । क्व, तनुस्थितौ शरीरस्वास्थ्यानुवृत्तिनिमित्तप्रवृत्तौ । किंविशिष्ट सन्, सन्तुष्ट. धृतिगत । केन, यथालाभेन यो यो लाभो मूलधनादधिकं धनं तेन । किं कुर्वन्, भावयन् चित्ते धारयन् । किं, इति एतत् । किमेतदित्याह, कदा कस्मिन्काले । स्याद्भविष्यति । काऽसौ, सा सूत्रोक्ता वृत्ति. अर्थात् भिक्षा । कस्य, मे मम । किंविशिष्टा, माधुकरी मधुकराणा भ्रमरादीनामियं माधुकरी तत्संबंधिनीच । पुष्पाणामिव दातृणामनुपपीडनेनात्मप्रीणनहेतुत्वात् ॥ १७ ॥

नीरगोरसधान्यैधः—शाकपुष्पाम्बरादिभिः ।
क्रीतैः शुध्यविरोधेन वृत्तिःकल्प्याऽघलाघवात् ॥१८॥

टीका—कल्प्या सम्पाद्या । श्रावकेण । काऽसौ, वृत्ति स्वास्थ्यानुवृत्ति । कस्मात्, अघलाघवात् पापाल्पत्वात् । तदाश्रित्येत्यर्थः कैः । कल्प्या, नीरादिभि. । किंविशिष्टैः, क्रीतै. मूल्यदानेन गृहीतै. । केन, शुध्यविरोधेन स्वप्रतिपन्नसम्यक्त्वव्रतानुपघातेन । तत्र नीरं जलं गोरसः क्षीरादि धान्यं

तण्डुलादि एधांसि इन्धनानि शाकं पत्रादिहरितक पुष्पाम्बरादि कुसुमवस्त्र-खट्वापट्टकतृणादि ॥ १८॥

सधर्मिणोऽपि दाक्षिण्याद्विवाहादौ गृहेऽप्यदन्।
निशि सिद्धं त्यजेदीनैर्व्यवहारं च नावहेत् ॥ १९ ॥

टीका—त्यजेदसौ । किं तत्, सिद्ध निष्पन्नमन्न । क, निशि रात्रौ तदा ह्यन्नपाके त्रसघातपातौ परिहर्तुमशक्यौ । किं कुर्वन्, अदन् भुञ्जान क, गृहे । कस्य, सधर्मिणोऽपि न पर पुत्रादे । किं तदासीनसाधर्मिकस्यापि । कस्मात्, दाक्षिण्यात् उपरोधवशात् । क, विवाहादावपि न परमिष्टभोज्यादौ । तथा नावहेत् न कुर्यात् । क, व्यवहार दानप्रतिग्रहादिलक्षणं कर्म । कै सह, हीनै सर्वधर्मधनादिना रहितैरव्रतैर्वा गृहिभि सह ॥ १९॥

उद्यानभोजनं जन्तुयोधनं कुसुमोच्चयम् ।
जलक्रीडान्दोलनादि त्यजेदन्यच्च तादृशम् ॥ २० ॥

टीका—त्यजेदसौ । किं तत्, उद्यानभोजन उद्यानिकाया जेमन । तथा जन्तुयोधन पदातिकुक्कुटमेषादीना परस्परसम्प्रहार । तथा कुसुमोच्चय पुष्पावचय । तथा जलक्रीडा शृङ्गारादिभि सहर्षस्पर्द्धं जलव्यात्युक्षी तथा आन्दोलन दोलाखेलनकर्म । आदिशब्देन चैत्रासितप्रतिपदादिषु भस्मव्यतिकारिपरिहासादि । किं बहुना अन्यच्च परमपि तादृश द्रव्यभावहिंसाबहुल । कौमुदीमहोत्सवकुहननाटकावलोकनसग्रामदर्शनरासक्रीडादिकम् ॥ २० ॥

यथादोषं कृतस्नानो मध्याह्ने धौतवस्त्रयुक् ।
देवाधिदेवं सेवेत निर्द्वन्द्वः कल्मषच्छिदे ॥ २१ ॥

टीका—सेवेत आराधयेदसौ स्नपनादिभि । क, देवाधिदेव देवैरिन्द्रादिभिरधिकमाचार्यादिभ्योऽतिरिक्त दीव्यते स्तूयते आराध्यत इति देवाधिदेवो भगवानर्हन् । किंविशिष्ट सन्, निर्द्वन्द्व समस्तव्याक्षेपमुक्त । किमर्थं, कल्मषच्छिदे प्राचीनतात्कालीनपापच्छेदार्थं । कथम्भूतो भूत्वा, यथादोष दोषानुसारेण मध्याह्ने अनगारभामरीवेलात्ययासन्नसमये कृतस्नान कृत विहितं स्नान यथोचितमङ्गप्रक्षालनादिक येन स तथोक्त । तथा धौतवस्त्रयुक् धौते

क्षालिते जलादिना निर्मलीकृते वस्त्रे परिधानोत्तरीये युनक्ति त्यागे सम्बध्नातीति धौतवस्त्रयुक् ॥ २१ ॥

जिनस्नपनाद्युपासितविधिमाह—

आश्रुत्य स्नपनं विशोध्य तदिलां पीठ्यां चतुष्कुम्भयुक्
कोणायां सकुशश्रियां जिनपतिं न्यस्यान्तमाप्येष्टदिक् ।
नीराज्याम्बुरसाज्यदुग्धदधिभिः सिक्त्वा कृतोद्वर्तनं
सिक्तं कुम्भजलैश्च गन्धसलिलैः सम्पूज्य नुत्वा स्मरेत् ॥

टीका—स्मरेत् यथाशक्ति जपेत् ध्यायेत् । कोऽसौ, माध्याह्निकक्रियाकरणोद्यतः श्रावकः । कं, जिनपतिं जिनेन्द्रं । किं कृत्वा, नुत्वा नित्यवन्दनादिविधिना वन्दित्वा । किं कृत्वा, सम्पूज्य जलादिभिरष्टाभिः सम्यगर्चयित्वा । किंविशिष्टं सन्तं, सिक्तमभिषिक्तं । कैः, कुम्भजलैः पूर्वस्थापितकलशाम्भोभिः । तथा गन्धसलिलैः सुरभिद्रव्यमिश्रोदकैः । कथं कृत्वा, कृतोद्वर्तनं एलादिचूर्णकल्ककषायैरुद्वर्त्यं कृतनन्द्यावर्ताद्यवतारणं । किं कृत्वा, सिक्त्वा अभिषिच्य । कैः, अम्बुरसाज्यदुग्धदधिभिः अम्बूनि तीर्थोदकानि, रसा इक्षुद्राक्षाम्रादिनिर्यासाः, आज्यानि हैयङ्गवीनादिघृतानि, दुग्धानि गव्यादिक्षीराणि, दधीनि माहिषादीनि, अम्बूनि च रसाश्च आज्यानि च दुग्धानि च दधीनि चाम्बुरसादीनि पञ्च स्नानीयद्रवद्रव्याणि तैः क्रमेण जिनपतिमभिषिच्येति संबंधः । किं कृत्वा, नीराज्य पूजापुरःसरं मृत्स्नागोमयभूतिपिण्डदूर्वादर्भपुष्पाक्षतसचन्दनोदकैर्नीराजनं प्रापय्य । कथं यथा भवति, इष्टदिक् इष्टा यज्ञांशं प्रापिता जिनयज्ञमभिवर्द्धयन्तो वाऽनुमोदिता दिशस्तत्स्था दिक्पाला दशेन्द्रादयो यत्र नीराजनकर्मणि तदिष्टदिक् । अथवा इष्टा दिशो येन सोऽयमिष्टदिग्यष्टा । किं कृत्वा, न्यस्य स्थापयित्वा । कस्यां, पीठ्यां स्नपनपीठस्योपरि । किंविशिष्टायां, चतुष्कुंभयुक्कोणायां चत्वारः कुंभयुजः पूर्णकलशोपेताः कोणा यस्याः सा चतुष्कुंभयुक्कोणा तस्याः । पुनः किंविशिष्टायां, सकुशश्रियां दर्भैश्चन्दननिर्मितश्रीकाराक्षरेण च सहितायां । श्रियामित्युपलक्षणं तेन ह्रीकारोऽपि लेख्य । अन्ये तु अक्षतनिर्मितं श्रीकारमेवाहुः । तदुक्तं । “ निस्तुषनिर्व्रणनिर्मलजलार्द्रशालीयतण्डुलालिखिते ।

श्रीकामः श्रीनाथं श्रीवर्णे स्थापयाम्युच्चैः '' ॥ किं कृत्वा, विशोध्य रत्नाम्बुकुशाग्निना सन्तर्पणविधिभिः शोधयित्वा। कां, तदिलां स्नपनभूमिं। किं कृत्वा, आश्रय्य कर्तव्यतया प्रतिज्ञाय। किं तत्, स्नपनमभिषेकं। अत्र आश्रुत्य स्नपनामिति प्रस्तावना, विशोध्येत्यादि पुराकर्म, न्यस्येति स्थापना, अन्तमाप्येति सन्निधापनं, इष्ट्वेतिगिरयादि पूजेति प्रतिपत्तव्यम्। षड्विधं हि देवसेवनामाहुः। तद्यथा—प्रस्तावना पुराकर्म स्थापना सन्निधापनम्। पूजा पूजाफलं चेति षड्विधं देवसेवनम् ॥ १ ॥ एतज्जिनस्नपनादिविधानसूचनामात्रं विस्तरतस्त्वेतत्पूर्वाचार्यकृतस्नानशास्त्रेष्वस्मत्कृतनित्यमहोद्याख्यस्नानशास्त्रे च द्रष्टव्यम् ॥ २२ ॥

यज्ञान्तरोपदेशार्थमाह—

सम्यग्गुरूपदेशेन सिद्धचक्रादि चार्चयेत्।
श्रुतं च गुरुपादांश्च को हि श्रेयसि तृप्यति ॥ २३ ॥

टीका—अर्चयेच्चासौ। किं तत्, सिद्धचक्रादि सिद्धचक्रं लघु बृहद्वा आदिशब्देन पार्श्वनाथयन्त्रं गणधरवलयं सारस्वतयन्त्रमन्यद्वा सम्यक्त्वसंयमाविरोधेन दृष्टादृष्टफलप्रसादकत्वेन जिनशासने प्रसिद्धं। एतच्च रहस्यभावात्पदस्थध्यानप्ररूपणावसरे प्रपंचयिष्यते। केन तत्पूजयेत्, सम्यग्गुरूपदेशेन अन्यथा नैष्फल्यप्रत्यवायबाहुल्यसम्भवात्। तथा श्रुतमर्चयेत्। गुरोश्च दीक्षकाचार्यस्य पादान् तृतीयोऽपि चशब्दस्त्रयाणामपि पूज्यानां तुल्यकक्षतासूचनार्थं। कुत एतद्यज्ञान्तरप्रदर्शनं ? जिनयज्ञेनैव सर्वमनोरथपरिपूर्तिसंसिद्धेरिति शङ्कायामिदमाह—को हीत्यादि। हि यस्मात् कस्तृप्यति तृप्तमात्मानं मन्यते कस्मिन्, श्रेयसि अभ्युदयनि श्रेयससाधनार्थे कर्मणि ॥ २३ ॥

ततः पात्राणि सन्तर्प्य शक्तिभक्त्यनुसारतः।
सर्वांश्चाप्याश्रितान् काले सात्म्यं भुञ्जीत मात्रया ॥२४॥

टीका—ततो जिनयज्ञादिनिर्वर्तनानन्तरं पात्रसन्तर्पणादि कृत्वा भुञ्जीत अभीयादसौ। किं तत्, सात्म्यं वस्तु। सात्म्यलक्षणं यथा '' पानाहारादयो यस्य विरुद्धाः प्रकृतेरपि। सुखित्वायावकल्पंते तत्सात्म्यमिति कथ्यते। ''

कया भुञ्जीत, मात्रया सुखजरणलक्षणया यदाह–'सा च मात्रा वह्निमनवसादयन् भुङ्क्ते" इति। अपि च–'गुरूणामर्धसौहित्यं लघूनां नातितृप्तता। मात्राप्रमाणं निर्दिष्टं सुखं तावद्विजीर्यति॥" क मात्रया सात्म्यं भुञ्जीत? काले बुभुक्षाकाले। भोजनकालं तद्विस्तरशास्त्रविदः–"प्रसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे, विशुद्धे चोद्गारे क्षुदुपगमने वातेऽनुसरति॥ तथाऽग्नावुद्रिक्ते विशदकरणे देहे च सुलघौ, प्रयुञ्जीताहारं विधिनियमितं कालः स हि मतः।" किं कृत्वा, सन्तर्प्य सम्यक् प्रीणयित्वा। कानि, पात्राणि प्रागुक्तलक्षणानि। कथं, ततस्तदनन्तरं। कस्मात्, शक्तिभक्त्यनुसारतः शक्तिभक्त्योरनतिक्रमेण। न केवलं पात्राणि सन्तर्प्य सर्वानप्याश्रिताश्च तिरश्चोऽपि स्वयं परिगृहीतान् सन्तर्प्य सन्तोष्येत्यर्थः। कालविशेषोपदेशेन च माध्याह्निकदेवपूजाभोजनयोर्नास्ति कालनियम इति बोधयति। तीव्रबुभुक्षायां हि मध्याह्नादर्वागपि गृहीतप्रत्याख्यानं तिरयित्वा देवपूजादिपूर्वकं भोजनं कुर्वन् न दुष्यति॥ २४॥

लोकद्वयाविरोधीनि द्रव्यादीनि सदा भजेत्।
यतेत व्याध्यनुत्पत्तिच्छेदयोः स हि वृत्तहा॥ २५॥

टीका–भजेत् सेवेताय। कानि, द्रव्यादीनि द्रव्यक्षेत्रकालभावकर्मसहायादीनि। किंविशिष्टानि, लोकद्वयाविरोधीनि इहलोके परलोके च पुरुषार्थानुपघातकानि। क, सदा सर्वदा तथा यतेत तात्पर्यं कुर्यात्। कयोः, व्याध्यनुत्पत्तिच्छेदयोः व्याधेः ज्वरादिरोगस्यानुत्पत्तावप्रादुर्भावे छेदे च निवर्तने। कुत इत्याह–हि यस्मात् भवति। कोऽसौ, स व्याधिः। कथंभूतो, वृत्तहा संयमस्य हन्ता॥ २५॥

तदुत्तरकरणीयनिर्णयार्थमाह–

विश्रम्य गुरुसब्रह्मचारिश्रेयोऽर्थिभिः सह।
जिनागमरहस्यानि विनयेन विचारयेत्॥ २६॥

टीका–ततश्च विचारयेत् इदमित्थं भवति न वेति सम्प्रधारयेदसौ। गुरुमुखात् श्रुतान्यपि शास्त्ररहस्यानि परिशीलनाविकलानि न चेतसि सुदृढप्रति-

नि भवन्तीति मनसि कृत्वा । कानि, जिनागमरहस्यानि अर्हत्सिद्धान्त-
पदपर्याणि । केन, विनयेन प्रश्रयेण । कथं, सह । कैः, गुर्वादिभिः । किं कृत्वा,
.श्रमं भोजनश्रममपनीय । गुरवोऽत्र शास्त्रोपदेष्टार । सब्रह्मचारिणः
सहाध्यायिनः श्रेयोऽर्थिन आत्महितकामा. ॥ २६ ॥

ततश्च—

सायमावश्यकं कृत्वा कृतदेवगुरुस्मृतिः ।
न्याय्ये कालेऽल्पशःस्वप्याच्छक्त्या चाब्रह्म वर्जयेत् ॥२७॥

टीका—स्वप्यात् शयीतासौ । कियत्, अल्पशः अल्पं । क, काले । किंवि-
शिष्टे, न्याय्ये न्यायादनपेते । न्याय्यश्च कालो रात्रेः प्रथमयामोऽर्द्धरात्रं वा
शरीरसात्म्येन अल्पश इति च विशेषणमिति विधि । सविशेषणे हि विधि-
निषेधौ विशेषणमुपसंक्रामत इति न्यायात् । स्वप्यादिति च विशेष्यं । न च
तत्र विधिर्दर्शनावरणीयकर्मोदयेन स्वापस्य स्वतःसिद्धत्वात् । अल्पमपि च
प्रशस्तं यथा भवति तथा स्वप्यादिति शास्त्रा चोत्यते । तेन रोगमार्गश्रमादौ
बह्वपि स्वप्यादिति विधि । किंविशिष्टः सन्, कृतदेवगुरुस्मृति कृता देवस्या-
र्हतो गुरूणां च तदुपदेष्टॄणां च स्मृतिर्मनस्यारोपणं येन स तथोक्तः । किं,
कृत्वा । किं तत्, आवश्यकं देवार्चनं भूमिकौचित्येन च सामयिकादिषट्कं ।
कदा, सायं संध्यासमये । तथा वर्जयेदसौ । किं तत्, अब्रह्म मैथुनं । कया,
शक्त्या आत्मनः संयमसामर्थ्येन । उपलक्षणं चैतत् तेन यावच्च तेन्या चिर-
वासनावसाना प्रवृत्तितो ब्रतयेदिति वचनाद्भोगादिनियमं विना क्षणमपि
स्थातुं न युक्तमिति स्मारयति ॥ २७ ॥

अथ परिणतायां रात्रौ निद्राच्छेदे सति निर्वेदादिभावनां कुर्यादित्युपदे-
शार्थं ससदश श्लोकानाह—

निद्राच्छेदे पुनश्चित्तं निर्वेदेनैव भावयेत् ।
सम्यग्भावितनिर्वेदः सद्यो निर्वाति चेतनः ॥ २८ ॥

टीका—भावयेत् संस्कुर्यादसौ । किं तत्, चित्तं मनः । केन, निर्वेदेन
संसारशरीरविषयवैराग्येण । न पुनरर्थादिचिन्तादेवेषतात्स्वार्थ. । क सति, निद्रा-
च्छेदे स्वापनिवृत्तौ । पुन शब्दो विशेषार्थः । यतो निर्वाति मतामसुखमनुभ-

वति । कोऽसौ, चेतन आत्मा । कथ, सद्यस्तत्क्षण एव । किंविशिष्ट सन्, सम्यग्भावितनिर्वेद. यथावदभ्यस्तवैराग्य ॥ २८ ॥

संसारनिर्वेदार्थमाह—

दुःखावर्ते भवाम्भोधावात्मबुध्याऽध्यवस्यता ।
मोहाद्देहं हहाऽऽत्माऽयं बद्धोऽनादि मुहुर्मया ॥ २९ ॥

टीका—हहा कष्टं । बद्धो ज्ञानावरणादिकर्मपरतन्त्रीकृत । कोऽसावयं स्वसंवेदनवेद्य आत्मा जीव । केन, मया आत्मना । कथ, मुहुर्वारंवारं । कथमनादि आदिरहितं । किं कुर्वता, अध्यवस्यता निश्चिन्वता । क, देहं । कया, आत्मबुध्या देह एवाहमिति सकल्पेन । कस्मात्, मोहात् अविद्यासस्कारात् । क, भवाम्भोधौ संसारसागरे। किंविशिष्टे, दु खावर्ते दु खानि नारकादिभववेदना आवर्ता जलभ्रमणानीव अनियतोत्थायत्वाद्दुर्निवारत्वाच्च यत्र स दुःखावर्तस्तस्मिन् ॥ २९ ॥

तदिदानीं किं करोमीत्याह—

तदेनं मोहमेवाहमुच्छेत्तुं नित्यमुत्सहे ।
मुच्येतैतत्क्षये क्षीणरागद्वेषः स्वयं हि ना ॥ ३० ॥

टीका—तत्तस्मादुत्सहे प्रयते अह । किं कर्तुमुच्छेत्तु क्षपयितु । कमेन प्रतीयमानं मोहमज्ञान । न देहादिकमित्येवशब्दार्थ । कथ, नित्यं सन्ततं हि यस्मात् मुच्येत मुक्तो भवेत् । कोऽसौ, ना पुरुषो न प्रधानादिकं । किंविशिष्ट सन्, क्षीणरागद्वेष । कथं, स्वयमात्मना प्रयत्नमन्तरेणैव । क सति, एतत्क्षये मोहापगमे सति मोहमूलत्वाद्रागद्वेषयो ॥ ३० ॥

इदानीं बन्धमूलामनर्थपरम्परा परामृशन् पुनर्बंधानुबन्धिनं विषयमेवाभिनिवेश संहर्तुं प्रतिज्ञा करोति—

बन्धाद्देहोऽत्र करणान्येतैश्च विषयग्रहः ।
बन्धश्च पुनरेवातस्तदेनं संहराम्यहम् ॥ ३१ ॥

टीका—भवति । कोऽसौ, देह शरीरं । कस्मात्, बन्धात् पुण्यपापात्मककर्मविपाकात् । अत्र च देहे भवन्ति । कानि, करणानि स्पर्शनादीन्द्रि-

याणि । भवति च । कोऽसौ, विषयग्रह । स्पर्शाद्यर्थपरिच्छेदग्रह । कै, एतैः करणै तथा भवति । कोऽसौ, बन्ध शुभाशुभकर्मपुद्गलादान । कस्मात्. अत विषयग्रहात् । कथ पुनरेव भूयोऽपि । यत एव ततस्मान् सहरामि निर्मूलयाम्यह । क, एन बन्धमूल विषयग्रहम् ॥ ३१ ॥

विषयेष्वपि योषिदभिलापस्यात्यन्त दुर्निवार त्वात् तन्निग्रहोपायमनुचिन्तयन्नाह—

ज्ञानिसङ्गतपोध्यानैरप्यसाध्यो रिपुः स्मरः ।
देहात्मभेदज्ञानोत्थवैराग्येणैव साध्यते ॥ ३२ ॥

टीका—साध्यते निगृह्यते । कोऽसौ, स्मर मैथुनसज्ञासस्कारोद्बोध । किंविशिष्टो, रिपु ऐहिकामुत्रिकपुरुषार्थभ्रशहेतुतयाऽपकर्ता । केन कर्त्रा करणेन वा, देहेत्यादि देहश्चौदारिकादिशरीरत्रय आत्मा जीवानदमय पुमान् देहश्च आत्मा च देहात्मानौ तयोर्भेदेन पृथक्त्वेन भेदस्य वा ज्ञान प्रतिपत्तिस्तस्मा दुत्था उत्थानमुद्भवो यस्य तद्देहात्मभेदज्ञानोत्थ तच्च तद्वैराग्य च भवाङग भोगनिर्वेद उपेक्षा वा तेनैवापदीर्घ्यादिसुखेन वैराग्येणात्मात्ममाननलक्षणेन । किंविशिष्टोऽसौ असाध्य साधयितुमशक्यो व्यभिचारदर्शनात् । कै , ज्ञानिसगतपोध्यानै ज्ञानिनामात्मदर्शिना सग ससर्गो ज्ञानिसग तप कायक्लेशादिलक्षणमाचरण ध्यान पदपदार्थादिचिन्तन, ज्ञानिसङ्गश्च तपश्च ध्यान च ज्ञानिसङ्गतपोध्यानानि तैर्यैस्तै समस्तैवा बाह्यलोकाना कन्दर्पशत्रुनिग्रहकत्वेन प्रसिद्धै । अपिर्विस्मये ॥३२ ॥

आत्मदेहान्तरज्ञानार्थितया सन्यस्तसमस्तसङ्गाना प्राचा श्लाघापूर्वकमात्मान कलत्रमात्रत्यागेऽप्यसमर्थं गर्हमाण प्राह—

धन्यास्ते येऽत्यजन् राज्यं भेदज्ञानाय तादृशम् ।
धिङ्मादृशकलत्रेच्छातंत्रगार्हस्थ्यदुःस्थितान् ॥ ३३ ॥

टीका—ते भरतसगरादयो भवन्ति । किंविशिष्टा , धन्या तप श्रुताभ्या सात्मसात्कृत-सुकृतविशेषफलोपभोगात्मे, सुदुस्त्यजमात्राज्यलक्ष्मीपरित्यागितया महतामपि श्लाघ्या । ये कि, ये अत्यजन् जरत्तृण मेव त्यक्तवन्त किं तत् राज्य । किंविशिष्ट, तादृश पूजार्थाज्ञैश्वर्यवीर्यपरिजनकामभोगादिभि

भुवनत्रयातिशायि । कस्मै, भेदज्ञानाय देहात्मव्यतिरेकबोधार्थं । इदानीमा-त्मदृष्टान्तेन विषयाभिलापपरतन्त्रतया दोषभूयिष्ठं गार्हस्थ्यं जानतोऽपि त्यक्तुमशक्तास्तिरस्कुर्वन्नाह—धिगित्यादि । धिक् निन्दामित्यर्थः । कान्, मादृशः अहमिव दृश्यन्ते विषयाशावशवर्तितयोपलभ्यन्त इति मादृशः । मया सदृशा-नाविर्भूततत्त्वज्ञानत्वेऽपि विषयोपभोगपरित्यागासमर्थान् । किंविशिष्टान्, यत-कलत्रेच्छेत्यादि । कलत्रस्य भार्याया इच्छा मनोरथः छन्द इति यावत् कल-त्रेच्छा सैव तन्त्रं प्रधानं यत्र तत्कलत्रेच्छातन्त्रं अथवा कलत्रे इच्छा अभिलाष-कलत्रेच्छा तस्या तन्त्रमायत्तं कलत्रेच्छातन्त्रं तदधीनवृत्ति गृहस्थस्य नित्यनै-मित्तिकानुष्ठानस्यस्य द्वितीयाश्रमिणो भावः कर्म वा गार्हस्थ्यं । कलत्रेच्छा-तन्त्रं च तद्गार्हस्थ्यं च कलत्रेच्छातन्त्रगार्हस्थ्यं तेन दुःस्थिता दुरवस्था विवि-धदुराधिबाधाकुलितास्तान् । हेतुपरत्वेनाय निर्देशः ॥ ३३ ॥

स्वयमभिलाप्यमाणाया उपशमश्रिय स्त्रियाश्चात्माकर्षणविषये बलाबलं चिन्तयति—

> इतः शमश्रीः स्त्री चेतः कर्षतो मां जयेन्न का ।
> आ ज्ञातमुत्तरत्रात्र जेत्री या मोहराट्चमूः ॥ ३४ ॥

टीका–कर्षतः स्वस्याभिमुखं नयतो द्वे । क, मां अनीन्द्रियेन्द्रियकसुखवि-शेषज्ञं । तत्र तावत् कर्षति । काऽसौ, शमश्रीः प्रशमसुखसम्पत् । क, मां । क, इतः अस्मिन्नेकस्मिन्पक्षे तथा कर्षति स्त्री मां । क, इतोऽन्यस्मिन्पक्षे तुर्वितर्के । अनयोः का कतरा जयेत् मदाकर्षणे बलवती भवेत् । संशयोऽत्र मे । अथवा आ स्मृतमासोपदेशबलादनुभूतमेतयोर्बलाबलम् । सम्प्रत्यपि ज्ञातं निश्चितं । यदि वा आ सतापप्रकोपयोर्व्याल्येय । आद्यपक्षे भवि-ष्यति । काऽसौ, अत्र एतयोर्मध्ये । उत्तरैव स्त्री न शमश्री । किंविशिष्टा, जेत्री मदाकर्षणे शमश्रियोऽभिभविनी न स्त्रिया शमश्रीः । या किं, या निश्चिता मया । किंविशिष्टा, मोहराट्चमूः मोहोऽत्र चारित्रावरणोदयः स एव राट् राजा अधृष्यभावत्वात् मोहराजश्चमूः सेना । यथा राजा प्रतापित्वेन प्रतिपक्षं सेनया जयति तथा मोहः स्त्रियेति भावः ॥ ३४ ॥

कलत्रदुस्त्यजत्वं भावयति–

चित्रं पाणिगृहीतीयं कथं मां विश्वगाविशत् ।
यत्पृथग्भावितात्माऽपि समवैम्यनया पुनः ॥ ३५ ॥

टीका-चित्रं यस्या खलु पाणिर्गृह्यते सा [illegible] [illegible] [illegible] प्रविशतीति विस्मयो मे । कथं केन प्रकारेण [illegible] प्रविष्टा । काऽसौ, इयं दृश्यमाना पाणिगृहीती परिणीतस्त्री । कं, मां [illegible] । कथं, विष्वक् समन्तात् मामात्ममयं कृतवतीत्यर्थः । [illegible] [illegible] । समवैमि तादात्म्यं प्रतिपद्ये अहं । कथं, सह । [illegible] [illegible] [illegible] दाध्यवसायपरिणतो भवामीत्यर्थं । [illegible], पुनः पुनः । किंविशिष्टोऽपि सन्, पृथग्भावितात्माऽपि पृथगेतस्या भेदेन [illegible] [illegible] इति कोऽनया सह ममाभेद-प्रत्यय इति तत्त्वज्ञानेन भावितो मुहुर्मुहुश्चिन्तित [illegible] अहंकारास्पदमन्त-स्तत्त्व येन स तथोक्त । किं पुनर्मोहवशा[illegible] इत्यपिशब्दार्थ । ३५।

स्त्रीनिवृत्तिमात्मनो निरूप्य वित्तमुपपत्त्या प्रतिक्षिपन्नाह-

स्त्रीतश्चित्त निवृत्त चेन्ननु वित्तं किमीहसे ।
मृतमण्डनकल्पो हि स्त्रीनिरीहे धनग्रहः ॥ ३६ ॥

टीका--चेदिति पराभिप्रायद्योतने । हे चित्त अन्त करण । यदि निवृत्त विवेकबलाद्व्यावृत्त । किं तत् कर्तृ, त्व । कस्मात्, स्त्रीत स्त्रिया सकाशात् स्त्रिय नेच्छामीत्यभिप्रैषि यदि त्वमित्यर्थ । ननुरमर्षे न मृष्याम्यहमिम त्वद-भिप्रायमित्यर्थं । तदा किमिति प्रश्नाक्षेपे तदा किमीहसे कि वाञ्छसि त्व हे चित्त । कि तद्वित्त धन । स्त्रीनिवृत्तस्य धनमिच्छत किमनुपपन्नमित्यत्राह-हि यस्मात् भवति । कोऽसौ, धनग्रह द्रविणार्जनरक्षणवर्द्धनाभिनिवेशो धनस्वी-कारो वा । किंविशिष्टो मृतमण्डनकल्प मृतस्य मण्डनमिव । क्व, स्त्रीनिरीहे स्त्रिया नि स्पृहे । यथा मृतकशरीरे क्रियमाण मण्डन [illegible]भावान्निष्फल तथा स्त्रियादिविषयविमुखस्य परिगृह्यमाण धनमिति भाव । धनस्य हि विषयसुखसाधन फलत्वेन प्रसिद्ध । तत्र च कामिन्य [illegible]विभावत्वेन मुख्या सौधोद्यानादयश्चोद्दीपनविभावत्वेन गौणा । यस्य च नास्ति स्त्रियाम भिलापस्तस्य किमितरविषयैरिति ॥ ३६ ॥

एव निर्वेद भावयत परमसामायिकभावनार्थं [illegible]माह-

इति च प्रतिसन्दध्यादुद्योगं मुक्तिवर्त्मनि ।
मनोरथा अपि श्रेयोरथाः श्रेयोऽनुबन्धिनः ॥ ३७ ॥

टीका—प्रतिसन्दध्यात् पुनः संयोजयेद्यमी। कमुद्योगमुत्साहं। क्व, मुक्तिवर्त्मनि मोक्षमार्गे। कथं, इति वक्ष्यमाणेन प्राणप्रायक्षणस्थिरत्वाद्यनुचिन्तनलक्षणेन प्रकारेण। चः समुच्चये। न केवलं संसारादिनिर्वेदं तथा भावयेदित्थं मोक्षमार्गेऽभियोगं च प्रतिसन्दध्यादित्यर्थः। अनाचरणतो मनोरथाः स्वप्नराज्यसमाः इति विप्रतिपन्नं बोधयितुमिदमाह—यतो भवन्ति। के, मनोरथाः अशक्यप्राप्यवस्तुविषयाभिलाषा। किं पुनस्तदर्थानुष्ठानप्रवृत्तस्य इत्यपिशब्दार्थः। कीदृशा भवन्ति, श्रेयोऽनुबन्धिनो भवे भवे अभ्युदयसम्पादिनः प्रभूतपुण्यबन्धनिबन्धनत्वात्। किमाश्रितास्ते तथा भवन्तीत्याह—श्रेयोरथाः श्रेयो निःश्रेयसं रथः स्यन्दनो येषां ते श्रेयोरथा मोक्षारूढा इत्यर्थः। तदुक्तं—
यत्र भावः शिवं धत्ते द्यौः कियद्दूरवर्तिनीति ॥ ३७ ॥

तत्रायुःकायमयत्वाज्जीवितस्य तदपायानुध्यानमुखेन जीवितव्योच्छेदं भावयन्प्रौढयोक्त्या स्वार्थसिद्धिभ्रंशं भावयति—

क्षणे क्षणे गलत्यायुः कायो ह्रसति सौष्ठवात् ।
ईहे जरां नु मृत्युं नु सध्रीचीं स्वार्थसिद्धये ॥ ३८ ॥

टीका—गलति क्षीयते एकदेशेनापगच्छति। किं तत्, आयुः भवधारणकारणं कर्म। क्व, क्षणे क्षणे प्रतिक्षणं। तथा ह्रसति देशतोऽपचरति। कोऽसौ, कायः शरीरं। कस्मात्, सौष्ठवात् स्वार्थक्रियाकरणसामर्थ्यात्। क्षणे क्षणे इत्यत्रापि योज्यं। नु वितर्के। किमहं, तर्हि ईहे वाञ्छाम्यहं। कां, जरां सर्वाङ्गशक्तिक्षपणलक्षणां विस्रसां। किं वा, मृत्युं निःशेषायुःक्षयलक्षणं मरणं। किंविशिष्टौ, सध्रीचीं आत्मनः सहायभूतां। कस्मै, स्वार्थसिद्धये स्वाभिप्रेतार्थनिष्पत्त्यर्थं। पुरुषार्थसाधके ह्यायुः कायश्च प्रधानं कारणं। तच्च प्रतिक्षणं विनाशात्तथा निश्चितं येन तथा पुरुषार्थभ्रंशहेतुतया प्रसिद्धाभ्यां जरामृत्युभ्यां सम्भाव्यतेति वक्रभणित्या द्योतयति ॥ ३८ ॥

जिनधर्मसहचारिणीं दरिद्रतामभिनन्द्य तद्विरहभाविनीं ममर्द्धिमपि प्रतिक्षिपन्नैर्गन्थ्ये दार्ढ्यं भावयति—

क्रियासमभिहारोऽपि जिनधर्मजुषो वरम्।
विपदां सम्पदां नासौ जिनधर्ममुचस्तु मे ॥ ३९ ॥

टीका—वरं भवतु सोऽपि श्लाघ्य इत्यर्थ । कोऽसौ, क्रियासमभिहार पौन पुन्यं भृशत्व वा। वरं सद्भवन मंदस्व चेम्यपिशब्दार्थे । कासां, विपदां शारीरमानसदु खाना परिषहोपसर्गाणा वा। कस्य, मे मम। किंविशिष्टस्य सतो, जिनधर्मजुष जिनोक्त जिनानुष्ठित वा धर्मं शुद्धाचिदानदरूपात्मपरिणतिलक्षण प्रीत्या सेवमानस्य। न तु न पुनर्वर। कोऽसौ, असौ क्रियासमभिहार । कासां, सपदा सर्वेन्द्रियार्थसुखसाधनानां विभूतीनां कस्य, मे। किंविशिष्टस्य सतो, जिनधर्ममुचो यथोक्तजिनधर्मरहितस्य ॥३९॥

श्रमणकर्माभ्यासेन अन्यगम्य सर्वत्र साम्य कामयते—

लब्धं यदिह लब्धव्यं तच्छ्रामण्यमहोदधिम्।
मथित्वा साम्यपीयूष पिबेयं परदुर्लभम् ॥ ४० ॥

टीका—लब्ध प्राप्त तन्मया कलत्रसम्पदादिक । यत् किं, यल्लब्धव्यं प्राप्तव्यं मया धन्यैर्वा। क, इह नृजन्मनि गृहाश्रमे वा। यत एव कृतार्थोऽस्मि ततस्मात्पिबेय अनुभवेय अह । किं तत्, साम्यपीयूष सर्वत्र समत्वममृतमिव। किं कृत्वा, मथित्वा अभ्यस्य। विलोड्य च। क, श्रामण्यमहोदधिं श्रमणाना यतीना कर्म मूलोत्तरगुणाचरणलक्षण श्रामण्यं महोदधिरिव अनर्घ्यरत्नोत्पत्तिनिमित्तत्वात् दुरवगाहत्वात् दुर्गमपारत्वाच्च । इयमत्र भावना यथा किल सुरासुरैं क्षीरोदधिं विलोड्य तत उद्धृतममृतं पीतमिति श्रूयते तथा श्रामण्य भावयित्वा उपेक्षालक्षण चारित्रमहमात्मनि परिणमयितुमर्हामि। कीदश इयमपि, परदुर्लभ परैर्जिनमार्गानभिज्ञै सुरासुरवर्गैश्च लोकैर्दुर्लभमशक्य जिनसमयाभिज्ञैरपि वा परमलभ्यं दुर्लभं कतिपयैरेव तैरपि प्राप्यमित्यर्थ ॥ ४० ॥

तदेव भूयो भावयति—

पुरेऽरण्ये मणौ रेणौ मित्रे शत्रौ सुखेऽसुखे।
जीविते मरणे मोक्षे भवे स्यां समधीः कदा ॥ ४१ ॥

टीका—कदा कस्मिन्काले। स्यां भवेयं भवितुमर्हाम्यहं भविष्यामीति वा। किंविशिष्टः, समधी: तुल्यमनाः। क क, पुरे प्रीतिकारणे चातुर्वर्ण्यसमृद्ध्यधिष्ठाननगरे। तथा तद्विपरीते अरण्ये अटव्यां। एतयोर्द्वयोरपि रागद्वेषनिबन्धनयोरुपेक्षापरिणतः कदा भविष्यामीत्यर्थः। एवमुत्तरत्रापि योज्यं। तथा मणौ वज्रादिरत्ने। रेणौ रजसि। तथा मित्रे सुहृदि। शत्रौ चापकर्तरि। तथा सुखे आह्लादनाकारे। असुखे च दुःखे देहमनस्तापरूपे। तथा जीविते पुरुषार्थसिद्धिहेतावायुषि। मरणे च तद्विपरीते। तथा मोक्षे अनन्तसुखस्वरूपे। भवे च तद्विपरीते। अयमत्र विशेषः—पुरारण्यादिषु तुल्यमतित्वमन्यस्यापि भवेत्। असौ तु परमवैराग्योपगतो मोक्षभवयोरपि निर्विशेषमतित्वमर्थयते। 'मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तम" इति श्रुतेः ॥४१॥

यतिधर्मचर्याकाष्ठाधिरोहणमाशंसति—

मोक्षोन्मुखक्रियाकाण्डविस्मापितबहिर्जनः।
कदा लप्स्ये समरसस्वादिनां पंक्तिमात्मदृक् ॥ ४२ ॥

टीका—कदा कस्मिन्काले। लप्स्ये प्राप्स्याम्यहं। कां, पंक्तिं लक्षणया सजातीयत्वं। केषां, समरसस्वादिनां समरसं ध्यातृध्येयध्यानानामेकीभावे सत्यानन्दं स्वादयन्त्यभीक्ष्णं भूयोभूयोऽनुभवन्तीति समरसस्वादिनो घटमानयोगा निष्पन्नयोगा वा मुमुक्षवः समरसस्वादिनस्तेषां। किंविशिष्टः सन्, आत्मदृक् आत्मदर्शी भवन्। कथम्भूतो भूत्वा, मोक्षोन्मुखेत्यादि-मोक्षे अनन्तज्ञानादिचतुष्टयाविर्भावस्वभावे निःश्रेयसि उन्मुखाः अभिमुखाः तद्धेतवस्तेषां क्रियाकाण्डगुरुकुलोपासनक्लेशातापनादियोगकायक्लेशादि तेन विस्मापितोऽनन्यसम्भाव्यतया विस्मयं नीतो बहिर्जनो बहिरात्मलोको येन स तथोक्तः ॥ ४२ ॥

योगपरमकाष्ठामभिकांक्षति—

शून्यध्यानैकतानस्य स्थाणुबुद्ध्याऽनडुन्मृगैः।
उद्घृष्यमाणस्य कदा यास्यन्ति दिवसा मम ॥ ४३ ॥

टीका—कदा कस्मिन् योगाभ्याससमये। यास्यन्ति गमिष्यन्ति। के, दिवसाः अहोरात्राः। कस्य, मम तत्त्वज्ञानवैराग्यसम्पन्नस्य। किंविशिष्टस्य

सत, शून्यध्यानैकतानस्य निर्विकल्पसमाधिपरिणतस्य । पुन कि क्रियमाणस्य, उद्घृष्यमाणस्य स्कन्धशृङ्गकण्डूयनगोचरीक्रियमाणस्य । कैरनडुन्मृगैः अनड्वाहः उत्कृष्टपशव मृगा अरण्यचारिणो हरिणा. अनड्वाहश्च मृगाश्च अनडुन्मृगास्तैः । कया, स्थाणुबुध्या स्थाणु मीमाद्यर्थं ऊर्ध्वस्थितकाष्ठविशेष स्थाणुरिति बुद्धिः कल्पना स्थाणुबुद्धिस्तया । यदा हि पुराद्बहिरहं कायोत्सर्गेण स्थास्यामि तदा स्वैरचारिणो वृषभादय स्कन्धादिकण्डूत्याकुलितास्तत्कण्डूयनाय मां स्थाणुरयमिति मन्यमाना· स्कन्धादिभिरुद्घृष्यन्ति । एवमरण्ये हरिणादयोऽपि । अहं पुन· पुरारण्ययोर्मुक्ताग्रहत्वेन तिष्ठन् शुद्धचिदानन्दमयं स्वात्मानमेवाधिवत्स्यामीति मनोरथोऽस्य महात्मनो लक्ष्यत इति॥४३॥

महानिशायां पुराद्बहिः प्रोषधोपवासव्रतान् कायोत्सर्गस्थितानुपसर्गजयेन योगादचलितानप्राच्यश्रावकान् प्रशंसयति--

धन्यास्ते जिनदत्ताद्या गृहिणोऽपि न येऽचलन् ।
तत्तादृगुपसर्गोपनिपाते जिनधर्मतः ॥ ४४ ॥

टीका—वर्तन्ते । के, ते प्रसिद्धा जिनदत्ताद्या· जिनदत्तो नाम श्रेष्ठी आद्य प्रथमो येषां वारिषेणकुमारादीनां ते जिनदत्ताद्या प्रोषधोपवासव्रतिन । किंविशिष्टा, धन्या सुकृतिन तेभ्योऽहं स्पृहयामीत्यर्थ । ये किं, ये नाचलन् न चलिता । कस्मात्, जिनधर्मत जिनोक्ताज्जिनसेविताद्वा सामायिकात् । किंविशिष्टा सन्तो, गृहिणो द्वितीयाश्रमिणः । किंपुनरुत्तराश्रमिण इत्यपिशब्दार्थः । क सति, तदित्यादि । ते श्रुतप्रसिद्धास्तादृशोऽनन्यसदृशा उपसर्गा शस्त्रप्रहारादयस्तेषां उपनिपाते समीपे निपतनं नियतमवश्यम्भावि पतन तत्तादृगुपसर्गोपनिपातस्तस्मिन् ॥ ४४ ॥

व्रतिकप्रतिमामुपसंहरस्तदनुष्ठायिन फलविशेषमाह—

इत्याहोरात्रिकाचारचारिणि व्रतधारिणि ।
स्वर्गश्रीः क्षिपते मोक्षश्रीपर्ययेव वरस्रजम् ॥ ४५ ॥

टीका—क्षिपते मुंचति । काऽसौ, स्वर्गश्री· यथास्वं सौधर्मादिकल्पलक्ष्मी । कां, वरस्रज वरोऽभिमत· पतिर्वरणं वा तत्स्वीकरणं वरार्था स्रक् माला वर-

स्रक् सा वरमालामित्यर्थः । क्व, व्रतधारिणि व्रतानि प्रागुक्तानि धारयत्यात्मनि निरतिचारतया स्थिरीकरोत्यभीक्ष्णमिति व्रतधारी व्रतिकप्रतिमारूढः श्रावकस्तस्मिन् । किंविशिष्टे, इत्येवमुक्तप्रकारेण । आहोरात्रिकमहोरात्रभवमाचारं ब्राह्ममुहूर्तोत्थानादिकं चरत्यनुतिष्ठतीत्येवंशीलस्तच्चारी तस्मिन् । अत्रोत्प्रेक्षामाह—मोक्षश्रीर्येयेवेति । मोक्षश्रियामीर्ष्याऽक्षान्तिर्मोक्षश्रीर्ष्या तया । इयमत्र भावना—यथा काचिन्महाकुलीनकन्या पित्रादिभिरनुज्ञाता अभीष्टपताविमं नान्या स्वीकुर्यादिति बुध्या वरमालां क्षिपति तथा तत्ताद्दृग्महाश्रावके मोक्षश्रीर्ष्यया स्वर्गश्रीरिति भद्रम् ॥ ४५ ॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मदीपिकायां
भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितश्चतुर्दश प्रक्रमाश्च
षष्ठोऽध्यायः समाप्तः ॥ ५ ॥

अथ सप्तमोऽध्यायः ।

*अथ सामायिकादिप्रतिमानवकस्वरूपप्ररूपणार्थमुपक्रमते । तत्र व्रतिक-*प्रतिमायां सामायिकं शीलतया निर्दिष्टं तदेवेह व्रतत्वेन प्रतिपद्यमानः प्रतिमारूपतां यातीति प्ररूपयन्नाह—

सुदृङ्मूलोत्तरगुणग्रामाभ्यासविशुद्धधीः ।
भजंस्त्रिसन्ध्यं कृच्छ्रेऽपि साम्यं सामायिकी भवेत् ॥१॥

टीका—भवेत् भवितुमर्हति । कोऽसौ, व्रतिकः । कीदृशः, सामायिकी सामायिकप्रतिमावान् । किं कुर्वन्, भजन् सेवमानः किं । साम्यं मोहक्षोभविहीनमात्मपरिणामं । कथं, त्रिसन्ध्यं सन्ध्यात्रये । क्व सति, कृच्छ्रेऽपि परीषहोपसर्गसन्निपातेऽपि । कथम्भूतो भूत्वा, सुदृगित्यादि—दर्शनप्रतिमस्य मूलोत्तरगुणग्रामः प्रागुक्तलक्षणः दृक् च मूलोत्तरगुणग्रामश्च दृङ्मूलोत्तरगुणग्रामौ प्रशस्तौ निरतिचारौ दृङ्मूलोत्तरगुणग्रामौ सुदृङ्मूलोत्तरगुणग्रामौ । तयोरभ्यासोऽसकृत्प्रवृत्तिः तेन विशुद्धा प्रतिबन्धकापायात् प्रकृतमयमानुष्ठानसाधनसामर्थ्यं प्राप्ता धीर्ज्ञानं यस्य स तथोक्तः ॥ १ ॥

व्यवहारसामायिकविध्युपदेशपुरःसरं निश्चयसामायिकं विधेयतयोपदिशति—

कृत्वा यथोक्तं कृतिकर्म सन्ध्यात्रयेऽपि यावन्नियमं समाधेः ।
यो वज्रपातेऽपि न जात्वपैति सामायिकी कस्य स न प्रशस्यः ॥२॥

टीका—स सामायिकार्थिन शक्रादेर्वा न प्रशस्य सर्वेस्यापि श्लाघ्य इत्यर्थः । य किं, यो नापैति न प्रच्यवते । कस्मात्समाधेः रत्नत्रयैकाग्रलक्षणाद्योगात् । कदा, जातु कदाचिदपि । क्व सति, वज्रेऽपि पतति सति । किं पुनरन्यत्रोपसर्गकारणे । कियत्कालमित्याह —यावन्नियमं प्रतिज्ञावधि । एतन्निश्चयसामायिकं । किं कृत्वा, अनुष्ठाय । किं तत्, कृतिकर्म । किंविशिष्टं, यथोक्तं आवश्यकाध्याये योग्यकालेत्यादिप्रबन्धेन व्याख्यातं वन्दनाकर्म । क्व, सन्ध्यात्रयेऽपि तिसृष्वपि सन्ध्यासु शक्त्याऽन्यदाऽपि । साम्यभावनानुज्ञानार्थो वा अपिशब्दः । एतद्व्यवहारसामायिकम् ॥ २ ॥

निश्चयसामायिकशिखराधिरूढाय श्लाघते—

आरोपितः सामायिकव्रतप्रासादमूर्धनि ।
कलशस्तेन येनैषा भूरारोहि महात्मना ॥ ३ ॥

टीका आरोपित स्थापित । कोऽसौ, कलश । केन, तेन । क्व, सामायिकेत्यादि–समय केशबन्धादिनियमित· कालस्तत्र भवं सामायिकं साम्यभावनं तदेव व्रत सामायिकव्रतं तदेव प्रासादो देवगृहं दुरासदत्वात् दुरारोहत्वादिष्टसिद्धिनिबन्धनत्वाच्च तस्य मूर्धनि शिखराग्रे । येन किं कृतं, येन महात्मना गणधरचक्रधरेन्द्रादीनां स्पृहणीयेन आरोहि आरूढा । काऽसौ, एषा भूःव्यवहारसामायिकपूर्वा निश्चयसामायिकप्रतिमा ॥ ३ ॥

अथ चतु श्लोक्या प्रोषधोपवासस्थानं व्याचष्टे—

स प्रोषधोपवासी स्याद्यः सिद्धः प्रतिमात्रये ।
साम्यान्न च्यवते यावत्प्रोषधानशनव्रतम् ॥ ४ ॥

टीका—स्याद्भवेत् । कोऽसौ, स श्रावक । किंविशिष्ट, प्रोषधोपवासी प्रोषधोपवासप्रतिमावान् । य. किं, यो न च्यवते न भ्रश्यति । कस्मात्साम्यात् भावसामायिकात् । प्रोषधोपवासशीले तु तदुपरमे नामादिसामायिकपञ्चकस्याप्यनुचरणात् । कियत्काल, यावत्प्रोषधानशनव्रतं प्रोषधोपवासप्रति-

ज्ञाविपर्यीकृतान् षोडश यामान्। किंविशिष्टः सन्, सिद्धः निष्पन्नः प्रतीतो वा। क्व, प्रतिमात्रये दर्शनव्रतसामायिकप्रतिमासु ॥ ४ ॥

प्रोषधोपवासिनो निष्ठाकाष्ठां निर्दिशति—

त्यक्ताहाराङ्गसंस्कारव्यापारः प्रोषधं श्रितः।
चेलोपसृष्टमुनिवद्भाति नेदीयसामपि ॥ ५ ॥

टीका—भाति प्रतिभासते। कोऽसौ, प्रोषधं श्रितः प्रोषधोपवासनिष्ठः। किंवत्, चेलोपसृष्टमुनिवत् उपसर्गवशाद्वस्त्रेण वेष्टितो निर्ग्रन्थो यथा *ब्रह्मचर्यधारणशरीरादिममत्ववर्जनयोगात्।* केषां, नेदीयसां पार्श्ववर्तिलोकानां बान्धवादीनां वा। विशेषतोऽन्येषामित्यपिशब्दार्थो विस्मये वा अपिशब्दः। किंविशिष्टः सन्, त्यक्तेत्यादि—आहारोऽशनादिश्चतुर्विधः अङ्गसंस्कारः स्नानोद्वर्तनवर्णकविलेपनपुष्पगन्धविशिष्टवस्त्राभरणादि व्यापारः साहचर्यात्सावद्यारम्भ आहारश्चाङ्गसंस्कारश्च व्यापारश्चाहाराङ्गसंस्कारव्यापारास्त्यक्ताः सर्वात्मना प्रत्याख्यातास्ते त्रयो येन। एतेन आहारादित्रयवर्जनाद्ब्रह्मचर्यधारणाच्च चतुर्विधं प्रोषधव्रतमुक्तम् ॥ ५ ॥

सामायिकप्रोषधोपवासयोः प्रतिमाभावे युक्तिमाह—

यत्प्राक्सामायिकं शीलं तद्व्रतं प्रतिमावतः।
यथा तथा प्रोषधोपवासोऽपीत्यत्र युक्तिवाक् ॥ ६ ॥

*टीका—अस्ति। कोऽसौ, युक्तिवाक् समाधानवचनं। क्व, अत्र सामायिक*प्रोषधोपवासयोः प्रतिमाभावविप्रतिपत्तौ। कथं, इति किमिति भवति। कोऽसौ, प्राक् शीलतया अभ्यस्तः प्रोषधोपवासोऽपि। किं, व्रतं। कस्य, प्रतिमावतः चतुर्थसंयमविशेषपदमनुतिष्ठतः श्रावकस्य। कथं, तथा। यथा किं, यथा भवति। किं तत्, सामायिकं। किं भवति, व्रतं सस्ययद्रक्षणीयत्वात्। कस्य, प्रतिमावतः तृतीयसंयमविशेषपदमनुतिष्ठतः श्रावकस्य। यत् किं, यत्सामायिकं भवति। किं, शीलं सस्यस्य वृत्तिरिव मुख्यतया रक्षणीयस्य व्रतस्य रक्षणकारणत्वात्। क्व, प्राक् व्रतप्रतिमानुष्ठानसमये ॥ ६ ॥

परमकाष्ठाप्रतिपन्नान् प्रोषधोपवासिनः प्रशंसति—

निशां नयन्तः प्रतिमायोगेन दुरितच्छिदे ।
ये क्षोभ्यन्ते न केनापि तान्नुमस्तुर्यभूमिगान् ॥ ७ ॥

टीका—नुम. स्तुमो वयं । कान् तान्, तुर्यभूमिगान् चतुर्थी संयमविशेषपदवीमारूढान् । ये किं, ये न क्षोभ्यन्ते समाधेर्न प्रच्याव्यन्ते । केन, केनापि परिषहेणोपसर्गेण वा । किं कुर्वन्तः, नयन्तो लङ्घयन्तः । कां, निशां पर्वरात्रिं । केन, प्रतिमायोगेन संयतवत् कायोत्सर्गावस्थानेन । कस्यै, दुरितच्छिदे अशुभकर्मनिर्जरणार्थं ॥ ७ ॥

अथ सचित्तविरतस्थानं चतुःश्लोक्या व्याचष्टे—

हरिताङ्कुरबीजाम्बुलवणाद्यप्रासुकं त्यजन् ।
जाग्रत्कृपश्चतुर्निष्ठः सचित्तविरतः स्मृतः ॥ ८ ॥

टीका—स्मृत. । सूत्रज्ञैराम्नात । कोऽसौ, सचित्तविरतश्रावक । किं कुर्वन्, त्यजन् वर्जयन् अभक्षयन्नित्यर्थं । किं तत्, हरिताङ्कुरबीजाम्बुलवणादि अङ्कुर प्ररोह बीजं प्ररोहणद्रव्यं अम्बु जलं लवणं सैन्धवादि आदिशब्देन कन्दमूलफलपत्रकरीरादि, अंकुरश्च बीजं च अंकुरबीजमुपलक्षणात् स्वकपत्रादि, हरितमम्लानार्द्रावस्थ । हरितं च तदंकुरबीजं च हरिताङ्कुरबीजं तच्चाम्बुलवणादि च हरिताङ्कुरबीजाम्बुलवणादि । किंविशिष्टमप्रासुकमनग्निपक्वमित्यर्थ. । अत्र च द्वितीयपादे नवाक्षरत्व न दोषाय अनुष्टुभि नवाक्षरस्यापि पादस्य शिष्टप्रयोगे क्वापि क्वापि दृश्यमानत्वात् । यथा—ऋषभाद्या वर्द्धमानान्ता जिनेन्द्रा दश पंच चेत्यादिषु । अथवा हरिताङ्कुरबीजाम्बुलवणाद्यप्रासुकं त्यजन्निति पाठ. । अत्र आपो जलं । किंविशिष्टोऽसौ, जाग्रत्कृपो यतः जाग्रती नित्यं हृदि स्फुरन्ती कृपा अनुकम्पा यस्य स जाग्रत्कृपो दयामूर्तिरित्यर्थ. । कथम्भूतो भूत्वा, हरिताङ्कुरादिकमभक्षयन्सचित्तविरतः स्मृत. चतुर्निष्ठ चतसृषु पूर्वोक्तप्रतिमासु निष्ठा निर्वाहो यस्य स चतुर्निष्ठः॥८॥

जाग्रत्कृप इति समर्थयते—

पादेनापि स्पृशन्नर्थवशाद्योऽतिऋतीयते ।
हरितान्याश्रितानन्तनिगोतानि स भोक्ष्यते ॥ ९ ॥

टीका—भोक्ष्यते काचा न भक्षयिष्यतीत्यर्थ । कोऽसौ, स पञ्चमसंयम स्थानसाधनोद्यत श्रावक । कानि, हरितानि हरितावस्थवनस्पतीन् । किंविशिष्टानि, आश्रितानन्तनिगोतानि आश्रितानि ससक्तानि अनन्तानि निगोतानि निगोताख्या. साधारणशरीरवनस्पतिकायिका येपु तानि । उक्त चार्षे माह्मणसृष्टिप्रस्तावे–सन्त्येवानन्तशो जीवा हरितेष्वङ्कुरादिषु । निगोता इति सार्वज्ञ देवास्माभि श्रुत वच ॥ १ ॥ य किं, यो अतिक्रतीयले पाक्षिकाद्यपेक्षया अतिशयेन घृणा करोति । कि कुर्वन्, स्पृशन् परामृशन् । कानि तथाभूतहरितानि । केन पादेन चरणेन किं पुनर्हस्तादिनेत्यपिशब्दार्थ । कस्मात्, अर्थवशात् प्रयोजनानुरोधात् । कि पुन प्रयोजनाभावात् । प्रयोजन विना स्थावरविराधनादपि निवृत्तिप्रतिज्ञानात् ॥ ९ ॥

सचित्तविरतेभ्य श्लाघते—

अहो जिनोक्तिनिर्णीतिरहो अक्षजितिः सताम् ।
. नालक्ष्यजन्त्वपि हरित् प्सान्त्येतेऽसुक्षयेऽपि यत्॥१०॥

टीका—अहो आश्चर्यं वर्तते । काऽसौ, जिनोक्तिनिर्णीति जिनागमनिश्चय केषा, सता प्रकरणात् सचित्तविरतिप्रयताना । तथा अहो आश्चर्यं वर्तते । काऽसौ, अक्षजिति इन्द्रियजय । केषा, सताम् । अत्रोपपत्तिमाह–यद्यस्मात् न प्सान्ति न भक्षयन्ति । के, एते सन्त । कि तत्, हरित् हरित । किंविशिष्टमपि, अलक्ष्यजन्त्वपि अलक्ष्या अस्मदाद्यपेक्षया केवलागमगम्यत्वात् प्रत्यक्षाद्यसवेद्या जन्तव प्राणिनो यस्मिन् तदलक्ष्यजन्तु हरित वस्तु । कि पुनर्दृश्यानुमेयप्राणिकमित्यपिशब्दार्थ । क सति, असुक्षयेऽपि असूना क्षय प्रलय असुक्षयस्तस्मिन्नपि प्राणेषु नश्यत्स्वपि । पुन, प्रकारान्तरेण जीविते सम्भवतीत्यपिशब्दार्थ । अत्रालक्ष्यजन्त्वपीत्यनेन जिनागमप्रामाण्यविश्वासोऽसुक्षयेऽपीत्यनेन च जितेन्द्रियत्व समर्थ्यते ॥ १० ॥

साम्प्रत भोगोपभोगपरिमाणशीलातिचारत्वेनोक्त सचित्तभोजनमिह त्यज्यमान प्रतिमाभावं यातीत्युपदिशति–

सचित्तभोजनं यत्प्राङ् मलत्वेन जिहासितम् ।
व्रतयत्यङ्गिपञ्चत्वचकितस्तच्च पञ्चमः ॥ ११ ॥

टीका—व्रतयति व्रतत्वेन प्रत्याख्याति । कोऽसौ, पञ्चम. सचित्तविरयु-द्यत । किं तत्, तच्च तदपि । किंविशिष्टो, यत. अङ्घ्रिपञ्चत्वचकित अङ्घ्रिना भक्ष्यमाणमचित्तद्रव्याश्रितजीवानां पञ्चत्वं मरणं अङ्घ्रिपञ्चत्वं तस्माच्चकितो भीतो यतः । यत्किं, यज्जिह्वालिटं त्यजुमिष्टं शीलोपदेशस्याभ्यासदशाविषयत्वात् । किं तत्, सचित्तभोजनं जीवाश्रितद्रव्यत्रलभनं । केन, व्रतिकेन । केन कृत्वा, मलत्वेन भोगोपभोगपरिमाणाख्यशीलातिचारत्वेन । क, प्राक् शीलोपदेशसमये । स्वामी पुनर्भोगोपभोगपरिमाणशीलातिचारानन्यथा पठित्वा पञ्चमप्रतिमामेवमध्यगीष्ट—मूलफलशाकशाखाकरीरकन्दप्रसूनबीजानि । नामानि योऽत्ति सोऽयं सचित्तविरतो दयामूर्तिः ॥ ११ ॥

अथ रात्रिभक्तव्रतं चतु श्लोक्या व्याकरिष्यन् आदौ तल्लक्षणमाह—

स्त्रीवैराग्यनिमित्तैकचित्तः प्राग्वृत्तनिष्ठितः ।
यस्त्रिधाऽह्नि भजेन्न स्त्रीं रात्रिभक्तव्रतस्तु सः ॥ १२ ॥

टीका—स तु श्रावको भवति । किंविशिष्ट, रात्रिभक्तव्रत । य. किं, यो न भजेत् न सेवेत् । कां, स्त्रीं नि शेषामपि योषां । क, अह्नि दिने । कथं, त्रिधा मनोवाक्कायकृतकारितानुमतैः । किंविशिष्ट सन्, स्त्र्यादि-स्त्रीवैराग्यनिमित्तानि कामदोषा स्त्रीदोषा स्त्रीसङ्गदोषा अशौचमार्यसङ्गतिश्चेति पञ्च तेष्वेकचित्तो यः स यथोक्त तदेकाग्रमना इत्यर्थ. । कथम्भूतो भूत्वा, प्राग्वृत्तनिष्ठितः पूर्वोक्तप्रतिमापञ्चकाचारनिरूढ ॥ १२ ॥

षष्ठप्रतिमानिष्ठानभिष्टौति—

अहो चित्रं धृतिमतां सङ्कल्पच्छेदकौशलम् ।
यन्नामापि मुदे साऽपि दृष्टा येन तृणायते ॥ १३ ॥

टीका—अहो चित्रमाश्चर्यं वर्तते । किं तत्, संकल्पच्छेदकौशलं मनोव्यापारनिरोधसामर्थ्यं । केषां, धृतिमतां संतोषभावनायुक्तानां पुंसां । येन किं, येन संकल्पच्छेदकौशलेन तृणायते तृणवत्प्रतिभाति अभोग्यतयाऽऽत्मानं तेषां दर्शयतीत्यर्थः । काऽसौ, साऽपि कान्ता । किंविशिष्टा सती, दृष्टा चक्षुर्गोचरीकृता । तथा आवृत्या सा कान्ता दृष्टाऽपि किं पुन श्रुता संकल्पिता

चेत्यपिशब्दार्थ । गृहस्थस्य हि स्वदारा प्रति प्रेम दुर्व्यापारश्च दु ख प्रतिपेदे । सा का, यस्यामपि यस्या सञ्ज्ञाऽपि श्रुता भवति । कस्यै, मुदे प्रीतये । किं पुनर्दर्शनादिकमित्यपिशब्दार्थ ॥ १३ ॥

एतस्य रात्र्यादावपि मैथुनविनिवृत्तिमुपपादयन्नाह—

रात्रावपि ऋतावेव सन्तानार्थमृतावपि ।
भजन्ति वशिनः कान्तां न तु पर्वदिनादिषु ॥ १४ ॥

टीका–भजन्ति सेवन्ते । के, वशिनो जितेन्द्रिया श्रा, कांतां । प्रियां । क, ऋतावेव पुष्पदर्शनोत्तरभाविचतुर्थदिवसस्नानानन्तरमेव नान्यदा । क, रात्रावपि निश्यपि ' तथा ऋतावपि सन्तानार्थमेव ते भजन्ति ता न विषयसुखार्थ । एवशब्दोऽत्र सन्दशकन्यायेन उभयत्र योज्य । न तु पुन कथमपि वशिनस्त्रिय भजन्ति । केषु, पर्वदिनादिषु पर्वदिनानि धर्मकर्मानुष्ठानदिनान्यष्टम्यादीनि आदिशब्देन अमावास्याग्रहणादीनि गृह्यन्ते ॥ १४ ॥

अधुना चारित्रसारादिशास्त्रमतेन रात्रिभक्तव्रत निरुक्त्या लक्षयन् रत्नकरण्डकादिप्रसिद्ध तदर्थं कथयति—

रात्रिभक्तव्रतो रात्रौ स्त्रीसेवावर्तनादिह ।
निरुच्यतेऽन्यत्र रात्रौ चतुराहारवर्जनात् ॥ १५ ॥

टीका—निरुच्यते व्युत्पाद्यते । कोऽसौ, रात्रिभक्तव्रत समासशब्द । क, अस्मिन् चारित्रसारादिशास्त्रानुसारिणि ग्रन्थे । कस्मात्, रात्रौ निशि स्त्रीसेवाया वर्तनात् रात्रौ भक्त स्त्रीभजन व्रतयति रात्रिभक्तव्रत इति तच्छब्दस्य व्युत्पादनात् । अन्यत्र पुना रत्नकरंडकादिशास्त्रे रात्रिभक्तव्रतशब्दो निरुच्यते । कस्मात्, रात्रौ चतुराहारवर्जनात् रात्रौ भक्त चतुर्विधमप्याहार व्रतयति प्रत्याख्यातीति रात्रिभक्तव्रत इति तच्छब्दव्युत्पादनात् । यदाह स्वामी—अन्न पान खाद्य लेह्य नाश्नाति यो विभावर्याम् । स च रात्रिभक्त विरत सत्त्वेष्वनुकम्पमानमना ॥ १५ ॥

अथ ब्रह्मचर्यस्थान व्याचष्टे—

तत्ताद्दक्संयमाभ्यासवशीकृतमनास्त्रिधा ।
यो जात्वशेषा नो योषा भजति ब्रह्मचार्यसौ ॥ १६ ॥

टीका—भवति। कोऽसावसौ श्रावक । किंविशिष्टो, ब्रह्मचारी ब्रह्मणि चारित्रे आत्मनि ज्ञाने चरति प्रवर्तत इत्येवंमत । य किं, यो नो भजति न सेवते । का, योषा स्त्री । किंविशिष्टा, अशेषा मानवीर्दैवीस्तिरश्चीस्तत्प्रतिकृतिश्च । कदा, जातु कदाचिद्दिवा रात्रौ च । कथ, त्रिधा त्रिविधन । कथम्भूतो भूत्वा तादित्यादि—स प्राक् प्रतिमाषट्कनिर्दिष्ट ताद्दक् क्रमोपचित सयम प्राणेन्द्रियपरिहाररूपापहृतमयमैकदेशस्तस्याभ्यासो भावना तेन वशीकृत स्वाधीननां नीत मनश्चित्त येन स तथोक्त ॥ १६ ॥

ब्रह्मचारिण श्लाघते—

अनन्तशक्तिरात्मेति श्रुतिर्वस्त्वेव न स्तुतिः ।
यत्स्वद्रव्ययुगात्मैव जगज्जैत्रं जयेत्स्मरम् ॥ १७ ॥

टीका—भवति। काऽसौ, श्रुतिराप्तोपदेश । कथ, इति एवस्वरूपा । भवति। कोऽसावात्मा पुरुष । किंविशिष्टोऽनन्तशक्ति अनन्ता निःसीमा शक्तयो अर्थक्रियाकारिसामर्थ्यानि यस्य स अनन्तशक्ति । इति श्रुति । किं भवति, वस्त्वेव वस्तुविषयैव । न भवति सा । सा किं स्तुति गुणाल्पत्वे सति तद्बहुत्वकथन । कुत इत्याह—यद्यस्मात् जयेत् प्रतिबध्नीयात् । कोऽसावात्मैव । किंविशिष्ट, स्वद्रव्ययुक् परद्रव्यव्यावर्तनेन आत्मद्रव्य समादधान । क, स्मर कन्दर्प । किंविशिष्ट, जगज्जैत्र जगता परद्रव्यप्रवृत्तिमता प्राणिनां जैत्रमभिभावुक ॥ १७ ॥

मन्दमत्यनुजिघृक्षया ब्रह्मचर्यमाहात्म्यमाह—

विद्या मन्त्राश्च सिध्यन्ति किङ्कुर्वन्त्यमरा अपि ।
क्रूराः शाम्यन्ति नाम्नाऽपि निर्मलब्रम्हचारिणाम् ॥ १८ ॥

टीका—सिद्ध्यन्ति वरप्रदा भवन्ति । का, विद्या साधितसिद्धा । मन्त्राश्च पठितसिद्धा । तथा किङ्कुर्वन्ति किङ्करा इव आचरन्ति । के, अमरा देवा. किं पुनर्मानवास्तिर्यञ्चो वेत्यपिशब्दार्थ । तथा शाम्यन्ति उपसर्गकरणासिद्ध-

र्तन्ते। के, क्रूरा ब्रह्मराक्षसादय। केन, नाम्ना तन्नोच्चारणमात्रेण। किं पुन सन्निधानेनेत्यपिशब्दार्थ। केषा, निर्मलब्रह्मचारिणा निरतिचारब्रह्मचर्यभाजाम्॥ १८॥

प्रसङ्गवशाद्ब्रह्मचर्याश्रम किञ्चिद्व्याचष्टे–

प्रथमाश्रमिणः प्रोक्ता ये पञ्चोपनयादयः।
तेऽधीत्य शास्त्रं स्वीकुर्युर्दारानन्यत्र नैष्ठिकात्॥ १९॥

टीका—ये प्रोक्ता परमागमे प्रतिपादिता। के प्रथमाश्रमिण मौञ्जीबन्धनपूर्वव्रतानुष्ठायिन। कति, पञ्च। के, ते उपनयादय उपनय आदिर्येषामवलम्बादीना ते। तत्र उपनयब्रह्मचारिणो गणधरसूत्रधारिण समभ्यस्तागमा गृहिधर्मानुष्ठायिनो भवन्ति। अवलम्बब्रह्मचारिण क्षुल्लकरूपेणागमम भ्यस्य परिगृहीतगृहावासा भवन्ति। अदीक्षाब्रह्मचारिणो वेषमन्तरेणाभ्यस्तागमा गृहधर्मनिरता भवन्ति। गूढब्रह्मचारिण कुमारश्रमणा सन्त स्वीकृतागमाभ्यासा बन्धुभिर्दु सहपरिषहैरात्मना नृपतिभिर्वा निरस्तपरमेश्वररूपा गृहवासरता भवन्ति। नैष्ठिकब्रह्मचारिण समधिगतशिखालक्षितशिरोलिङ्गा गणधरसूत्रोपलक्षितवक्षोलिङ्गा शुक्लरक्तवसनकौपीनकटीलिङ्गा तथा भिक्षावृत्तयो देवार्चनपरा भवन्ति। ते किं कुर्युरित्याह—परिगृह्णीयु। के, ते। कान्, दारान्, पत्नी। किं कृत्वा, अधीत्य पठित्वा। किं तत्, शास्त्रमुपासकाध्ययनादि श्रुत। कथमन्यत्र। कस्मात्, नैष्ठिकात् नैष्ठिक वर्जयित्वेत्यर्थ॥ १९॥

जिनदर्शने वर्णाश्रमव्यवस्था कुत्रास्तीति पृच्छन्त प्रत्याह—

ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्च सप्तमे।
चत्वारोऽङ्गे क्रियाभेदादुक्ता वर्णवदाश्रमाः॥ २०॥

टीका—उक्ता प्रणीता। के, आश्रमा आ शास्त्रोक्तकालात् श्राम्यन्ति यथास्व तपस्यन्तीत्याश्रमा। किंवत्, वर्णवत् ब्राह्मणादयो वर्णा यथा। कस्मात्, क्रियाभेदात् धर्मकर्मविकल्पात्। कति, चत्वार। क्व, अङ्गे। किंविशिष्टे, सप्तमे उपासकाध्ययनाख्ये। तानेवोपदेष्टुमाह–ब्रह्मचारी गृही वानप्रस्थो

भिक्षुश्चेति । उक्तं च । ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । इत्याश्रमास्तु जैनानां सप्तमाङ्गाद्विनिःसृताः ॥ १ ॥ तत्रिश्यामेदस्तु किञ्चिदयं दृश्यते-ब्रह्मचारिणस्तावदिमा क्रिया । द्विजसूनोर्गर्भाष्टमे वर्षे जिनालये कृतार्हत्पूजनस्य कृतमौण्ड्यस्य त्रिगुणमौञ्जीवन्धमसगुणग्रथितयज्ञोपवीतादि लिङ्ग विशुद्धं स्थूलहिंसाविरत्यादिव्रतं ब्रह्मचर्योपबृंहितं गुरुसाक्षिकं धारणीयं । तत्क्रियाप्रपञ्च पुनरार्षे-शिखी सिताशुक सान्तर्वासा निर्वेषविक्रिय । व्रतचिन्हं दधत्सूत्रं तदोक्तो ब्रह्मचार्यसौ ॥ चरणोचितमन्यच्च नामधेयं तदाऽस्य वै । वृत्तिश्च भिक्षयाऽन्यत्र राजन्यादुद्धवैभवात् ॥ इत्यादिग्रन्थेनोक्त प्रतिपत्तव्य । पूर्वोक्तनित्यनैमित्तिकानुष्ठानस्थो गृहस्थ । स द्वेधा जातितीर्थक्षत्रियभेदात् । तत्र जातिक्षत्रिया क्षत्रियब्राह्मणवैश्यशूद्रभेदाच्चतुर्विधा । तीर्थक्षत्रिया स्वजीवितविकल्पादनेकभेदा भिद्यन्ते । वानप्रस्था अपरिगृहीतजिनरूपा वस्त्रखण्डधारिणो निरतिशयतपस्युद्यता भवन्ति । भिक्षवो जिनरूपधारिणो बहुधा भवन्ति । तद्यथा-देशप्रत्यक्षवित्केवलभृदिह मुनि स्यादपि प्राप्तऋद्धिरारूढश्रेणियुग्मो जिनयतिरनगारोऽपर साधुवर्ग । राजा ब्रह्मा च देव परम इति ऋषिर्विक्रियाऽक्षीणशक्तिप्राप्तो बुद्ध्यौपधीशो विविधनयपटुविश्ववेदी क्रमेण ॥ १ ॥ तत्क्रियाश्च प्राक्प्रबन्धेनोक्तास्तद्वद्वर्णक्रियाश्च व्याख्याता ॥ २० ॥

अथारम्भविरत द्वाभ्यामाह—

निरूढसप्तनिष्ठोऽङ्गिघाताङ्गत्वात्करोति न ।
न कारयति कृष्यादीनारम्भविरतस्त्रिधा ॥ २१ ॥

टीका--न करोति न कारयति च कोऽसावारम्भविरत श्रावक । कान्, कृष्यादीन् कृषिसेवावाणिज्यादिव्यापारान् । न पुन. स्नपनदानपूजाभिधानाद्यारम्भान् । तेषामङ्गिघाताङ्गत्वाभावात् । प्राणिपीडापरिहारेणैव तत्सम्भवात् । वाणिज्याद्यारम्भादपि तथा सम्भवस्तर्हि विनिवृत्तिर्न स्यादिति चेदेवमेतत् । कथं, त्रिधा । कस्मात्, अङ्गिघाताङ्गत्वात् प्राणिवधनिबन्धनत्वात् । कथम्भूतो भूत्वा, निरूढसप्तनिष्ठः निष्ठितप्राक्सप्तप्रतिमासयम पुत्रादीन् प्रत्यनुमते कदाचिन्निवारयितुमशक्यत्वान्मनोवाक्काये कृतकारिताभ्यामेव सावद्यारम्भान्निवर्तते इत्यत्र तात्पर्यार्थ ॥ २१ ॥

एतदेव समर्थयते—

यो मुमुक्षुरघाद्बिभ्यत्त्यक्तुं भक्तमपीच्छति ।
प्रवर्तयेत्कथमसौ प्राणिसंहरणीः क्रियाः ॥ २२ ॥

टीका—कथं प्रवर्तयेत् कुर्यात् कारयेच्च । कोऽसावसावष्टमश्रावकः । काः, क्रियाः । किंविशिष्टाः, प्राणिसंहरणीः जीवघातिकाः । यः किं, य इच्छति वाञ्छति । किं कर्तुं, त्यक्तुं प्रत्याख्यातुं । किं तत्, भक्तमपि प्राणिसंहरणकारणं भोजनमपि । किं कुर्वन्, बिभ्यत् । कस्मादघात्पापात् । किंविशिष्टः सन्, मुमुक्षुः कृत्स्नकर्मविप्रमोक्षमिच्छुः ॥ २२ ॥

अथ परिग्रहविरतं सप्तश्लोक्या व्याचष्टे—

स ग्रन्थविरतो यः प्राग्व्रतव्रातस्फुरद्धृतिः ।
नैते मे नाहमेतेषामित्युज्झति परिग्रहान् ॥ २३

टीका—स भवति । किमाख्यो, ग्रन्थविरतः । यः किं, य उज्झति त्यजति । कान्, परिग्रहान् वास्तुक्षेत्रादीन् दश । कथं, इति एवं सकल्प्य । न भवन्ति । के, एते वास्तुक्षेत्रादयोऽर्थाः । कस्य, मे मम स्वत्वभोग्यत्वादिना सम्बद्धाः । तथा न भवाम्यहं । केषामेतेषां स्वामित्वभोक्तृत्वादिना सम्बन्धी । किंविशिष्टः सन्, प्राग्गिर्यादि-प्राचा दर्शनिकादिप्रतिमाविषयाणां व्रतानां संयमविशेषाणां व्रातः सङ्घातः प्राग्व्रतव्रातः तेन स्फुरन्ती जाग्रती धृतिः सन्तोषो यस्य स तथोक्तः । किं च । स्वाचाराप्रातिलोम्येन लोकाचारं प्रमाणयेदिति वचनात्सर्वत्र स्वस्वस्थानाविरोधेनैव पूर्वस्थानानुष्ठानमनुष्ठेयम् ॥ २३ ॥

एतस्य सकलदत्तिमुत्तरप्रबन्धेन व्याचष्टे—

अथाहूय सुतं योग्यं गोत्रजं वा तथाविधम् ।
ब्रूयादिदं प्रशान् साक्षाज्ज्ञातिज्येष्ठसधर्मणाम् ॥ २४॥

टीका—अथाधिकारे इतः सकलदत्तिरभिक्रियत इत्यर्थः । ब्रूयात् व्याहरेत् । कोऽसौ, प्रशान् प्रशमपरो नवमः श्रावकः । कं, सुतं पुत्रं । किंविशिष्टं, योग्यं स्वभारक्षमं । किं कृत्वा, आहूय आकार्य । वा अथवा योग्यपुत्राभावे

गोत्रजं भ्रातृव्यपुत्रादिकं । किंविशिष्टं, तथाविधं योग्यपुत्रतुल्यं । किं भूयादिदं वक्ष्यमाणं । कथं, साक्षात् समक्षं । केषां, जातिज्येष्ठसधर्मणां जातौ ब्राह्मणत्वादौ ज्येष्ठा मुख्या जातिज्येष्ठास्ते च ते सधर्माणश्च साधर्मिकास्तेषाम् ॥ २४ ॥

ताताद्ययावदस्माभिः पालितोऽयं गृहाश्रमः ।
विरज्यैनं जिहासूनां त्वमद्यार्हसि नः पदम् ॥ २५ ॥

टीका-हे तात स्वस्य पोष्यत्वसूचनगर्भं पुत्रादेः प्रियम्वामन्त्रणमिदं । पालितो यथाविधि निर्वाहितः । कोऽसावयं प्रस्तुतो गृहस्थाश्रमो गृहस्थाचारः । कैरस्माभिः नवमप्रतिमानुष्ठाननिष्ठाभ्युपेतैः । कथमद्ययावत् इदं दिनावधि । अद्य सम्प्रति । अर्हसि स्वीकर्तुमुचितोऽसि । कोऽसौ, त्वं । किं तत्, पदं त्रिवर्गसारगृहाचारानुवर्तनलक्षणं । केषां, नः अस्माकं । किं चिकीर्षूणां, जिहासूनां त्यक्तुमिच्छूनां । कमनं गृहाश्रमं । किं कृत्वा, विरज्य भवाङ्गभोगेषु वैराग्यं गत्वा ॥ २५ ॥

पुत्रः पुपूषोः स्वात्मानं सुविधेरिव केशवः ।
य उपस्कुरुते वप्तुरन्यः शत्रुः सुतच्छलात् ॥ २६ ॥

टीका—य उत्पन्नः पुनीते वंशं स पुत्र इति वचनात् स पुत्रो भण्यते । स किं, य उपस्कुरुते गृहादिममत्वच्छेदेनातिशयमाधत्ते । कस्य, वप्तुः पितुः । किं चिकीर्षोः, पुपूषोः शोधयितुमिच्छोः । कं, स्वात्मानं स्वचिद्रूपं । क इव कस्येत्याह—सुविधेरित्यादि यथा उपचक्रे । कोऽसौ, केशवः केशवो नाम श्रीमतीचरस्तत्पुत्रः । कस्य, सुविधेः वृषभनाथस्य पूर्वभवे सुविधिनाम्नो राज्ञः । उक्तं चार्षे—नृपस्तु सुविधिः पुत्रस्नेहाद्गार्हस्थ्यमत्यजन् । उत्कृष्टोपासकस्थाने तपस्तेपे सुदुश्चरम् ॥ तल्लक्षणवैपरीत्ये पुत्रस्यापि शत्रुत्वं वक्तुमाह—भवति । कोऽसौ, अन्यः पुत्रः । किंविशिष्टः, शत्रुः शातयिता इष्टविघातित्वात् । कस्मात्, सुतच्छलात्पुत्रव्याजात् ॥ २६ ॥

उपसंहारमाह—

तदिदं मे धनं धर्म्यं पोष्यमप्यात्मसात्कुरु ।
सैषा सकलदत्तिर्हि परं पथ्या शिवार्थिनाम् ॥ २७ ॥

टीका—यत एवं ततस्मात् । आत्मसात्कुरु स्वायत्तं विधेहि त्वं । किं तत्, इदं वर्तमानं मे मम सम्बन्धि धनं ग्रामसुवर्णादिकं धर्म्यं चैत्यालयपात्रदानादिकं पोष्यं च गृहिणीमातृपित्रादि । कुत एतदित्याह-हि यस्माद्वर्तते । काऽसौ, सा सूत्रोक्ता एषा विधीयमाना सकलदत्तिरन्वयदत्त्यपराभिधाना । कीदृशी, पथ्या पथोऽनपेता रत्नत्रयानुगतेत्यर्थः । केषां, शिवार्थिनां मुमुक्षूणां । कथं, परं अत्यर्थम् ॥ २७ ॥

विदीर्णमोहशार्दूलपुनरुत्थानशङ्किनाम् ।
त्यागक्रमोऽयं गृहिणां शक्त्याऽऽरम्भो हि सिद्धिकृत् ॥२८॥

टीका-वर्तते । कोऽसावयं प्रकृत त्यागक्रमः शनैः शनैर्बहिरन्तःसङ्गवर्जनं । केषां, गृहिणाम् । किंविशिष्टानां, विदीर्णेत्यादि--विदीर्णस्य शक्तिहीनत्वेन भिन्नस्य चासौ मोहशार्दूलश्च ममकारव्याघ्रः तस्य पुनरुत्थानं भूयो निहन्तुमभियोगस्तं शङ्कन्ते विकल्पयन्त्यभीक्ष्णमिति तच्छङ्किनस्तेषां । अर्थान्तरमर्थमाह-हि यस्माद्भवति । कोऽसावारम्भ ऐहिकमामुष्मिकं वा अभिमतार्थं साधयितुमुपक्रमः । कया, शक्त्या स्वसामर्थ्येन क्रियमाणः । किंविशिष्टो भवति, सिद्धिकृत् अभिप्रेतार्थसाधकः ॥ २८ ॥

एवं व्युत्सृज्य सर्वस्वं मोहाभिभवहानये ।
किञ्चित्कालं गृहे तिष्ठेदौदास्यं भावयन्सुधीः ॥ २९ ॥

टीका-तिष्ठेदासीत । कोऽसौ, सुधीः तत्त्वज्ञानसम्पन्नः । क्व, गृहे । कं, कालं । कियन्तं, किञ्चित्स्तोकं । किं कुर्वन्, भावयन्नभ्यस्यन् । किं तदौदास्यमुपेक्षां । कस्मै, मोहेत्यादि । मोहेन ममत्वेन अभिभव उपेक्षाविधित्व येन पृष्टो वा आरम्भादौ पुत्रादेरनुमतिं दास्यते—तस्य हानये निराकरणार्थं । किं कृत्वा, व्युत्सृज्य विसर्जनमिदं विधिपूर्वं वा त्यक्त्वा । किं तत्सर्वस्वं चेतनमचेतनं च स्व वस्तु । कथमेवमित्थं । किंप्रकारनिश्चयेन निष्काशनपरिकल्पितं प्रतिमासु काम्नि-

यमं निराकरोति तद्ग्रन्थानुवादस्तु ज्ञानदीपिकायां द्रष्टव्यः। गृहे तिष्ठेदित्यनेन स्वाङ्गाच्छादनार्थं वस्त्रमात्रधारणममूर्च्छामस्य लक्षयति। तेन विना गृहेऽवस्थानानुपपत्तेः। तथा ह्यागम " मोत्तूण वत्थमित्तं परिग्गहं जो विवज्जदे सेसं। त तत्थ विमुच्छण्णं करेदि जाण सो सावओ णवमो ॥ २९ ॥

अथानुमतिविरतं सप्तश्लोक्या व्याचष्टे—

नवनिष्ठापरः सोऽनुमतिव्युपरतः सदा।
यो नानुमोदेत ग्रन्थमारम्भं कर्म चैहिकम् ॥ ३० ॥

टीका—स भवति। किंविशिष्टोऽनुमतिव्युपरतोऽनुमतिविरत इत्यर्थः। य किं, यो नानुमोदते नानुमन्यते। कं, ग्रन्थं धनधान्यादिकं। तथा आरम्भं कृष्यादिकं। तथा कर्म व्यापारं। किंविशिष्टमैहिकं विवाहादिकं। कथं, त्रिधा मनोवाकायैः। किंविशिष्टः सन्, नवनिष्ठापरः दर्शनिकादिप्रतिमानवकानुष्ठाननिष्ठः ॥ ३० ॥

एतस्य विधिविशेषमाह—

चैत्यालयस्थः स्वाध्यायं कुर्यान्मध्याह्नवन्दनात्।
ऊर्ध्वमामन्त्रितः सोऽद्याद्गृहे स्वस्य परस्य वा ॥ ३१ ॥

टीका—कुर्याद्विदध्यात्कोऽसावसौ अनुमतिविरत। कं, स्वाध्यायमागमाध्ययनं। किंविशिष्टः सन्, चैत्यालयस्थ जिनगृहे तिष्ठन्। तथा अद्यात् भुञ्जीत स। क्व, गृहे। कस्य, स्वस्य आत्मीयस्य पुत्रादे परस्य वा यस्य कस्य धार्मिकस्य। किंविशिष्टः सन्, आमन्त्रित आहूत। कथमूर्ध्वमुपरिष्टात्। कस्मान्मध्याह्नवन्दनात् माध्याह्निककृतिकर्मणः पश्चात् ॥ ३१ ॥

अस्यैवोद्दिष्टत्यागार्थं भावनाविशेषं श्लोकद्वयेनाह—

यथाप्राप्तमदन्देहसिध्यर्थं खलु भोजनम्।
देहश्च धर्मसिध्यर्थं मुमुक्षुभिरपेक्ष्यते ॥ ३२ ॥

सा मे कथं स्यादुद्दिष्टं सावद्याविष्टमश्नतः ।
कर्हि भैक्षामृतं भोक्ष्ये इति चेच्छेज्जितेन्द्रियः ३३ युग्मम्

टीका–इच्छेव आकाङ्क्षेदसौ । किं इति एतत् । किं कुर्वन् भुञ्जान । किं, यथाप्राप्त यथालब्ध तत्तत्संयमाविरोधेनाभ्रन्तिरयं । किंविशिष्टो, यत जितेन्द्रिय । जितानि वशीकृतानीन्द्रियाणि स्पर्शनादीनि येन स जितेन्द्रिय किमेतदिच्छेदित्याह–खलु निश्चयेन । अपेक्ष्यते आकाङ्क्ष्यते । किं तत्, भोजन । कैः, मुमुक्षुभि । किमर्थं, देहसिध्यर्थं शरीरवर्तनार्थं । तथा अपेक्ष्यते देहस्तं । किमर्थं, धर्मसिध्यर्थं रत्नत्रयनिष्पत्त्यर्थं । सा च धर्मसिद्धि कथ न कथमपि स्यात् । कस्य, मे मम । किं कुर्वतोऽश्नतो भुञ्जानस्य । किं तत्, उद्दिष्ट स्वोद्देशेन साधितमाहार । किंविशिष्ट, सावद्याविष्ट सावद्येनाध कर्मणा ससृष्ट । तत कर्हि कस्मिन्काले । भोक्ष्ये वलिभक्ष्येऽहं । किं तत्, भैक्षामृत भिक्ष्यन्त इति भिक्षा याचितप्रासाहारा भिक्षाणा समूहो भैक्ष भैक्षममृतमिवाजरामरत्वहेतुत्वात् ॥ ३२ । ३३ ॥

अस्यैव गृहत्यागविधिमाह—

पञ्चाचारक्रियोद्युक्तो निष्क्रमिष्यन्नसौ गृहात् ।
आपृच्छेत गुरून् बन्धून् पुत्रादींश्च यथोचितम् ॥ ३४ ॥

टीका–आपृच्छेत सवदेदसौ । कान्पुत्रादीन् । कथ, यथोचित यथार्हं । किं करिष्यन्, निष्क्रमितुमिच्छन् । कस्माद्गृहात् द्रव्यभावगेहात् । किंविशिष्ट सन्, पञ्चाचारक्रियोद्युक्त पञ्चाना ज्ञानाद्याचाराणां करणे तत्पर । अत्राय विधि – अहो कालविनयोपधानबहुमानानिह्नवार्थव्यञ्जनतदुभयसम्पन्नलक्षणज्ञानाचार न शुद्धस्यात्मनस्त्वमसीति निश्चयेन जानामि, तथापि त्वां तावदाश्रयामि यावत्त्वत्प्रसादाच्छुद्धमात्मानमुपलभे । अहो निःशङ्कितत्वनिःकाङ्क्षितत्वनिर्विचिकित्सितत्वनिर्मूढदृष्टित्वोपबृंहणस्थितीकरणवात्सल्यप्रभावनालक्षणदर्शनाचार, शेष पूर्ववत् । अहो मोक्षमार्गप्रवृत्तिकारणपञ्चमहाव्रतोपेतकायवाङ्मनोगुप्तीर्यभाषैषणादाननिक्षेपणप्रतिष्ठापनसमितिलक्षणचारित्राचार, शेष पूर्ववत् । अहो अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्त शय्यासनकायक्लेश-

प्राग्वत् ॥ अहो समस्तेतराचारप्रवर्तकस्वशक्त्यनिगूहनलक्षणवीर्याचार, शेष प्राग्वत्। अथ यथोचितमत ऊर्ध्वं वक्ष्ये ॥ तथाहि-अहो मदीयशरीरजनकस्यात्मन् अहो मदीयशरीरजनन्यात्मन् नाय मदात्मा युवाभ्या जनितो भवतीति निश्चयेन युवा जानीत। तत आपृष्टौ युवामिममात्मान विमुञ्चत। अयमात्माऽद्योद्भिन्नज्ञानज्योतिरात्मानमेवात्मनोऽनादिजनकमुपसर्पति। तथा अहो मदीयशरीरबन्धुजनवर्तिन आत्मान अय मदात्मा न किञ्चनापि युष्माक भवतीति निश्चयेन यूय जानीथ तत आपृष्टा यूय, शेष पूर्ववत्। न वर जनकमित्यस्य स्थाने बन्धुमिति पठनीय । अहो मदीयशरीरपुत्रस्यात्मन् मदात्मनो न त्व जन्यो भवसीति निश्चयेन त्व जानीहि तत आपृष्टस्त्व मिममात्मान विमुञ्च, शेष प्राग्वत्। न वर बन्धुस्थाने जन्य पठेत् ॥ अहो मदीयशरीररमण्या आत्मन् मदात्मा न त्वा रमयतीति निश्चयेन त्व जानीहि तत आपृष्टस्त्वमिममात्मान विमुञ्च । अयमात्माऽद्योद्भिन्नज्ञानज्योति स्वानुभूतिमेवात्मनोऽनादिरमणीमुपसर्पतीत्यादि ॥ ३४ ॥

विनयादाचारस्य भेद विस्तरेण प्रागुक्तमिदानीं सुखस्मृत्यर्थं सक्षिप्य पुनराह—

सद्दृङ्निर्वृत्ततपसां मुमुक्षोर्निर्मलीकृतौ ।
यत्नो विनय आचारो वीर्याच्छुद्धेषु तेषु तु ॥ ३५ ॥

टीका—भण्यते सूरिभि । कोऽसौ, विनय । किं, यत्न प्रणिधान । क, निर्मलीकृतौ मलापनयने । सद्दृङ्निर्वृत्ततपसा सम्यग्दर्शनज्ञानचारित्रतपसा। कस्य, मुमुक्षो न बुभुक्षो । आचारस्तु भण्यते। किं यत्न । केषु तेषु सद्दृगादिषु चतुर्षु। किविशिष्टेषु शुद्धेषु निर्मलीकृतेषु। कस्मात् वीर्यात् स्वशक्तिमनिगूह्य । एतेन पञ्चमो वीर्याचार सूच्यते ॥ ३५ ॥

सम्प्रत्युपसहरति—

इति चर्यां गृहत्यागपर्यन्तां नैष्ठिकाग्रणीः ।
निष्ठाप्य साधकत्वाय पौरस्त्यपदमाश्रयेत् ॥ ३६ ॥

टीका—आश्रयेत् स्वीकुर्यात्। कोऽसौ, नैष्ठिकाग्रणी नैष्ठिकेषु दार्शनिकादिषु नवस्वग्रणीर्मुख्योऽनुमतिविरत । कि तत्, पद स्थान । किविशिष्ट,

पौरस्त्य एकादशमुद्दिष्टविरत्याख्य । कस्मै, साधकत्वाय आत्मशोधनार्थं । किं कृत्वा, निष्ठाप्य परिसमाप्य । कां, चर्या सयमाचार । किंविशिष्टा, गृहत्यागपर्यन्ता गृहत्यागः पर्यन्ते अवसाने यस्या तां । कथमित्येवम् ॥ ३६ ॥

अथोद्दिष्टविरतस्थानं त्रयोदशभि श्लोकैर्व्याचष्टे—

तत्तद्व्रतास्त्रनिर्भिन्नश्वसन्मोहमहाभटः ।
उद्दिष्टं पिण्डमप्युज्झेदुत्कृष्टः श्रावकोऽन्तिमः ॥ ३७ ॥

टीका—उज्झेत् त्यजेत् । कोऽसौ, अन्तिम श्रावक । किंविशिष्ट, उत्कृष्ट अपमित्यभूतनयादुत्कृष्टोऽनुमतिविरतस्तु नैगमनयादिति ज्ञापनार्थमुभौ भिक्षू तौ प्रकृष्टौ चेति प्रागुक्तमपीद विशेषण पुनरुक्त । किमुज्झत्, पिण्ड भक्त अपिशब्दादुपधिशयनासनादि । किंविशिष्टमुद्दिष्ट आत्मोद्देशेन कल्पित। नवकोटिविशुद्ध स्वीकुर्यादित्यर्थ । किंविशिष्ट सन्, तदित्यादि-तानि पूर्वोक्तानि व्रतानि यथास्व निवृत्तिप्रवृत्तिरूपाण्याचरणानि तत्तद्व्रतानि तान्य स्त्राणि प्रहरणानि तैर्निर्भिन्नो नितरा विदारित स चासौ श्वसन् किञ्चिज्जीवन् निरस्तव्रतप्राप्ति प्रतिबन्धन् मोह एव महाभटो दुर्निवारवीरो यस्य स तथोक्त ॥ ३७ ॥

तद्भेदलक्षणार्थमाह—

स द्वेधा प्रथमः श्मश्रुमूर्धजानपनाययेत् ।
सितकौपीनसव्यानः कर्तर्या वा क्षुरेण वा ॥ ३८ ॥

टीका—स उत्कृष्टश्रावको द्वेधा द्विविधो भवति । तत्राद्यस्य प्रथम इत्यादिना प्रबन्धेन विधिमभिधत्ते-अपनाययेत् छेदयेत् । कोऽसौ, प्रथम आद्य उद्दिष्टविरत । कान्, श्मश्रुमूर्धजान् कूर्चशिर केशान् । कया, कर्तर्या कर्तरिकया । वा क्षुरेण नापितोपकरणेन वा । अत्र कर्तर्याऽपनापन स्थाद्यतर शोभानाकांक्षणात् । तथा सितकौपीनसव्यानो भवेत् श्वेतकक्षापटोत्तरीयपट आसौ स्यादित्यर्थ ॥

(२) स उत्कृष्ट उद्दिष्टविरतश्रावक द्वेधा द्विविधो भवतीति सम्बन्धः । तत्र तावत् प्रथम आद्य । किंविशिष्ट ? सितकौपीनसव्यान कौपीन शुभ्र

प्रच्छादनवस्त्र सव्यान उत्तरीयवस्त्र कौपीन च सव्यान च कौपीनसव्यानं सितं वस्त्रे कौपीनसव्याने यस्य स तथोक्त । किं कुर्यात् ? अपनापयेत् अन्येनोत्पाटयेत् । कान्, श्मश्रुमूर्धजान् । श्मश्रूणि कूर्चान् केशान् मूर्धजान् शिर-केशान् न तु कक्षादिस्थान् । कया, कर्तर्या कर्तरिकया वा अथवा क्षुरेण रोमशास्त्रविशेषेण । अत्र द्वितीयो वाशब्द समुच्चयेन ज्ञातव्यो यथासम्भव-मिति ॥ ३८ ॥

स्थानादिषु प्रतिलिखेत् मृदूपकरणेन सः ।
कुर्यादेव चतुष्पर्व्यामुपवासं चतुर्विधम् ॥ ३९ ॥

टीका—प्रतिलिखेत् भूतलादिषु प्रमृज्यात् । कोऽसौ, स प्रथम उत्कृष्ट । केन मृदूपकरणेन मृदुना सुकुमारेण जन्तुबाधकेनोपकरणेन वस्त्रादिना । केषु कर्तव्येषु, स्थानादिषु ऊर्ध्वाभावोपवेशनसवेशनादिषु । तथा कुर्यादेव अवश्य विदध्यादसौ । कमुपवासमनशन । किंविशिष्ट, चतुर्विध चतस्रो विधा आहारास्त्याज्या यस्मिन्नसौ चतुर्विधस्त । चतुष्पर्व्यां मासि मासि द्वयोरष्टम्योर्द्वयोश्चतुर्दश्यो ॥ ३९ ॥

स्वयं समुपविष्टोऽद्यात्पाणिपात्रेऽथ भाजने ।
स श्रावकगृहं गत्वा पात्रपाणिस्तदङ्गणे ॥ ४० ॥
स्थित्वा भिक्षां धर्मलाभं भणित्वा प्रार्थयेत वा ।
मौनेन दर्शयित्वाङ्गं लाभालाभे समोऽचिरात् ॥ ४१ ॥
निर्गत्याऽन्यद्गृहं गच्छेद्भिक्षोद्युक्तस्तु केनचित् ।
भोजनायार्थितोऽद्यात्तद्भुक्त्वा यद्भिक्षितं मनाक् ॥४२॥
प्रार्थयेतान्यथा भिक्षां यावत्स्वोदरपूरणीम् ।
लभेत प्रासु यत्राम्भस्तत्र संशोध्य तां चरेत् ॥४३॥ कुलापकं

टीका—स प्रथमोत्कृष्टोऽद्यात् भुञ्जीत । केन, स्वयमात्मना । किंविशिष्ट सन्, समुपविष्ट निश्चलनिविष्ट । क, पाणिपात्रे हस्तपुटे । अथवा भाजने स्थाल्यादौ । इत श्रावकेत्यादिना भिक्षणविधिमाह-प्रार्थयेत् भिक्षां

कोऽसौ, स । का, भिक्षा । किं कृत्वा, भणित्वा । कं, धर्मलाभ धर्मलाभ शब्दमुच्चार्येत्यर्थः । किं कृत्वा, स्थित्वा उषो भूत्वा । क्व, तदङ्गणे श्रावकगृहाग्रभागे । किंविशिष्टः सन्, पात्रपाणिः भिक्षापात्रहस्तः । किं कृत्वा, गत्वा प्राप्य । किं तत्, श्रावकगृहं । वा अथवा । स प्रार्थयन् भिक्षां । केन मौनेन । किं कृत्वा, दर्शयित्वा दातृदृष्टिगोचरं कृत्वा । किं तत् अङ्गं स्वशरीरं । ततश्च गच्छेत् व्रजेत् । किं तत्, गृहं । किंविशिष्टं, अन्यत् अयाचितभिक्षं । किं कृत्वा, निर्गम्य याचितभिक्षागृहान्निष्क्रम्य । कथं अचिरात् शीघ्रं । किंविशिष्टः, समः रागद्वेषरहितः । क्व लाभालाभे भिक्षायाः प्राप्तावप्राप्तौ च । भिक्षोपुक्तस्तु भिक्षां याच्यमानः पुनः केनचिच्छ्रावकेण । भोजनाय भोजनं कर्तुमर्थितः उपरुद्धः सन् । भुञ्जीत तद्गृहे भुञ्जीत । किं कृत्वा, भुक्त्वा जेमित्वा । किं तत्तदन्नं । यत्किं यत्किञ्चित् गृहान्तरेषु याचितं । किंयत् मनाक्, स्तोकं । यदि भिक्षितं मनि नान्यस्त्यां भुञ्जीतेति भावः । अन्यथा परोपरोधाभावे । प्रार्थयेत याचेत स । कां, भिक्षां । कथं यावत्पर्यादीकृत्य । कां, स्वोदरपूर्णां भिक्षां । स्वस्यैवोदरं यावत्या पूर्यते तावतीमेव प्रार्थयेत अन्यथा असंयमप्रसङ्गः । अथवा यावत् स्वोदरपूरणी भिक्षा भवति तावदेव प्रार्थयेतेति वाक्यभेदेन सम्बन्धः । ततश्च चरेत् गोचरं भुञ्जीतेति भावः । कां, तां भिक्षां । किं कृत्वा, प्रशोध्य सम्यक् शोधयित्वा । क्व, तत्र श्रावकगृहे । यत्र किं यत्र लभेत् प्राप्नुयात् । किं तदम्भः पानीयं । किंविशिष्टं, प्रासु प्रासुकं निर्जीवम् ॥ ४०।४१।४२।४३ ॥

आकांक्षन्संयमं भिक्षापात्रप्रक्षालनादिषु ।
स्वयं यतेत चादर्पः परथाऽसंयमो महान् ॥ ४४ ॥

टीका—स चादर्पो विद्याविनयधनादिमदरहितः सन् । स्वयं यतेत आत्मना यत्नं कुर्यात् । क्व, भिक्षेत्यादि भिक्षापात्रस्य प्रक्षालनं धावनमादिर्येषामासनस्थापनोच्छिष्टव्यञ्जनादीनां तानि भिक्षापात्रप्रक्षालनादीनि कर्माणि तेषु । किं कुर्वन्, आकांक्षन् अभिलषन् । कं, संयमं प्राणिरक्षणं । परथा अन्यथा शिष्यादिना तद्विधाने असंयमः । कं ईदृशः, महान् भूयान् ॥ ४४ ॥

ततो गत्वा गुरूपान्तं प्रत्याख्यानं चतुर्विधम् ।
गृह्णीयाद्विधिवत्सर्वं गुरोश्चालोचयेत्पुरः ॥ ४५ ॥

टीका—तत प्रकृतकर्मकरणानन्तर । गुरोर्धर्माचार्यस्योपान्त समीपं गत्वा । गृह्णीयात्स्वीकुर्यात् स । किं तत्, चतुर्विध चतुर्विधाहारविषय । प्रत्याख्यान नियम । कथ, विधिवत् यथाविधि । तथा आलोचयेत् निवेद येत्स । किं तत्, सर्वं गमनाप्रभृति स्वचेष्टित । क्व, पुरोऽग्रे । कस्य, गुरो । चशब्दाद्गोचरीं प्रतिक्रमणां कुर्यात् ॥ ४५ ॥

एवमनेकभिक्षानियमस्य प्रथमोत्कृष्टस्य भोजनविधिमुक्त्वा सम्प्रति तस्यैवैकभिक्षानियमस्य तदुपदिशति—

यस्त्वेकभिक्षानियमो गत्वाऽद्यादनुमुन्यसौ ।
भुक्त्यभावे पुनः कुर्यादुपवासमवश्यकम् ॥ ४६ ॥

टीका—यस्तु प्रथमोत्कृष्टो भवति । कीदृश, एकस्यामेकगृहसंबंधिन्यां भिक्षाया नियम प्रतिज्ञा यस्य स एकभिक्षानियम । असावद्यात् भोजन कुर्यात् । किं कृत्वा, गत्वा दातृगृह प्रविश्य । कथमनुमुनि संयतस्य पश्चात् । एतेन प्रथमोत्कृष्टो द्वेधा स्यादनेकभिक्षानियम एकभिक्षानियमश्चेत्युक्त प्रतिपत्तव्य । स पुन कुर्यात् । कमुपवास । कथमवश्य नियमेन । क्व सति, भुक्त्यलाभ सति तथाभोजनस्याप्राप्तौ ॥ ४६ ॥

तद्विधिविशेषमाह—

वसेन्मुनिवने नित्यं शुश्रूषेत गुरूँश्चरेत् ।
तपो द्विधाऽपि दशधा वैयावृत्त्यं विशेषतः ॥ ४७ ॥

टीका—स नित्य सर्वदा । मुनिवने संयताश्रम । वसेन्निवास कुर्यात् । तथा शुश्रूषेत पर्युपासीत । कान्, गुरून् धर्माचार्यादीन् । तथा चरेदनुतिष्ठेत् । किं तत्तप । कथंभूत, द्विधाऽपि बाह्यमाभ्यन्तर च । तथा स चरेत् । किं तत्, वैयावृत्त्य संयमिनामापत्प्रतीकार । कतिधा, दशधा आचार्यादिगोचरत्वेन दशप्रकार । केन, विशेषतोऽतिशयेन अन्तरङ्गतपस्यस्य सगृहीतस्यापि पृथगुपदेश इतरतपस्त इदमतिशयेनासौ श्रावकश्चरेदिति ज्ञापनार्थम् ॥ ४७ ॥

अथ द्वितीयमुद्दिष्टविरत लक्षयति—

तद्वद्द्वितीयः किन्त्वार्यसञ्ज्ञो लुञ्चत्यसौ कचान् ।
कौपीनमात्रयुग्धत्ते यतिवत्प्रतिलेखनम् ॥ ४८ ॥

टीका–भवति । कोऽसौ, द्वितीय उत्कृष्ट । किंवत्, तद्वत् प्रथमेन तुल्य-क्रिय । किंतु विशेषेण लुञ्चति हस्तेनोत्पाटयत्यसौ । कान्, कचान् कूर्च शिर केशान् । किं नामा, आर्यसञ्ज्ञ आय इति सञ्ज्ञा नाम यस्यासौ । तथा धत्ते धारयत्यसौ । कि तत्प्रतिलेखन पिच्छिकारय स्वयमोपकरण । किंवत्, यतिवत् सयतेन तुल्य । किंविशिष्ट सन्, कौपीनमात्रयुक कौपीन मात्र गुह्यप्रच्छादनचेलखण्डमात्र युनक्त्यात्मना योजयति नोत्तरीयादिक य स तथोक्त ॥४८॥

स्वपाणिपात्र एवात्ति संशोध्यान्येन योजितम् ।
इच्छाकारं समाचारं मिथः सर्वे तु कुर्वते ॥ ४९ ॥

टीका—तथा अत्ति जेमत्यसावाहार । किंविशिष्ट, योजित समर्पित । क, स्वपाणिपात्र एव निजहस्तपुटे न स्थाल्यादौ । केन, अन्येन गृहस्थादिना । कि कृत्वा, सशोध्य । एवमसाधारणमाचारमुक्त्वा साधारण तमाह–इच्छे त्यादि । कुर्वते विदधते । के, सर्वे एकादशापि श्रावका । क, समाचार । किंविशिष्टमिच्छाकार इच्छामीत्येवविधोच्चारणलक्षण । कथ, मिथ परस्पर । तुर्विशेषे ॥ ४९ ॥

इदानीं दशभि पद्यै शेष सगृह्णन्नाह—

श्रावको वीरचर्य्याहःप्रतिमातापनादिषु ।
स्यान्नाधिकारी सिद्धान्तरहस्याध्ययनेऽपि च ॥ ५० ॥

टीका—न स्यात्कोऽसौ, श्रावक । किंविशिष्टोऽधिकारी योग्य । क, वीरेत्यादि वीरचर्या स्वय भ्रामर्या भोजन,अह प्रतिमा दिनप्रतिमा आतापना-दयस्त्रिकालयोगा ग्रीष्मे सूर्याभिमुख गिरिशिखरेऽवस्थान, वर्षासु वृक्षमूले, शीतकाले रजन्या चतुष्पथे, इत्येवंलक्षणास्त्रय कायक्लेशविशेषा । तथा सिद्धान्तस्य परमागमस्य सूत्ररूपस्य रहस्यस्य च प्रायश्चित्तशास्त्रस्याध्ययने पाठे श्रावको नाधिकारी स्यादिति सम्बन्ध ॥ ५० ॥

दानशीलोपवासार्चाभेदादपि चतुर्विधः ।
स्वधर्मः श्रावकैः कृत्यो भवोच्छित्त्यै यथायथम् ॥५१॥

टीका—कृत्योऽनुष्ठेय । कोऽसौ, स्वधर्मं आत्मन आचार । कै, श्रावकै देशयतै । किंविशिष्टश्चतुर्विधोऽपि । कस्माद्दानशीलोपवासार्चाभेदात् दान च शील चोपवासश्चार्चा च जिनादिपूजा ताभिर्भेदस्तस्मादपिशब्दाच्च केवल दर्शनव्रतादिभेदादेकादशधेति ग्राह्य । कथ, यथायथ स्वप्रतिमाचरणाविरो धेन । किमर्थं, भवोच्छित्त्यै ससारनिरासार्थं ॥ ५१ ॥

इत उत्तर व्रतरक्षाया यत्नविधानार्थं प्रबन्धेनाभिधत्ते—

प्राणान्तेऽपि न भंक्तव्यं गुरुसाक्षिश्रित व्रतम् ।
प्राणान्तस्तत्क्षणे दुःखं व्रतभङ्गो भवे भवे ॥ ५२ ॥

टीका—न भक्तव्य न खण्डनीय श्रावकै । किं तद्व्रत । किंविशिष्ट, श्रित प्रतिपन्न । कथ, गुरुसाक्षि गुरवोऽत्र परमेष्ठिनो दीक्षागुरव साधर्मिकमुख्या स्थानवास्तुदेवताश्च गृह्यन्ते । गुरव साक्षिण साक्षाद्द्रष्टारो यत्र तद्गुरुसाक्षि कर्मेत्यर्थ । क, प्राणान्त । व्रतभगाकरणे प्राणनाशे सम्भवत्यपि किं पुनरि-तरापदि । व्रतभङ्गकरणे तु स्वभूयस्त्व दर्शयति—भवति । कोऽसौ, प्राणान्त । किं तु ख । क,तत्क्षणे तस्मिन्नेव समये नोत्तरत्र । व्रतभग पुनर्दु ख भवति । क, भवे भवे जन्मनि जन्मनि । बुद्धिपूर्वकव्रतभगकरणेन सम्यक्त्वस्यापि विराधनाद्नन्तससारित्वस्यागमे प्रतिपादनात् ॥ ५२ ॥

शीलवान् महतां मान्यो जगतामेकमण्डनम् ।
स सिद्धः सर्वशीलेषु यः सन्तोषमधिष्ठितः ॥ ५३ ॥

टीका—भवति । कोऽसौ, शीलवान् शुचिचरित्र श्रावको यतिर्वा । किंविशिष्टो, मान्य सत्कृत्य । केषां, महतामिंद्रादीनां । पुन किंविशिष्टो, जगतां लोकानामेकमुत्कृष्ट मण्डनमलकरण । शीलसिद्ध्युपायमाह–स भवति । किंविशिष्ट , सिद्धो निष्पन्न प्रतीतो वा । केषु सर्वशीलेषु सकलसदाचारेषु । य किं, योऽधिष्ठितोऽध्यासित । क, सन्तोष प्राति विषयवैतृष्ण्यमित्यर्थ ॥५३॥

तत्र न्यञ्चति नो विवेकतपनो नाञ्चत्यविद्यातमी
नाप्नोति स्खलितं कृपामृतसरिन्नोदेति दैन्यज्वरः ।

विस्निग्धन्ति न सम्पदो न दृशमप्यामूनयन्त्यापदः
सेव्यं साधुमनस्विनां भजति यः सन्तोषमंहोमुषम् ॥५४॥

टीका–योऽंहोमुषं पापापहं सन्तोषं भजति सेवते। किंविशिष्टं, सेव्यं। केषां, साधूनां सिद्धिसाधकानां मनस्विनां साभिमानिनां। तत्र सन्तोषसेवके पुंसि। नो न्यञ्चति नीचैर्न भवति आरूढारूढ एव भवतीत्यर्थः। कोऽसौ, विवेकतपनः युक्तायुक्तविचारभास्करः। तथा न अञ्चति न प्रसरति। काऽसावविद्यातमी अज्ञानरात्रिः। तथा नाप्नोति न लभते। काऽसौ, कृपामृतसरित् अनुकम्पापीयूषनदी। किं, स्खलितं प्रवृत्तिप्रतिबन्धं। तथा नोदेति नोद्गच्छति। कोऽसौ, दैन्यज्वरः दैन्यं विषादो ज्वर इव देहमनस्तापहेतुत्वात्। तथा न विस्निग्धन्ति न विरज्यन्ति। काः, सम्पदः श्रियः। तथा नामूनयन्ति नारोपयन्ति। काः, आपदो विपदः। कां, दृशमपि किं पुनरालिंगनादिकम्॥ ५४ ॥

स्वाध्यायमुत्तमं कुर्यादनुप्रेक्षाश्च भावयेत्।
यस्तु मन्दायते तत्र स्वकार्ये स प्रमाद्यति ॥ ५५ ॥

टीका—कुर्यात्क्षपकः। कं, स्वाध्यायं। किंविशिष्टमुत्तमं अध्यात्मादिविद्याविषयं मनःप्रसत्त्याक्षेपकं च। तथा भावयेत् अभ्यस्येत्। काः, अनुप्रेक्षाः अनित्यत्वादिभावना द्वादश। चशब्दाद्दर्शनविशुद्ध्यादिभावनाश्च षोडश। यस्तु यः पुनस्तत्र स्वाध्यायादौ। मन्दायते अलसो भवति। स प्रमाद्यति नावधत्ते नोत्सहत इत्यर्थः। कं, स्वकृत्ये आत्मकार्ये॥ ५५ ॥

धर्मान्नान्यः सुहृत्पापान्नान्यः शत्रुः शरीरिणाम्।
इति नित्यं स्मरेन्न स्यान्नरः संक्लेशगोचरः ॥ ५६ ॥

टीका—नरः पुमान्। संक्लेशगोचरो रागद्वेषमोहविषयो न स्यात् रागादिभिर्नाभिभूयत इत्यर्थः। किं कुर्वन्नित्येव। नित्यं सन्ततं। स्मरन् ध्यायन्कथमित्याह–नास्ति। कोऽसौ सुहृत्। किंविशिष्टोऽन्यः। कस्मात् धर्मात् धर्मं मुक्त्वोपकर्तेत्यर्थः। तथा पापादन्यो नास्ति शत्रुरधर्मं मुक्त्वापकर्तेत्यर्थः। केषां, शरीरिणां देहिनां॥ ५६ ॥

सल्लेखनां करिष्येऽहं विधिना मारणान्तिकीम्।
अवश्यमित्यदः शीलं सन्निदध्यात्सदा हृदि ॥ १७ ॥

टीका—सविदध्यात् सयोजयत् । श्रावक । किं तत्, एतत्सल्लेखनाख्य शील । क्व, हृदि चित्ते । कथ, सदा पश्चिमसल्लेखना नित्य भावयेदित्यर्थ । कथमिति । किमिति, अवश्य नियमन । करिष्य विधास्येऽह । का, सल्लेखना बाह्याभ्यन्तरतपोभि सम्यक्कायकषायकृशीकरणमाधार । किंविशिष्टा मारणा न्तिकी मरणमवान्तो मरणान्त तद्भवमरणमित्यर्थ तत्र भवा । केन, विधिना शास्त्रोक्तविधानेन ॥ ५७ ॥

सहगामीकृत तेन धर्मसर्वस्वमात्मनः ।
समाधिमरणं येन भवविध्वंसि साधितम् ॥ ५८ ॥

टीका –तेन पुसा कृत । किं तदात्मन स्वस्य । धर्मसर्वस्व व्यवहारानि श्चयरत्नत्रय । किंविशिष्ट, सहगामि आत्मना सह भवान्तरगन्तृ । येन किं, येन साधित निर्वर्तित । किं तत्समाधिमरण रत्नत्रयैकाग्रतया प्राणत्याग । किंविशिष्ट भवविध्वसि ससारनिर्मूलनशील ॥ ५८ ॥

यत्प्रागुक्त मुनीन्द्राणा वृत्तं तदपि सेव्यताम् ।
सम्यङ् निरूप्य पदवीं शक्तिं च स्वामुपासकैः ॥५९॥

टीका– प्राक् चतुर्थाद्यध्यायपटके । मुनींद्राणा महामुनीना । यद् वृत्त समितिगुप्त्याद्याचरणमुक्त तदपि न कवल ससेव्यतामनुष्ठीयता । कैरुपासकै श्रावकै । किं कृत्वा सम्यग् निरूप्य अविपरीत पर्यालोच्य । का, स्वामा- त्मीया । पदवीं सयमभूमिका । शक्तिं च वीर्य ॥ ५९ ॥

प्रकृतमुपसहरन्नौत्सर्गिकहिंसादिवृत्ति प्रति दर्शयति प्रयुक्त—

इत्यापवादिकीं चित्रा स्वभ्यस्यन्विरतिं सुधीः ।
कालादिलब्धौ क्रमतां नवधौत्सर्गिकीं प्रति ॥ ६० ॥

टीका—क्रमतामुत्सहता । कोऽसौ सुधी तत्त्वज्ञानसम्पन्न श्रावक । कथ, प्रति उद्दिश्य । का विरति । किंविशिष्टामौत्सर्गिकीं उत्कृष्ट सर्जन- मुत्सग सर्वसगत्याग तत्र भवामौत्सर्गिकीं । कतिधा, नवधा मनोवाक्काये प्रत्येक कृतकारितानुमतानां त्यागेन नवप्रकारा । कस्या, कालादिलब्धौ कालदेशबलवीर्यसहायसाधनादिसामग्र्या सत्या । किं कुर्वन्, स्वभ्यस्यन् सम्यग्भावयन् । का विरति हिंसाविनिवृत्ति । किंविशिष्टामापवादिकीं यती-

नामपवादहेतुत्वादपवादो ग्रन्थस्तस्य भवं । पुन किंविशिष्टां, चित्रां नानाप्रकारां । कथमित्येवमुक्तप्रकारेण ॥ ६० ॥

साधकत्वं व्याकर्तुकामस्तत्स्वामिनं निर्दिशति–

इत्येकादशधाऽऽम्नातो नैष्ठिकः श्रावकोऽधुना।
सूत्रानुसारतोऽन्त्यस्य साधकत्वं प्रवक्ष्यते ॥ ६१ ॥

टीका—इत्येवं नैष्ठिकश्रावक एकादशधाऽस्माभिराम्नातः पारम्पर्योपदेशेन वर्णितः । अधुना साम्प्रतमित ऊर्ध्वं प्रवक्ष्यते प्रकर्षेण वर्णयिष्यते अस्माभिः । किं तत्साधकत्वं तृतीयं साधनाख्यं पदं । अंत्यस्योद्दिष्टविरतस्य श्रावकस्य । कस्मात्सूत्रानुसारतः परमागममनुसृत्येति भद्रम् ॥ ६१ ॥

इत्याशाधरविरचिताया स्वोपज्ञधर्मामृतसागारधर्मटीकायां
भव्यकुमुदचन्द्रिकासञ्ज्ञायामादितः षोडशः
प्रक्रमाश्च सप्तमोऽध्याय· ॥ ७ ॥

अथाष्टमोऽध्यायः।

अथ सल्लेखनाविधिमभिधातुकामस्तत्प्रयोक्तारं लक्षयन्नाह–

देहाहारेहितत्यागात् ध्यानशुध्याऽऽत्मशोधनम् ।
यो जीवितान्ते सम्प्रीतः साधयत्येष साधकः ॥ १ ॥

टीका—भवत्येष साधकः । य. किं, यः साधयति निर्वर्त्तयति । किं तत्, आत्मशोधनं आत्मनोऽन्तस्तत्त्वस्य शोधनं शुद्धिं मोहरागद्वेषापगमं रत्नत्रयपरिणतिमित्यर्थ । क, जीवितान्ते प्राणनाशे प्राणेषु नश्यत्स्वित्यर्थः । किंविशिष्ट सन् , सम्प्रीत सर्वाङ्गीणध्यानसमुत्थानन्दयुक्त । कया तत्साधयति ? ध्यानशुध्या ध्यानस्यैकाग्रचिन्तानिरोधस्य शुद्धिरार्तरौद्रपरित्यागेन स्वात्मन्यवस्थानं निर्विकल्पसमाधिरित्यर्थ । कस्मात् , देहाहारेहितत्यागात् देहत्यागः शरीरममत्ववर्जनमाहारत्यागश्चतुर्विधाहारप्रत्याख्यानमीहितत्यागो मनोवाक्कायव्यापारव्यावर्तनं देहश्चाहारश्च ईहितं च देहाहारेहितानि तेषां त्यागस्तस्मात् ॥ १ ॥

कस्य श्रावकत्वेन कस्य च यतित्वेन मोक्षमार्गप्रवृत्तिः कर्तव्येति पृच्छन्तं प्रत्याह—

सामग्रीविधुरस्यैव श्रावकस्यायमिष्यते ।
विधिः सत्यां तु सामग्र्यां श्रेयसी जिनरूपता ॥ २ ॥

टीका—इष्यते अभिमन्यते पूर्वाचार्यैः । कोऽसावयमुक्तो वक्ष्यमाणश्च विधिः क्रियाकल्पः । कस्य, श्रावकस्य । किंविशिष्टस्य, सामग्रीविधुरस्यैव जिनलिङ्गग्रहणायोग्यनिधानकदाद्यादियुक्तस्य नान्यस्य । सामग्र्यां तु सत्यां भवति । काऽसौ, जिनरूपता जिनलिङ्गग्रहणं । किंविशिष्टा, श्रेयसी प्रशस्यतरा ॥ २ ॥

जिनलिङ्गस्वीकारकारणमाह—

किञ्चित्कारणमासाद्य विरक्ताः कामभोगतः ।
त्यक्त्वा सर्वोपधिं धीराः श्रयन्ति जिनरूपताम् ॥ ३ ॥

टीका—श्रयन्ति स्वीकुर्वन्ति । के ते, धीरा श्रावकाः परीषहोपसर्गसहने बद्धकक्षाः । कां, जिनरूपतां । किं कृत्वा, त्यक्त्वा व्युत्सृज्य । कं सर्वोपधिं बाह्याभ्यन्तरसङ्गं । किंविशिष्टाः सन्तः, विरक्ता व्यावृत्तचेतसः । काभ्यां, कामभोगतः कामः स्पर्शनरसनविषयानुभवः भोगो घ्राणचक्षुःश्रवणविषयानुभवः कामश्च भोगश्च कामभोगौ ताभ्यां । किं कृत्वा आसाद्य प्राप्य । किं, कारणं । किंविशिष्टं, किञ्चित् तत्त्वज्ञानेष्टवियोगशास्त्रपरायणादीनामन्यतमम् ॥ ३ ॥

जिनरूपतास्वीकारमाहात्म्यमाह—

अनादिमिथ्यादृगपि श्रित्वाऽर्हद्रूपतां पुमान् ।
साम्यं प्रपन्नः स्वं ध्यायन् मुच्यतेऽन्तर्मुहूर्ततः ॥ ४ ॥

टीका—मुच्यते द्रव्यभावकर्मभिः स्वयमेव विश्लिष्यते । कोऽसौ, पुमान् द्रव्यतः पुल्लिंग एव । कस्मात्, अन्तर्मुहूर्ततः किञ्चिदूननाडीद्वयमात्रात् । किं कुर्वन्, ध्यायन् समादधानः । कं स्वमात्मानं । किंविशिष्टः सन्, प्रपन्नः प्राप्तः । किं तत्, साम्यं माध्यस्थ्यं । किं कृत्वा, श्रित्वा । कामदृ-

दृष्टा निर्ग्रन्थलिङ्ग । किंविशिष्टोऽपि, अनादिमिथ्यादृगपि न केवलं सादि मिथ्यादृष्टिरविरतसम्यग्दृष्टि श्रावको वेत्यपिशब्दार्थः । उक्तं च—"आराध्य चरणमनुपममनादिमिथ्यादृशोऽपि यत्क्षणत । दृष्टा विमुक्तिभाजस्ततोऽपि चारित्रमत्रेष्टम्" ॥ ४ ॥

शरीरस्य स्थायिन पातने पातोन्मुखस्य च शोचने निषेधमुपपादयति—

न धर्मसाधनमिति स्थास्नु नाश्यं वपुर्बुधैः ।
न च केनापि नो रक्ष्यमिति शोच्यं विनश्वरम् ॥ ५ ॥

टीका—न नाश्य विध्वंस्य । कि तद्वपु शरीर । कैर्बुधै तत्त्वज्ञै । किंविशिष्ट, स्थास्नु साधुत्वेन रत्नत्रयानुष्ठानसाधकत्वलक्षणेन तिष्ठत् । कथं कृत्वा, धर्मसाधनमिति रत्नत्रयसिद्धयुपायो यत । न च नापि शोच्य शोचनीय वपुर्बुधै । किंविशिष्ट, विनश्वरं विशेषेण नश्यत् तद्भवमरणं प्राप्नुवदित्यर्थ । कथं कृत्वा, केनापि नो रक्ष्यमिति योगीन्द्रदेवेन्द्रदानवेन्द्रादिनाऽपि रक्षयितुमशक्य यत । उक्तं च—"गहनं न शरीरस्य हि विसर्जनं किं तु गहनमिह वृत्तम् । तच्च स्थास्नु विनाश्य न नश्वरं शोच्यमिदमाहु" ॥ ५ ॥

कायस्यानुवर्तनापचरणपरिहरणयेग्यतोपदेशार्थमाह—

कायः स्वस्थोऽनुवर्त्यःस्यात् प्रतीकार्यश्च रोगितः ।
उपकारं विपर्यस्यं-स्त्याज्यः सद्भिः खलो यथा ॥ ६ ॥

टीका—स्यात् । कोऽसौ काय । किंविशिष्टोऽनुवर्त्य पथ्याहारविहाराभ्यां स्वास्थ्य एव स्थापनीय । कै, सद्भि साधुभि । किंविशिष्ट सन्, स्वस्थोऽविकृत । तथा प्रतीकार्यो योग्यै पथ्यादिनोपचरणीय । कोऽसौ, काय । कै, सद्भि । किंविशिष्ट सन्, रोगित संजातरोग । तथा त्याज्य । कोऽसौ, काय सद्भि । किं कुर्वन्, विपर्यस्यन् अन्यथा कुर्वन् । कमुपकार स्वास्थ्यायारोग्याय चेज्यमाणमुपक्रम अधर्मसाधन व्याधि तद्वृद्धिं च गच्छन्नित्यर्थ । क इव, खलो दुर्जन पिण्याको वा यथा ॥ ६ ॥

धर्मार्थं धर्मोपघातस्यात्यन्तनिषेधमाह—

नावश्यं नाशिने हिंस्यो धर्मो देहाय कामदः ।
देहो नष्टः पुनर्लभ्यो धर्मस्त्वत्यन्तदुर्लभः ॥ ७ ॥

टीका—न हिंस्यो नोपहन्तव्यः सद्भिः । कोऽसौ, धर्मः । कस्मै, देहाय । किंविशिष्टाय, अवश्यं नाशिने निश्चितनाशाय । किंविशिष्टः, कामदः समीहितार्थप्रदो यतः । किञ्च । लभ्योऽवश्यप्राप्यः । कोऽसौ, देहः । कथं, पुनः । किंविशिष्टो, नष्टो नाशं गतः । देहमात्रापेक्षयेदमुच्यते, धर्मस्तु प्रक्रमात्समाधिमरणोऽत्यन्तदुर्लभो भवति । यत्नशतेनापि लब्धुमशक्य इत्यर्थः ॥ ७ ॥

विधिवत्प्राणांस्त्यजत आत्मघातशङ्कामपनुदति—

न चात्मघातोऽस्ति वृषक्षतौ वपुरुपेक्षितुः ।
कषायावेशतः प्राणान् विषाद्यैर्हिंसतः स हि ॥ ८ ॥

टीका—न चास्ति । कोऽसावात्मघातः स्ववधलक्षणो दोषः । कस्य, उपेक्षितुः यथाविधि भक्तप्रत्याख्यानादिना साधुत्वेन त्यजतः साधोः । किं तद्वपुः शरीरम् । कस्यां सत्यां, वृषक्षतौ प्रतिपन्नव्रतविनाशहेतौ उपस्थिते सतीत्यर्थः । हि यस्माद्भवति । कोऽसौ, सः आत्मघातः । कस्य, पुंसः । किं कुर्वतो, हिंसतो व्यपरोपयतः । कान्, प्राणान् । कैः, विषाद्यैः गरलशस्त्रश्वासनिरोधजलाग्निप्रवेशलंघनादिभिः । कस्मात्, कषायावेशतः क्रोधादिपरिणामवशात् ॥ ८ ॥

एवं संयमविनाशहेतुसन्निधाने कायत्यागं समर्थ्येदानीं कालोपसर्गमरणनिर्णयपूर्वकप्रायोपवेशनेन तत्तद्विशिष्टासाफल्यविधापनार्थमाह—

कालेन वोपसर्गेण निश्चित्यायुः क्षयोन्मुखम् ।
कृत्वा यथाविधि प्रायं तास्ताः सफलयेत् क्रियाः ॥ ९ ॥

टीका—सफलयेत् फलवती कुर्यात् साधुः । काः, क्रियाश्चेष्टाः । किंविशिष्टाः, तास्ताः दर्शनिकादिप्रतिमाविषयाः नित्यनैमित्तिकीश्च । किं कृत्वा, यथाविधि विधिना । प्रायं सन्न्यासयुक्तानशनं कृत्वा । किं कृत्वा, निश्चित्य सम्यक् निर्णीय । किं तदायुर्जीवितं । किंविशिष्टं, क्षयोन्मुखं प्रत्यासन्नविनाशं । केन, कालेन स्थितिबन्धच्छेदहेतुना समयेन । वा अथवा उपसर्गेण दुर्निवारायकारिरोगशत्रुप्रहारादिलक्षणेन कृच्छ्रेण सुनिश्चिते मरणे ॥ ९ ॥

स्वाराधनापरिणतया कायत्यागे मुक्ति करस्थेत्युपदेशार्थमाह–

देहादिवैकृतैः सम्यड् निमित्तैस्तु सुनिश्चिते ।
मृत्यावाराधनामग्नमतेर्दूरे न तत्पदम् ॥ १० ॥

टीका—नास्ति । किं, तदशरीरताप्राप्तिलक्षण पद । क्व, दूरे विप्रकर्षे । कतिपयभवलभ्य निर्वाणमित्यर्थ । कस्य, आराधनामग्नमते निश्चयाराधना परिणतमनस पुस । क्व सति, मृत्यौ । किंविशिष्टे, सुनिश्चिते । कै, देहादिवैकृतै शरीरस्वशीलादिविकृतिभि स्वस्थातुरारिष्टैरित्यर्थ । न केवल तै. सम्यड् निमित्तैश्च समीचीनभाविशुभाशुभज्ञानोपायैश्च कणपिशाचिकादिविद्याज्योतिषोपश्रुतिशकुनादिभि ॥ १० ॥

उपसर्गमरणोपनिपाते प्रायविधिमाह–

भृशापवर्तकवशात् कदलीघातवत्सकृत् ।
विरमत्यायुपि प्रायमविचारं समाचरेत् ॥ ११ ॥

टीका—समाचरेत्सम्यक्कुर्यान्मुमुक्षु । किं, प्राय । किंविशिष्टमविचार विचरण नानागमनमर्हादिनानाप्रकारप्रवृत्तिपरिणमन विचारस्तेन रहित प्रायं भक्तप्रत्याख्यान सार्वकालिकमन्यास शुद्धस्वात्मध्यानपरत्वमित्यर्थ । क्व सत्यायुपि भवधारणकारणे कर्मणि । कि कुर्वति, सकृदक्रमेण विरमत्यपवर्तमाने नश्यति । कस्मात्, भृशापवर्तकवशात् आगाढापमृत्युकारणसामर्थ्यात् । किंवत्कदलीघातवत् छिद्यमानकदलीकाण्डे यथा ॥ ११ ॥

स्वपाकच्युत्या स्वय पातोन्मुखे देहे सल्लेखना विधेयेत्युपदिशति–

क्रमेण पक्त्वा फलवत् स्वयमेव पतिष्यति ।
देहे प्रीत्या महासत्त्व कुर्यात्सल्लेखनाविधिम् ॥ १२ ॥

टीका—कुर्यात्कोऽसौ, महासत्त्व अनिवार्यधैर्यवीर्य । क, सल्लेखनाविधिं । कया, प्रीत्या प्रमोदेन । क्व सति, देह । कि करिष्यति, पतिष्यति विनाशमेष्यति सति । केन, स्वयमेव कारणान्तरमन्तरेणैव । किं कृत्वा, पक्त्वा परिणम्य पतनयोग्यतामासाद्य । केन, क्रमेण कालानुपूर्व्या । किंवत्फलवत्

वृक्षफलेन तुल्यं । पातोन्मुखकायलिंगं यथा-" प्रतिदिवसं विजहद्बलमुज्झद् भुक्तिं त्यजत्प्रतीकारं । वपुरेव नृणां निगदति चरमचरित्रोदयं समयम् "॥१२॥

कायनिर्ममत्वभावनाविधिमाह–

जन्ममृत्युजरातङ्काः कायस्यैव न जातु मे ।
न च कोऽपि भवत्येष ममेत्यङ्गेऽस्तु निर्ममः ॥ १३ ॥

टीका—अस्तु समाधिमरणार्थी भवतु । किंविशिष्टो, निर्ममो ममेदमिति सङ्कल्परहितः । क्व, अङ्गे । कथमित्येवं । भवन्ति । के, जन्ममृत्युजरातङ्काः जन्म च मृत्युश्च जरा च आतङ्कश्च ज्वरादिव्याधिस्ते रोगपुद्गलविवर्तकत्वात्कायस्यैव पुद्गलस्वरूपस्य । न जातु कदाचिदपि । मे शुद्धचिद्रूपमात्रस्यात्मनः । न च नापि भवति । कोऽसावेष काय । किंविशिष्टः, कोऽपि कश्चिदुपकर्ता अपकर्ता वा । कस्य, मम शुद्धचिदानन्दमयस्य ॥ १३ ॥

आहारहापनसमयमाह––

पिण्डो जात्याऽपि नाम्नाऽपि समो युक्त्याऽपि योजितः।
पिण्डोऽस्ति स्वार्थनाशार्थो यदा तं हापयेत्तदा ॥ १४ ॥

टीका—हापयेत्परिचारकादिभिस्त्याजयेत् समाधिमरणोद्यत. । कं, तं पिण्डमाहारं । कदा, तदा तस्मिन्काले । यदा किं, यदा पिण्ड आहारोऽस्ति भवति । किंविशिष्ट, स्वार्थनाशार्थं आहारस्य हि स्वार्थो बलोपचयोजोलक्षणं देहकार्यं, देहस्य च धर्मसिद्धिलक्षणमात्मकार्यं स्वार्थस्य नाशो विनाशोऽर्थ प्रयोजन फल यस्य स तथोक्त. । किंविशिष्ट, समस्तुल्य । कया, जात्या पुद्गलत्वलक्षणया । अपिर्विस्मये आश्चर्यं । यत्सजातीयोऽपि स्वार्थं नाशयति । तथा नाम्ना सञ्ज्ञयाऽपि सम आहारदेहयोरुभयोरपि पिण्डशब्दाभिधेयत्वात् । जातिनामभ्यां साम्येऽपि सति विधिव्यतिक्रमे प्रयुक्तः स्वार्थनाशाय स्यादित्यत्राह–युक्त्या शास्त्रोक्तविधिना । योजितोऽपि प्रयुक्तोऽपि । क, पिण्डे शरीरे ॥ १४ ॥

सल्लेखनाविधिपूर्वकं समाधिमरणोद्यमविधिमाह––

उपवासादिभिः कायं कषायं च श्रुतामृतैः ।
संलिख्य गणमध्ये स्यात् समाधिमरणोद्यमी ॥ १५ ॥

टीका--समाधिमरणोद्यमी साधक गणमध्ये चतुर्विधसङ्घसमक्षे स्यात्। किं कृत्वा, सल्लिख्य सम्यक्कृशीकृत्य। कं, कायं। केभ्यवासादिभिरनशनादिबाह्यतपोविशेषै। कषायं च क्रोधादिकं सल्लिख्य। कैं, श्रुतामृतैः श्रुतज्ञानसुधाभि ॥ १५ ॥

मृत्युकाले धर्मविराधनाराधनयो फलविशेषमाह--

आराद्धोऽपि चिरं धर्मो विराद्धो मरणे मुधा।
सत्वाराद्धस्तत्क्षणेंऽहः क्षिपत्यपि चिरार्जितम् ॥ १६ ॥

टीका-भवति। कोऽसौ,धर्म। किंविशिष्टो,मुधा निष्फल। किंविशिष्ट सन्, विराद्ध अतिवर्तित। क्व, मरणे मृत्युसमये। किंविशिष्टोऽपि, आराद्धोऽपि आराधितोऽपि। कियच्चिरं दीर्घकाल। स तु धर्मस्तत्क्षणे मरणसमये। आराधितो भावित। क्षिपति निराकरोति। किं तदह पाप। किंविशिष्ट, चिरार्जितमपि असंख्यातभवकोट्युपार्जितमपि ॥ १६ ॥

चिरकालभावितश्रामण्यस्यापि विराध्य म्रियमाणस्याकीर्तिदुष्परिपाकां स्वार्थक्षतिं दर्शयति---

नृपस्येव यतेर्धर्मो चिरमभ्यस्तिनोऽस्त्रवत्।
युधीव स्खलितो मृत्यौ स्वार्थभ्रंशोऽयशःकटुः ॥१७॥

टीका—भवति। कोऽसौ, स्वार्थभ्रंश स्वाभिमतार्थनाश। कस्य, यतेः। कस्येव, नृपस्येव राज्ञो यथा। किंविशिष्टोऽयश कटु अकीर्तिदु खद। किं कुर्वत, स्खलत प्रमाद्यत। कस्मिन्धर्मे। क्व, मत्यौ मरणक्षणे। कस्यामिव, युधीव युद्धसमये यथा। किंविशिष्टस्य, चिरं दीर्घकाले धर्मे अस्त्रवत् शस्त्रे यथा अभ्यस्तिन कृताभ्यासस्य। अभ्यस्तपूर्वमनेनेति विगृह्य श्राद्ध सुप्टोऽनेन देसनेन इन्नन्यय ॥ १७ ॥

ननु सुभावितमार्गस्यापि कस्यचित्समाधिमरणं न दृश्यते, कस्यचित्पुनरभावितमार्गस्यापि तदुपलभ्यते, तदभासीयमिति वदन्तं प्रति श्लोकद्वयमाह-

सम्यग्भावितमार्गोऽन्ते स्याद्देवाराधको यदि।
प्रतिरोधि सुदुर्वारं किञ्चिन्नोदेति दुष्कृतम् ॥ १८ ॥

टीका--स्यादेव अवश्य भवेत्। कोऽसौ, सम्यग्भावितमार्ग सम्यक् सम्पूर्णं चिरं भावितोऽभ्यस्तो मार्गो रत्नत्रयं येन स तथोक्त । किंविशिष्ट स्यात्, अन्ते जन्मप्रान्ते आराधकस्तदा। यदि चेत्नोदेति नोद्भवति। किं तत्, दुष्कृतं पुराकृतमशुभं कर्म। किंविशिष्ट, प्रतिरोधि समाधिप्रतिखण्डक। पुन किंविशिष्टं, सुदुर्धरं यत्नशतेनापि प्रतिषेद्धुमशक्य। पुनरपि किंविशिष्ट, किञ्चिदनिर्दिष्टनामक। उक्तं च-मृतिकाले नरा हन्त सन्तोऽपि चिरभाविता। पतन्ति दर्शनादिभ्य प्राक्कृताशुभगौरवात्॥ या त्वभावितमार्गस्य कस्याप्याराधना मृतौ। आराधना रत्नत्रयैकाग्रता स्यात्। अयमन्धनिधिलाभो भाक्तिकेऽतिर्यचनाराधनपरे न विष्टम्भो नाभिनिवेष्टव्योऽत्र दुराग्रहो न कर्तव्यो जिनवचनं प्रमाणीकृत्य समाधिमरणाय प्रयतितव्यमित्यर्थ । उक्तं च-पूर्वमभावितयोगो यद्यप्याराधयन्मृतौ कथित् । स्थाणौ निधानलाभो निदर्शनं नैव सर्वत्र ॥ १८ ॥

ननु दूरभव्यस्य व्रतं चरतोऽपि न मुक्ति स्यात्तदलं तद्दवीयस्त्वे व्रतयत्नेनेत्याशंकायां समाधत्ते--

कार्यो मुक्तौ दवीयस्यामपि यत्नः सदा व्रते।
वरं स्वः समयाकारो व्रतान्न नरकेऽव्रतात्॥ १९ ॥

टीका--कार्यं सदा जिनभाक्तिकै कर्तव्य। कोऽसौ, यत्नस्तात्पर्यं। क, व्रते। कस्यां सत्या, मुक्तौ निर्वृतौ। किंविशिष्टायां, दवीयस्या दूरतराया चिरभाविन्यामपि। किं पुनरितरस्या। अत्रोपपत्तिमाह वरं भद्रं भवतु। कोऽसौ, स्वः स्वर्गे समयाकारः मुक्तेर्वाक्कालयापना। कस्मात्, व्रतात् व्रतानुष्ठानार्जितपुण्यविपाकात्। न वरं। कोऽसौ समयाकारः। क नरके नरकादिदुर्गतौ। कस्मादव्रतात् हिंसाद्याचरणार्जितपापविपाकात्॥ १९ ॥

भक्तप्रत्याख्यानयोग्यतामाह--

धर्माय व्याधिदुर्भिक्षजरादौ निष्प्रतिक्रिये।
त्यक्तुं वपुः स्वपाकेन तच्च्युतौ वाऽशनं त्यजेत्॥२०॥

टीका- त्यजेत् प्रत्याख्यायात् श्रावको यमी वा। किं सदशनं भक्त भक्तप्रत्याख्यानं कुर्यादित्यर्थ । किं कर्तुं, त्यक्तुं मोक्तुं। किं तद्वपुः शरीरं। कस्मै,

टीका––समाधिमरणोद्यमी साधकः गणमध्ये चतुर्विधसङ्घसमक्षे स्यात्। किं कृत्वा, संलिख्य सम्यक्कृशीकृत्य। कं, कायं। कैरुपवासादिभिरनशनादिबाह्यतपोविशेषैः। कषायं च क्रोधादिकं संलिख्य। कैः, श्रुतामृतैः श्रुतज्ञानसुधाभिः ॥ १५ ॥

मृत्युकाले धर्मविराधनाराधनयोः फलविशेषमाह––

आराद्धोऽपि चिरं धर्मो विराद्धो मरणे मुधा।
सत्वाराद्धस्तत्क्षणेंऽहः क्षिपत्यपि चिरार्जितम् ॥ १६ ॥

टीका-भवति। कोऽसौ, धर्मः। किंविशिष्टो, मुधा निष्फलः। किंविशिष्टः सन्, विराद्धः अतिचरितः। क्व, मरणे मृत्युसमये। किंविशिष्टोऽपि, आराद्धोऽपि आराधितोऽपि। कियच्चिरं दीर्घकालं। स तु धर्मस्तत्क्षणे मरणसमये। आराधितो भावितः। क्षिपति निराकरोति। किं तदंहः पापं। किंविशिष्टं, चिरार्जितमपि असंख्यातभवकोट्युपार्जितमपि ॥ १६ ॥

चिरकालभावितधर्मस्यापि विराध्य म्रियमाणस्यार्थनिर्दुःस्वार्थभ्रंशं दर्शयति—

नृपस्येव यतेर्धर्मो चिरमभ्यस्तिनोऽस्त्रवत्।
युधीव स्खलितो मृत्यौ स्वार्थभ्रंशोऽयशःकटुः ॥१७॥

टीका––भवति। कोऽसौ, स्वार्थभ्रंशः स्वाभिमतार्थनाशः। कस्य, यतेः। कस्येव, नृपस्येव राज्ञो यथा। किंविशिष्टोऽयशःकटुः अकीर्तिदुःसहः। किं कुर्वतः, स्खलतः प्रमाद्यतः। कस्मिन्धर्मे। क्व, मृत्यौ मरणक्षणे। कस्यामिव, युधीव युद्धसमये यथा। किंविशिष्टस्य, चिरं दीर्घकालं धर्मे अभ्यस्तवत् अस्त्रं यथा अभ्यस्तिन कृताभ्यासस्य। अभ्यसनपूर्वमनेनेति विगृह्य श्राद्धमुप्टोऽनेन वेत्यनेन इन्नन्तस्य ॥ १७ ॥

ननु सुभावितमार्गस्यापि कस्यचित्समाधिमरणं न दृश्यते, कस्यचित्पुनरभावितमार्गस्यापि तदुपलभ्यते, तदनाश्वासमिति वदन्तं प्रति श्लोकद्वयमाह–

सम्यग्भावितमार्गोऽन्ते स्याद्विराराधको यदि।
प्रतिरोधि सुदुर्वारं किञ्चिदोदेति दुष्कृतम् ॥ १८ ॥

टीका--स्यादेव अवश्यं भवेत्। कोऽसौ, सम्यग्भावितमार्गः सम्यक् सम्पूर्णं चिरं भावितोऽभ्यस्तो मार्गो रत्नत्रयं येन स तथोक्तः। किंविशिष्ट स्यात्, अन्ते जन्मप्रान्ते आराधकस्तदा। यदि चेन्नोदेति नोद्भवति। किं तत्, दुष्कृतं पुराकृतमशुभं कर्म। किंविशिष्टं, प्रतिरोधि समाधिप्रतिखण्डकं। पुनः किंविशिष्टं, सुदुर्वारं यत्नशतेनापि प्रतिपेन्द्धुमशक्यं। पुनरपि किंविशिष्टं, किंचिदनिर्दिष्टनामकं। उक्तं च-मृतिकाले नरा हन्त सन्तोऽपि चिरभाविताः पतन्ति दर्शनादिभ्यः प्राक्कृताशुभगौरवात्॥ या त्वभावितमार्गस्य कस्या-प्याराधना मृतौ। आराधना रत्नत्रयैकाग्रता स्यात्। अयमन्धनिधिलाभो भाक्तिकेऽनिर्वचनाराधनपरे न विष्टम्भ्यो नाभिनिवेष्टव्योऽत्र दुराग्रहो न कर्तव्यो जिनवचनं प्रमाणीकृत्य समाधिमरणाय प्रयतितव्यमित्यर्थः। उक्तं च-पूर्वमभावितयोगो यद्यप्याराधयन्मृतौ कश्चित्। स्थाणौ निधानलाभो निदर्शनं नैव सर्वत्र॥ १८॥

ननु दूरभव्यस्य व्रतं चरतोऽपि न मुक्तिः स्याच्चदलं तद्दवीयस्त्वे व्रतयत्नेनेत्यारेकायां समाधत्ते—

कार्यो मुक्तौ दवीयस्यामपि यत्नः सदा व्रते।
वरं स्वः समयाकारो व्रतान्न नरकेऽव्रतात्॥ १९॥

टीका--कार्यं सदा जिनभाक्तिकैः कर्तव्यः। कोऽसौ, यत्नस्तात्पर्यं। क, व्रते। कस्यां सत्या, मुक्तौ निर्वृतौ। किंविशिष्टायां, दवीयस्यां दूरतरायां चिरभाविन्यामपि। किं पुनरितरस्यां। अत्रोपपत्तिमाह वरं भद्रं भवतु। कोऽसौ, स्वः स्वर्गे समयाकारः मुक्तेरर्वाक्कालयापना। कस्मात्, व्रतात् व्रतानुष्ठा-नार्जितपुण्यविपाकात्।-न वरं। कोऽसौ, समयाकारः। क, नरके नरकादिदुर्गतौ। कस्मादव्रतात् हिंसाद्याचरणार्जितपापविपाकात्॥ १९॥

भक्तप्रत्याख्यानयोग्यतामाह—

धर्माय व्याधिदुर्भिक्षजरादौ निष्प्रतिक्रिये।
त्यक्तुं वपुः स्वपाकेन तच्च्युतौ वाऽशनं त्यजेत्॥ २०॥

टीका– त्यजेत् प्रत्याख्यायात् श्रावको यमी वा। किं सदशनं भक्त-प्रत्याख्यानं कुर्यादित्यर्थः। किं कर्तुं, त्यक्तुं मोक्तुं। किं तद्वपुः शरीरं कस्मै,

धर्माय आत्मना सह धर्मं भवान्तरं नेतुं । क्व सति, व्याधिदुर्भिक्षज्वरोपसर्गादौ धर्मध्वंसहेतावुपस्थिते । किंविशिष्टे, निष्प्रतिक्रिये प्रतीकाररहिते । तथा स्वपाकेन स्वयं कालक्रमेण परिणम्यायुःक्षये । तच्च्युतौ तस्य वपुषः च्यवने । चशब्दात् घोरोपसर्गादिना च्याव्यमाने च सम्यग्ज्ञानं त्यजेत् । एतेन शरीरच्यवनच्यावनविषयं त्रिविधं भक्तप्रत्याख्यानमरणमन्वाख्यातं बोद्धव्यम् ॥२०॥

समाधिमरणार्थं शरीरोपस्कारविधिमाह—

अन्नैः पुष्टो मलैर्दुष्टो देहो नान्ते समाधये ।
तत्कर्श्यो विधिना साधोः शोध्यश्चायं तदीप्सया ॥२१॥

टीका—न भवति । कोऽसौ, देह । कस्मै, समाधये समाध्यर्थं । क्व, अन्ते मरणसमये । किंविशिष्टो, अन्नैराहारैः पुष्ट उपचितो मलैश्च वातपित्तकफैर्दुष्टोऽविकृत । यत एव ततस्मात् । कर्श्यं कृशीकर्तव्योऽयं देह । कस्य, साधो सिद्धिसाधकेनेत्यर्थं । केन, विधिना सल्लेखनाविधानेन । शोध्यश्च वाग्यविरेचनवस्तिकर्मादिना निष्काशितजठरमल कर्तव्य । कया, तदीप्सया समाधिवाञ्छया ॥ २१ ॥

कषायकर्शनं विना कायकर्शनस्य नैष्फल्यं समर्थयते—

सल्लेखनाऽसंलिखतः कषायान्निष्फला तनोः ।
कायोऽजडैर्दण्डयितुं कषायानेव दण्ड्यते ॥ २२ ॥

टीका—भवति । काऽसौ, सल्लेखना कृशीकरण । कस्यास्तनो शरीरस्य । किंविशिष्टा, निष्फला । किं कुर्वन्, असंलिखत कृशानकुर्वत साधो । कान्, कषायान् क्रोधादीन् । यतो दण्ड्यते परिकृश्यते । कोऽसौ, काय कैरजडै बुधै । किं कर्तुं दण्डयितुं निगृहीतुं । कान्, कषायानेव न स्वरूपादिघातात् ॥ २२ ॥

आहारशमनसमं कषायदुर्जयत्वं प्रकाश्य भेदज्ञानवतामेव तज्जयत्वमाह—

अन्धोमदान्धैः प्रायेण कषायाः सन्ति दुर्जयाः ।
ये तु स्वाङ्गान्तरज्ञानात्तान् जयन्ति जयन्ति ते ॥ २३ ॥

टीका—सन्ति भवंति। के, कषायाः। किंविशिष्टा, दुर्जयाः जेतुमशक्या। कैरन्धोमदांधैः अन्धम आहारस्य मंदः क्षीणता आहारकृतो मनोदर्प इत्यर्थः। अन्धोमदेन अन्धाः स्वपरतत्त्वज्ञानविकला अन्धोमदान्धास्तैः। केन, प्रायेण बाहुल्येन। कदाचिदैवदुर्योगात्तैरपि कषाया जीयन्ते इत्येवमर्थमेतत्। ये तु ये पुरुषा पुनस्तान् कषायान् जयन्ति। कस्मात्स्वाङ्गान्तरज्ञानात् स्व आत्मा अङ्गं देहः स स्वाङ्गं स्वाङ्गे स्वाङ्गयोरन्तरं भेदः स्वाङ्गान्तरं तस्य ज्ञानमहमन्यो देहोऽन्य इति बोधस्तस्मात् ते पुरुषा जयन्ति सर्वोत्कर्षेण वर्तन्ते। जगदुपरि स्फुरन्तीत्यर्थः ॥ २३ ॥

एवं देहाहारत्याग विधायेदानीमीहितत्यागेन स्वात्मसमाधये क्षपकं प्रेरयन्नाह—

गहनं न तनोर्हानं पुंसः किन्त्वत्र संयमः।
योगानुवृत्तेर्व्यावर्त्य तदात्माऽऽत्मनि युज्यताम् ॥२४॥

टीका—न भवति। किं तत्, हानं त्यजनं। कस्यास्तनोः शरीरस्य। किंविशिष्टं, गहनं कष्टं दुष्करमित्यर्थः। कस्य, पुंसः पुरुषस्य। काभिश्चित्स्त्रीभिरपि प्रियविप्रयोगादौ क्रियमाणस्य शरीरत्यजनस्य दृश्यमानत्वात्। किं तु भवति। कोऽसौ, संयम। किंविशिष्टो, गहन। क, अत्र तनुहाने क्रियमाणे। यत एवं ततस्मायुज्यता समाधीयतां क्षपकेण। कोऽसावात्मा कस्मिन्नात्मनि। किं कृत्वा, व्यावर्त्य निवर्त्य। कस्या, योगानुवृत्तेः मनोवाक्कायव्यापारानुगमात्। भावतो निजनिजव्यापारेषु मनोवाक्कायान प्रवर्त्येत्यर्थ ॥ २४ ॥

यतिद्वयस्य समाधिमरणफलविशेषमभिधत्ते—

श्रावकः श्रमणो वाऽन्ते कृत्वा योग्यां स्थिराशयः।
शुद्धस्वात्मरतः प्राणान् मुक्त्वा स्यादुदितोदितः ॥ २५ ॥

टीका—श्रावक. श्रमणो वा स्यात्। किंविशिष्ट, उदितोदित त्रिविधाभ्युदयानुभवपूर्वकनि श्रेयसभाग्भवेत्। किं कृत्वा, मुक्त्वा त्यक्त्वा। कान्, प्राणान्। कथम्भूत सन्, शुद्धस्वात्मरत. निर्मलनिजचिद्रूपलीनः। कथम्भूतो भूत्वा, स्थिराशय निश्चलचित्त। क, अन्ते प्रत्यासन्ने मरणे।

किं कृत्वा, कृत्वा। का, योग्या प्रायार्थीन्यादिना प्रबन्धेन वक्ष्यमाण परिकर्म ॥ २५ ॥

निर्यापकबलाज्ञावितात्मन समाधिमरणेऽन्तरायाभाव दर्शयति—

समाधिसाधनचणे गणेशे च गणे च न ।
दुर्दैवेनापि सुकरः प्रत्यूहो भावितात्मनः ॥ २६ ॥

टीका—न भवति। कोऽसौ, *प्रत्यूहो* विघ्न। किंविशिष्ट, *सुकर* सुखेन कर्तुं शक्य। केन, दुर्दैवेन प्राक्कृताशुभकर्मणा। किं पुन प्रतिपक्षादिनेत्यपि शब्दार्थ। कस्य, भावितात्मन भावितात्मान समाधेश्चालयितु दुर्दैवमपि न शक्नोतीत्यर्थ। क सति, *गणेशे* निर्यापकाचार्ये च। *गणे* च सङ्घे। किंविशिष्टे, समाधिसाधनचणे समाधे रत्नत्रयैकाग्रताया साधन सम्पादन तेन वित्ते अनश्च क्षपकाणां समाधिसाधनेन प्रसिद्ध इत्यर्थ ॥ २६ ॥

श्लोकद्वयेन समाधिमरणमाहात्म्य स्तुवन्नाह—

प्राग्जन्तुनाऽमुनाऽनन्ताः प्राप्तास्तद्भवमृत्यवः ।
समाधिपुण्यो न परं परमश्चरमक्षणः ॥ २७ ॥

टीका—प्राप्ता। के, तद्भवमृत्यव भवान्तरप्राप्तिरनन्तरोपश्लिष्टपूर्वभवविगमन तद्भवमरणमाख्यायते। कियन्तोऽनन्ता। यन, अमुना संसारिणा। जन्तुना जीवेन। कथ, प्राक् इत पूर्वं। पर केवल न प्राप्त। कोऽसौ, चरमक्षण भवपर्यायविगमान्त्यसमय। किंविशिष्ट, समाधिपुण्य रत्नत्रयैकाग्रतया पवित्र। ससारकारणकर्मनिर्मूलनसमर्थत्वात्परम इतरत्तरक्षणेभ्य उत्कृष्ट ॥ २७ ॥

परं शंसन्ति माहात्म्यं सर्वज्ञाश्चरमक्षणे ।
यस्मिन्समाहिता भव्या भञ्जन्ति भवपञ्जरम् ॥ २८ ॥

टीका—परमुत्कृष्ट। माहात्म्य महिमान। सर्वज्ञा शसन्ति स्तुवन्ति। क, चरमक्षणे। यस्मिन् यत्र चरमक्षणे। समाहिता समाधि गता भव्या। भञ्जन्ति विघटयन्ति। किं तत्, भवपञ्जर भव ससार पञ्जरमिव शुकादिपक्षिण इव जीवस्य पारतन्त्र्यनिमित्तत्वात् ॥ २८ ॥

संन्यासार्थं क्षेत्रविशेषस्वीकारमाह—

प्रायार्थी जिनजन्मादि स्थानं परमपावनम् ।
आश्रयेत्तदलाभे तु योग्यमर्हद्गृहादिकम् ॥ २९ ॥

टीका—आश्रयेदुपसर्पेत । कोऽसौ, प्रायार्थी संन्यासानशनकाम । किं तत्, जिनजन्मादि स्थान । किंविशिष्ट, परमपावन पर पवित्रीकरण । तत्र जन्मस्थान वृषभनाथस्यायोध्या । निष्क्रमणस्थान सिद्धार्थवन । ज्ञानस्थान शकटमुखोद्यान । निर्वाणस्थान कैलास । एवमन्येषामपि जन्मादिस्थानानि यथागममधिगम्यानि । तदलाभे तु तस्याप्राप्तौ पुनराश्रयेदसौ । किं तत्, आर्हद्गृहादिक जिनचैत्यालयमयताश्रमादिक । किंविशिष्ट, योग्य समाधि साधनसमर्थम् ॥ २९ ॥

तीर्थंप्रति चलितस्यावान्तरमार्गेऽपि मृतस्याराधकत्व दर्शयति—

प्रस्थितो यदि तीर्थाय म्रियतेऽवान्तरे तदा ।
अस्त्येवाराधको यस्माद्भावना भवनाशिनी ॥ ३० ॥

टीका—यदि म्रियते ममाप्यर्थी । क, अवान्तरे स्वस्थानतीर्थस्थानयोरन्तराले । उपलक्षणमेतत् । तेन नियापकाचार्यमरणमप्याराधक स्यादेव । किंविशिष्ट सन् प्रस्थित गन्तुमारब्ध । कस्मै, तीर्थाय जिनजन्मादि स्थानाय निर्यापकाचार्याय वा । तदा अस्त्येव अवश्य भवत्यसौ । किंविशिष्ट, आराधक यस्मात्कारणाद्भवति । काऽसौ, भावना समाधिसाधनप्रणिधान । किंविशिष्टा, भवनाशिनी ससारनिरसना ॥ ३० ॥

तीर्थं गमिष्यन् क्षमापन क्षमण च कुर्यादित्युपदिशति—

रागाद् द्वेषान्ममत्वाद्वा यो विराद्धो विराधकः ।
यश्च तं क्षमयेत्तस्मै क्षाम्येच्च त्रिविधेन सः ॥ ३१ ॥

टीका—क्षमयेत् क्षमा कारयत्स तीर्थं जिगमिषु । क, त । य किं, यो विराद्धो दु खे स्थापित । कस्मात्, रागात् स्नेहात् द्वेषात् क्रोधात् ममत्वात् ममकाराद्वा । यश्च रागादेर्विराधक स्वस्य वैमनस्योत्पादक सम्पन्नस्तस्मै । क्षाम्येच्च क्षमां कुर्यात्स । केन त्रिविधेन मनोवाक्कायेन ॥ ३१ ॥

क्षमणकरणाकरणयो फलमाह —

तीर्णो भवार्णवस्तैर्ये क्षाम्यन्ति क्षमयन्ति च ।
क्षाम्यन्ति न क्षमयतां ये ते दीर्घाजवञ्जवाः ॥ ३२ ॥

टीका—तै पुम्भि । तीर्णो लङ्घित । कोऽसौ, भवार्णव ससाराब्धि । ये कि, ये क्षाम्यन्ति विराधकाय क्षमा कुर्वन्ति । ये च क्षमयन्ति विराद्ध क्षमा कारयन्ति । ये पुन न क्षाम्यन्ति । केषा क्षमयता क्षमा कारयता । ते भवन्ति । किंविशिष्टा, दीर्घाजवञ्जवा चिरससारा ॥३२॥

क्षपकस्यालोचनाविधिमाह—

योग्यायां वसतौ काले स्वागः सर्वं स सूरये ।
निवेद्य शोधितस्तेन निःशल्यो विहरेत्पथि ॥ ३३ ॥

टीका—विहरेत् प्रवर्तेत । कोऽसौ, स क्षपक । क्व पथि रत्नत्रये । किंविशिष्ट सन्, नि शल्यो मायादिशल्यरहित । कथम्भूतो भूत्वा, शोधित प्रतिक्रमणेन प्रायश्चित्तादिविधिना निष्कासितदोष । केन, तेन कर्त्रा । किं कृत्वा, निवेद्य आलोच्य । किं तत्स्वाग आत्मनो व्रताद्यतीचार । किंविशिष्ट सर्वं । कस्मै, सूरये निर्यापकाचार्याय । क्व, वसतौ स्थाने । किंविशिष्टायां, योग्यायां आलोचनोचितायां । तथा कालेऽपि योग्ये ॥ ३३ ॥

सस्तरारोहणविधिमाह—

विशुद्धिसुधया सिक्तः स यथोक्तं समाधये ।
प्रागुदग्वा शिरः कृत्वा स्वस्थः संस्तरमाश्रयेत् ॥३४॥

टीका—आश्रयेत् आरोहयेत्स । क, सस्तर । किंविशिष्ट, यथोक्त येन प्रकारेणागमे कथित । कस्मै, समाधये समाधिनिमित्त । किंविशिष्ट सन्, स्वस्थ निर्व्याक्षेप । किं कृत्वा, कृत्वा । किं तच्छिर शीर्षं । क्व, प्राक् पूर्वस्या दिशि । उदग्वा उत्तरस्या । कथम्भूतो भूत्वा, सिक्तो निर्वापित । कया, विशुद्धिसुधया विशुद्धिर्मन शरीरनैर्मल्य प्रायश्चित्तविधान वा सैव सुधा अमृत तया ॥ ३४ ॥

संस्तरारोहणकाले महाव्रतमर्थयमानस्यार्यस्याचेलक्यलिङ्गविधानार्थमाह—

त्रिस्थानदोषयुक्तायाप्यापवादिकलिङ्गिने ।
महाव्रतार्थिने दद्याल्लिङ्गमौत्सर्गिकं तदा ॥ ३५ ॥

टीका—दद्याद्वितरेत् निर्यापकाचार्यः । किं तल्लिङ्गं अचेलक्यादि चतुर्विधं । किंविशिष्टमौत्सर्गिकं उत्सर्गे सकलपरिग्रहत्यागे भवं नाग्न्यमित्यर्थः । क्व, तदा संस्तरारोहणकाले । कस्मै, आपवादिकलिङ्गिने सग्रन्थलिङ्गाय आर्यायेत्यर्थः । किंविशिष्टाय, त्रिस्थानदोषयुक्तायापि त्रिस्थानेषु दोषो वृषणयोः कुरण्डला-तिलम्बमानत्वादिर्मेहने च चर्मरहितत्वातिदीर्घत्वासकृदुत्थानशीलत्वादिस्तेन सहितायापि । पुनः किंविशिष्टाय, महाव्रतार्थिने महाव्रतं याचमानाय ॥ ३५ ॥

उत्कृष्टस्यापि श्रावकस्योपचरितायापि महाव्रतायाप्रभुत्वमाह—

कौपीनेऽपि समूर्च्छत्वान्नार्हत्यार्यो महाव्रतम् ।
अपि भाक्तममूर्च्छत्वात् साटकेऽप्यार्यिकाऽर्हति ॥ ३६ ॥

टीका—नार्हति न गृहीतुमुचितो भवति । कोऽसावार्यः परमोत्कृष्टश्रावकः । किं तन्महाव्रतं । किंविशिष्टमपि, भाक्तमुपचरितमपि । कुतः, समूर्च्छत्वा-न्ममेदमितिपरिग्रहाविष्टत्वात् । क्व, कौपीने गुह्यप्रच्छादनवस्त्रखण्डमात्रे । अपि-र्विस्मये । आर्यिका पुनरर्हति । भाक्तमेव महाव्रतं । कस्मादमूर्च्छत्वात् । क्व, साटकेऽपि । संस्तरारोहणकालादन्यदातनमेतद्विधानं प्रसङ्गादन्वाख्यातम् ॥ ३६ ॥

प्रशस्तमुष्कमेहनस्य सर्वस्य सर्वत्र प्रशस्तमौत्सर्गिकमपवदन्नाह—

न्हीमान्महर्द्धिको यो वा मिथ्यात्वप्रायबान्धवः ।
सोऽविविक्ते पदे नाग्न्यं शस्तलिङ्गोऽपि नार्हति ॥ ३७ ॥

टीका—स श्रावको नार्हति । किं तन्नाग्न्यं नग्नत्वं । क्व, पदे स्थाने । किंविशिष्टे, अविविक्ते बहुजने । एकान्तस्थाने सोऽप्यर्हतीत्यर्थः । किंविशिष्टो-ऽपि, शस्तलिङ्गोऽपि लिङ्गं पुँस्त्वचिह्नं मुष्कमेहनमित्यर्थः शस्तं प्रशस्तं प्रागु-क्तदोषवियुक्तं लिंगं यस्य स शस्तलिंग । यः किं, यो न्हीमान् । लज्जावान् । महर्द्धिकः श्रीमान् । मिथ्यात्वप्रायबान्धवो वा भवति । मिथ्यात्वं प्रायेण बाहुल्येन येषां ते मिथ्यात्वप्राया बान्धवा ज्ञातयो यस्य स तथोक्तः ॥ ३७ ॥

संस्तरारोहणसमये स्त्रिया लिङ्गविकल्पमतिदिशन्नाह—

यदौत्सर्गिकमन्यद्वा लिङ्गमुक्तं जिनैः स्त्रियाः ।
पुंवत्तदिष्यते मृत्युकाले स्वल्पीकृतोपधेः ॥ ३८ ॥

टीका—यल्लिङ्गमौत्सर्गिकमन्यद्वा यदापवादिकं स्त्रिया अभिहितं तन्मृत्युकाले तस्याः स्वल्पीकृतोपधेः विविक्तवसत्यादिसम्पत्तौ सत्यां वस्त्रमात्रमपि त्यजन्त्या श्रुतज्ञैरिष्यते अभिमन्यते । कथमिव, पुंवत् । अयमर्थः । पुंसो यदौत्सर्गिकलिङ्गस्य मुख्यमौत्सर्गिकमेव लिङ्गमिष्यते आपवादिकलिङ्गस्य चानन्तरमेव व्याख्यातप्रकारं, तदा योषितोऽपि ॥ ३८ ॥

मुमुक्षोर्लिङ्गग्रहत्यागेन स्वद्रव्यग्रहपरत्वमुपदिशति—

देह एव भवो जन्तोर्यल्लिङ्गं च तदाश्रितम् ।
जातिवत्तद्ग्रहं तत्र त्यक्त्वा स्वात्मग्रहं विशेत् ॥ ३९ ॥

टीका—यद्यस्माज्जन्तोर्जीवस्य भवः संसारो भवति । कोऽसौ, देह एव न क्षेत्रादिकं । यच्च लिंगं नाग्न्यादिकं भवति । किंविशिष्टं, तदाश्रितं देहमवष्टभ्य । किंवत्, जातिवत् ब्राह्मणत्वादिजातिर्यथा । ततस्मात्तत्र लिंगे । जाताविव ग्रहमभिनिवेशं त्यक्त्वा विशेत् प्रविशेत् साधकः । कं, स्वात्मग्रहं स्वशुद्धचिद्रूपनिबन्धं ॥ ३९ ॥

परद्रव्यग्रहस्य बन्धहेतुत्वात्तत्प्रतिपक्षभावनामुपदिशति—

परद्रव्यग्रहेणैव यद्बद्धोऽनादिचेतनः ।
तत्स्वद्रव्यग्रहेणैव मोक्ष्यतेऽतस्तमावहेत् ॥ ४० ॥

टीका—यद्यस्मात् । आत्मा परद्रव्यस्य शरीरादेर्ग्रहेण निर्बन्धेनैवानादिबद्धो ज्ञानावरणादिकर्मपारतन्त्र्यमापन्नः । ततस्मात्स्वद्रव्यग्रहेणैव शुद्धस्वात्माभिनिवेशेनैव । मोक्ष्यते मुक्तो भविष्यति । यत एवं ततः एतस्मात्कारणात् । तं स्वद्रव्यग्रहमावहेत्कुर्यान्मुमुक्षुः ॥ ४० ॥

शुद्धिविवेकप्राप्तिपूर्वकं समाधिमरणं स्तौति—

अलब्धपूर्वं किं तेन न लब्धं येन जीवितम् ।
त्यक्तं समाधिना शुद्धिं विवेकं चाप्य पञ्चधा ॥ ४१ ॥

टीका—तेन महाभव्येन। किमलब्धपूर्वमनादिकालमप्राप्तं सम्यक्त्वसह-चारि महाभ्युदयादिकं न लब्धं ? तत्सर्वं प्राप्तमित्यर्थः। येन जीवितं समाधिना रत्नत्रयैकाग्रतया त्यक्तं। किं कृत्वा, पञ्चया पञ्चप्रकारां शुद्धिं पञ्चप्रकारं च विवेकमाप्य प्राप्य ॥ ४१ ॥

बहिरंगान्तरंगविषयभेदात्पञ्चविधां शुद्धिमाह—

शय्योपध्यालोचनान्नवैयावृत्त्येषु पञ्चधा ।
शुद्धिः स्यात् दृष्टिधीवृत्तविनयावश्यकेषु वा ॥ ४२ ॥

टीका—स्याद्‌सौ शुद्धिः। कतिधा, पञ्चधा। केषु, शय्यादिषु विषयेषु। तत्र शय्या वसतिसंस्तरौ। उपधिः संयमसाधनं। आलोचना गुरवे दोषनिवेदनं। अन्नं चतुर्विधाहारः। वैयावृत्त्यं परिचारकैः क्रियमाणं पादमर्दनादिकं। तेषु पञ्चसु शुद्धिः प्राणेन्द्रियसंयमेन प्रवृत्तिरेषा बाह्या। इयं त्वन्तरङ्गा पञ्चधा शुद्धिः स्यात्। याऽसौ दृष्ट्यादिषु पञ्चसु। दृष्टौ दर्शने धियां ज्ञाने, वृत्ते चारित्रे, विनये प्रश्रये, आवश्यके सामायिकादिषट्काचरणे च निरतिचारतया प्रवृत्तिः ॥ ४२ ॥

शुद्धिवन्मतद्वयेन पञ्चधा विवेकमाह—

विवेकोऽक्षकषायाङ्गभक्तोपधिषु पञ्चधा ।
स्याच्छय्योपधिकायान्नवैयावृत्यकरेषु वा ॥ ४३ ॥

टीका—विवेकः आत्मनः पृथग्भावः साध्यवसायः पञ्चधा स्यात्। केषु, अक्षादिषु विषयेषु। तत्रेन्द्रियेभ्यः कषायेभ्यश्चात्मनः पृथक्चिन्तनं द्विविधो भावविवेकः। द्रव्यविवेकस्तु शरीराहारसंयमोपकरणेभ्यः स्वस्य पृथक्चिन्तनेन त्रिविधः। तमेव मतान्तरेणाह—शय्येत्यादि शय्यादयः प्राग्व्याख्याताः तेभ्यः पृथक्चिन्तनेन कैश्चिद्विवेकः पञ्चधोक्तः ॥ ४३ ॥

निश्चेलसचेलयोर्महाव्रतभावनाविशेषमाह—

निर्यापके समर्प्य स्वं भक्त्यारोप्य महाव्रतम् ।
निश्चेलो भावयेदन्यस्त्वनारोपितमेव तत् ॥ ४४ ॥

निदानमस्मात्तपस सुदुश्चराज्जन्मान्तरे इन्द्रश्चक्रवर्ती धरणेन्द्रो वा स्यामहमित्येवमाद्यनागताभ्युदयाकांक्षा ॥ ४५ ॥

एव सस्तरारूढस्य क्षपकस्य निर्यापकाचार्य एतत्कुर्वेद कुर्यादित्याह—

यतीन्नियुज्य तत्कृत्ये यथार्हं गुणवत्तमान् ।
सूरिस्तं भूरि संस्कुर्यात् स ह्यार्याणां महाक्रतुः ॥४६॥

टीका—सस्कुर्यात् रत्नत्रयसस्कारयुत कुर्यात् । कोऽसौ, सूरि । क, त क्षपक । कथ, भूरि बहु । कि कृत्वा, नियुज्य अधिकृत्य । कान्, यतीन् साधून् । क, तत्कृत्ये आराधकस्यामर्शनादिशरीरकार्ये विघ्नविनिवारणे धर्मकथाया भक्तपानतल्पशोधनमलोत्सर्जनादौ च । कथ, यथार्हं यथायोग्य । किंविशिष्टान्, गुणवत्तमान् मोक्षकारणगुणातिशयशालिन । हि यस्मात् क्षपकसमाधिसाधनविधिरार्याणां यतीनां महाक्रतु परमयज्ञ स्यात् ॥ ४६ ॥

क्षपकस्याहारविशेषप्रकाशनात् भोजनासक्तिनिषेधार्थमाह—

योग्यं विचित्रमाहारं प्रकाश्येष्टं तमाशयेत् ।
तत्रासजन्तमज्ञानाज्ज्ञानाख्यानैर्निवर्तयेत् ॥ ४७ ॥

टीका—आशयेद्भोजयेत्सूरि । क, क्षपक । क, इष्ट किंचित्सर्वं वा क्षपकेणाकाङ्क्ष्यमाणमाहार । किं कृत्वा, प्रकाश्य दर्शयित्वा कमाहार । किंविशिष्ट, योग्य कल्प्य । पुन किंविशिष्ट, विचित्र नानाप्रकार कश्चिद्धि भाज्यविशेषान् दृष्ट्वा तीर प्राप्तस्य कि ममैभिरिति प्राप्तवैराग्य सवेगपरो भवति । कश्चिच्च किमपि भुक्त्वा अपरश्च सर्वं भुक्त्वा तथा भवति । कश्चित्तु तानास्वाद्य तद्रसासक्तिपरो भवति चित्रत्वान्मोहनीयकर्मविलासाना । तत्र चेष्टतया भोज्यमाने भोजने अज्ञानात्तत्त्वानवबोधादासजन्तमासक्ति कुर्वन्त । क्षपक निवर्तयेत् ततो विरमयेत्सूरि । कैर्ज्ञानाख्यानैर्बोधप्रचोदकप्रसिद्धोपाख्यानै ॥ ४७ ॥

नवभि श्लोकैराहारविशेषगृद्धिप्रतिषेधपुर सर तत्परिहारक्रममाह—

भो निर्जिताक्ष विज्ञातपरमार्थ महायशः ।
किमद्य प्रतिभान्तीमे पुद्गलाः स्वहितास्तव ॥४८॥

टीका—भो अहो । निर्जिताक्ष निःशेषवशीकृतहृषीक । भो विज्ञातपरमार्थ अनन्यसाधारणतया निश्चितनिश्चेतव्यवस्तुतत्त्व । भो महायशः सकलदिक्चक्रविसृत्वरकीर्ते आराधकराज । अद्य सम्प्रति । इमे भाजनशयनाद्युपकल्पिता पुद्गला मूर्तपदार्था । किं तव प्रतिभान्ति प्रतिभासन्ते । किंविशिष्टा, स्वहिता आत्मन उपकारका । किंशब्दः प्रश्ने वितर्के आक्षेपे वा ॥ ४८ ॥

किं कोऽपि पुद्गलः सोऽस्ति यो भुक्त्वा नोज्झितस्त्वया ।
न चैष मूर्तोऽमूर्तस्ते कथमप्युपयुज्यते ॥ ४९ ॥

टीका—किमस्ति । कोऽसौ, स कोऽपि कश्चित्पुद्गलो यो नोज्झितो न त्यक्तस्त्वया । किं कृत्वा, भुक्त्वा अनादिकाले इन्द्रियप्रणालिकाभिरुपभुज्य न च नैव । एष पुद्गलो मूर्तो रूपादिमानमूर्त रूपादिरहितस्य ते तव कथमपि केनापि प्रकारेणोपयुज्यते उपकरोति । गगनस्येव तैस्तत्कृतोपकारागोचरत्वात् ॥ ४९ ॥

केवलं करणैरेनमलं ह्यनुभवन्भवान् ।
स्वभावमेवेष्टमिदं भुञ्जेऽहमिति मन्यते ॥ ५० ॥

टीका—केवलं परं मन्यते प्रतिपद्यते । कोऽसौ, भवान् । किं इष्टमभिलषितमिदं पुरोवर्ति वस्त्वहं भुञ्जे अनुभवामीत्येतत् । किं कुर्वन्ननुभवन् भुञ्जानः । कं, स्वभावमेव आत्मपरिणाममेव वस्तुतस्तस्यैवात्मना भोग्यत्वात् । किं कृत्वा, अलं विषयीकृत्य । कमेनं पुद्गलं । कैः, करणैः चक्षुरादीन्द्रियैः ॥ ५० ॥

तदिदानीमिमां भ्रान्तिमभ्यासोन्मिषतीं हृदि ।
स एष समयो यत्र जाग्रति स्वहिते बुधाः ॥ ५१ ॥

टीका—तत्तस्मात्कारणात् । अभ्यास निवारय त्वं । कामिमां प्रतीयमानां भ्रान्तिं अभोग्ये पुद्गले भोग्यबुद्धिं । किं कुर्वतीमुन्मिषतीमुदयोन्मुखीभवन्तीं । क, हृदि हृदये अन्तश्चेतसि । कदा, इदानीमद्य । यतो यत्नेन । कोऽसावेषोऽयं । स समयः कालः । यत्र किं, यत्र यस्मिञ्जाग्रति सावधाना भवन्ति । के, बुधा दृष्टतत्त्वाः । क, स्वहिते ॥ ५१ ॥

अन्योऽहं पुद्गलश्चान्य इत्येकान्तेन चिन्तय ।
येनापास्य परद्रव्यग्रहवेशं स्वमाविशेः ॥ ५२ ॥

टीका–अहमस्मि । किंविशिष्टोऽन्य. पुद्गलाद्भिन्न. । पुद्गलश्चास्ति । किंविशिष्टो ऽन्यो मत्तो भिन्न इत्येतदेकान्तेन सर्वथा चिंतय भावय त्वं । येनात्मपुद्गलयोः पृथक्त्वचिन्तनेन परद्रव्यग्रहवेशमनात्मद्रव्यनिर्बन्धोपयोगमपास्य त्यक्त्वा । स्वमात्मद्रव्यं स्वमाविशेरुपयुञ्जीथा ॥ ५२ ॥

क्वाऽपि चेत्पुद्गले सक्तो म्रियेथास्तद्ध्रुवं चरेः ।
तं कमीभूय सुस्वादुचिर्भटासक्तभिक्षुवत् ॥ ५३ ॥

टीका—क्वापि क्वचिद्भोजनाद्युपयोगिनि पुद्गले । सक्त आसक्तः सन् म्रियेथा प्राणाँस्त्यजेस्त्वं चेत्ततो ध्रुवं निश्चितं चरेर्भक्षयेर्भक्षयिष्यसि त्वं । कं, तं पुद्गलं । किं कृत्वा, कृमीभूय तत्रैव क्षुद्रजन्तुर्भूत्वा स्वमासाद्य । किंवत् , सुस्वादित्यादि । सुस्वादुनि रसनेन्द्रियातिगृद्धिकारिणि चिर्भटे फलविशेषे आसक्तो भिक्षु सन्यासोन्मुख संयतो यथा ॥ ५३ ॥

किं चाङ्गस्योपकार्यं न न चैतत्तत्प्रतीच्छति ।
तच्छिन्धि तृष्णां भिन्धि स्वं देहाद्रुन्धि दुराश्रवम् ॥५४॥

टीका—किं च अत्यधिकं चोच्यते त्वा प्रति । भवति । किं तदन्नं भोज्यद्रव्यं । किंविशिष्टमुपकारि उपकारकं । कस्याङ्गस्य शरीरस्य । मूर्तेन मूर्तस्यैवोपकार्यत्वदर्शनात् । न च नैव । एतदन्नं । तदङ्ग प्रतीच्छति उपकारकत्वेन गृह्णाति । तत्तस्माच्छिन्धि नाशय त्वं । कां, तृष्णां अन्ने वाञ्छानुबन्धं । तथा भिन्धि भेदेन भावय त्वं । कं, स्वमात्मानं । कस्माद्देहात् । तथा रुन्धि प्रतिबधान त्वं । कं, दुरास्रवं पापकर्मास्रवणकारणम् ॥ ५४ ॥

इत्थं पथ्यप्रथासारैर्वितृष्णीकृत्य तं क्रमात् ।
त्याजयित्वाऽशनं सूरिः स्निग्धपानं विवर्धयेत् ॥ ५५ ॥

टीका—विवर्धयेत्परिपूर्णं दद्यात् सूरि । किं तत्, स्निग्धपानं दुग्धादि । किं कृत्वा, त्याजयित्वा परिहार्य । किं तदशनं कवलाहारं । कस्मात्क्रमात्

क्रमेण शनैः शनैः । किं कृत्वा, वितृष्णीकृत्य अन्ने निवृत्तेच्छं कृत्वा । कं, तं क्षपकं । पथ्यप्रथमाद्यरिहितप्रकाशधारासम्पातैः । कथमित्यमनेन प्रकारेण ॥५५॥

पानं पोढा घनं लेपि ससिक्थं सविपर्ययम् ।
प्रयोज्य हापयित्वा तत् खरपानं च पूरयेत् ॥ ५६ ॥

टीका—पूरयेद्विवर्धयेत्सूरिः । किं तत्खरपानं प्रथमं शुद्धकाञ्जिकादिरूपं पश्चाच्च शुद्धपानीयरूपं। किं कृत्वा, प्रयोज्य परिचारकैर्दापयित्वा। हापयित्वा च त्याजयित्वा क्षपकेण । किं तत्पानं पेयद्रव्यं। कतिधा,षोढा षट्प्रकारं। तदेवाह-घनमित्यादिना। घनं बहुलं दध्यादि । सविपर्ययमितिवचनादच्छं तिन्त्रिकादि-फलरससौवीरकोष्णजलादि । लेपि यद्धस्ततलं लिम्पति तद्विपरीतमलेपि । ससिक्थं सिक्थसहितं पयादि तद्विपरीतमसिक्थं मण्डकादि ॥ ५६ ।

इत्थं च निर्यापकाचार्यः क्षपकं शिक्षयेदिति पड्भिः श्लोकैराह—

शिक्षयेच्चेति तं सेयमन्त्या सल्लेखनेर्यते ।
अतीचारपिशाचेभ्यो रक्षैनामतिदुर्लभाम् ॥ ५७ ॥

टीका—शिक्षयेच्च सूरिरनुशिष्यात्तं क्षपकं । इति वक्ष्यमाणेन प्रकारेण अयं पूर्वोक्तश्च । द्वौ चशब्दौ तुल्यकक्षतां द्योतयतः । खरपानं पूरयेच्च तमिति शिक्षयेच्चेति सम्बन्धः । तदेव शिक्षणमाह-सेयमित्यादि । हे आर्य गुणैर्गुण-वद्भिश्चाश्रीयमाणा मा परमागमे प्रसिद्धा इयं वर्तते । काऽसौ, सल्लेखना । किंविशिष्टा, अन्त्या मरणान्तिकी । कस्य, ते तव । तद्वद्दक्ष पालय त्वमेनां । केभ्य, अतीचारपिशाचेभ्यः अतीचारा जीविताशंसादयः प्रागुक्तास्त एव पिशाचाइछिद्रं प्राप्य प्रभविष्णुत्वात् । किंविशिष्टामेनामतिदुर्लभां आसम्सा-रमप्राप्तपूर्वत्वादत्यन्तं प्राप्तुमशक्यां ॥ ५७ ॥

क्रमेणातिचारपञ्चकपरिहारं शिक्षयन्नाह—

प्रतिपत्तौ सजन्नस्यां मा शंस स्थास्नु जीवितम् ।
भ्रान्त्या रम्यं बहिर्वस्तु हास्यः को नाऽऽयुराशिषा॥५८॥

टीका—मा शंस मा वाञ्छस्व त्वं । किं तज्जीवितं । किंविशिष्टं, स्थास्नु स्थिरतरं । किं कुर्वन्, सजन् आसक्तो भवन् । कस्यामस्यां दृश्यमानायां

प्रतिपत्तौ आचार्यादिभि क्रियमाणे परिचर्यादिविधौ, महर्द्धिके पुरुषैश्च गौरवादरादिके। अत्रोपपत्तिमाह—यता भवति। कि तद्बहिर्वस्तु बाह्यविषयजात। किंविशिष्ट, रम्यमात्मन प्रीणन । कया भ्रान्त्या भ्रमेण । कथ द्वारयो हस नीयो लौकिकपरीक्षकाणा न भवति । कया, आयुराशिषा जीवित मे भूयादित्याशसया । स एष जीवितार्शसाख्योऽतीचार पुनरनूद्योपपत्तिविशेषेण त्याज्यतयोपदिष्ट । एवमुत्तरेऽपि ॥ ५८ ॥

परिहासभयादाशु मरणे मा मतिं कृथाः ।
दुःखं सोढा निहन्त्यँहो ब्रह्म हन्ति मुमूर्षुकः ॥ ५९ ॥

टीका—मा कृथा मा कुरु त्व । का मतिं इच्छा । क, आशु मरणे शीघ्र जीवितच्छेदे । कस्मात्परीषहभयात् दु सहक्षुधादिवेदनाभीत्या । यतो निहन्ति निरद्धास्रव क्षपयति, विपाका त्वात्कर्मणा । कोऽसौ दु ख बाधा सोढा साधुत्वन सक्लेशपरिणामलक्षणेन सहमान । कि तदह पुरार्जितपाप । तथा हति हिनस्ति । कोऽसौ, मुमूर्षुक कुत्सितविधिना मर्तुमिच्छन् । कि तद्ब्रह्म ज्ञान मोक्ष वा । आत्मघातनो दीर्घससारो भवतीत्यर्थ ॥ ५९ ॥

सहपांसुक्रीडितेन स्वं सख्या माऽनुरञ्जय ।
ईदृशैर्बहुशो भुक्तैर्मोहदुर्ललितैरलम् ॥ ६० ॥

टीका—माऽनुरञ्जय मा स्नेहय मा प्रीणय वा त्व । क, स्वमात्मान । केन, सख्या मित्रेण । किंविशिष्टेन सहपांसुक्रीडितेन बालावस्थायां सह मिलित्वा पांसुना रजसा क्रीडित क्रीडन येन स तथोक्त । अता व्यावर्तनार्थमाह—अल पर्याप्त । तव परलोकायतस्य । कैरीदृशैरेवविधैर्मित्रानुरागस्मरणप्रायै परिणामै । किंविशिष्टैर्बहुशोऽनेकशो भुक्तैरनुभूतपूर्वै । पुन किंविशिष्टैर्मोहदुर्ललितैर्मोहनीयकर्मविपाकज यदुरध्यवसायै ॥ ६०॥

मा समन्वाहर प्रीतिविशिष्टे कुत्रचित्स्मृतिम् ।
वासितोऽक्षसुखैरेव बम्भ्रमीति भवे भवी ॥ ६१ ॥

टीका—मा समन्वाहर माऽनुबन्धिनीं कुरु त्वमुत्पद्यमानामेव निवारये त्यर्थ । कां, स्मृति चेतोवृत्तिं । क, कुत्रचित् चक्षुरादीनामन्यतमेनानुभूय-

माने विषये पूर्वं प्रवृत्ते प्रीतिविशिष्टे प्रमोदातिशये, इत्थं मया रम्यकामिन्या- दिकमीक्षितमित्यमालिंगितमित्यादिरूपेण मा स्मृतिसमन्वाहारं कुरुष्वेत्यर्थः। यतो यस्मान्नीति कुटिलं पर्यटति कष्टं परिवर्तते। कोऽसौ, भवी जीवः। क, भवे आजीवञ्जविभावे। किंविशिष्टः सन्, वासितो दृढाहितसंस्कारः। कैर- क्षसुखैरिन्द्रियसुखैरेव नात्मज्ञानसंस्कारैः ॥ ६१ ॥

मा कांक्षीर्भाविभोगादीन् रोगादीनिव दुःखदान्।
वृणीते कालकूटं हि कः प्रसाद्येष्टदेवताम् ॥ ६२ ॥

टीका—मा कांक्षास्तपोमाहात्म्यादिना ममैते भूयासुरिति नाऽभिलष त्वं। कान्, भाविभोगादीन् भाविनो भोगानिष्टविषयान्। आदिशब्देन चाणैश्व- र्यादीन्। किंविशिष्टान्, दुःखदान् दुरन्तदुःखदायकान्। कानिव, रोगादीनिव ज्वरादिव्याधीष्टवियोगप्रभृतीन् यथा। हि यस्मात् कः कश्चित् वृणीते प्रार्थयते। किं तत्कालकूटं सद्यःप्राणहरं विषं। किं कृत्वा, प्रसाद्य वरदानोन्मुखीं कृत्वा। कामिष्टदेवतामभिमतार्थप्रदानसमर्थां देवीं देवं वा ॥ ६२ ॥

क्षपकस्य चतुर्विधाहारसन्न्यासविधिं श्लोकद्वयेनाह—

इति व्रतशिरोरत्नं कृतसंस्कारमुद्वहन्।
खरपानक्रमत्यागात् प्रायेऽयमुपवेक्ष्यति ॥ ६३ ॥
एवं निवेद्य संघाय सूरिणा निपुणेक्षिणा।
सोऽनुज्ञातोऽखिलाहारं यावज्जीवं त्यजेत् त्रिधा॥६४॥ युग्म।

टीका—त्यजेत् कोऽसौ, क्षपकः। कमखिलाहारं चतुर्विधमपि भोजनं। कथं, त्रिधा मनोवाक्कायैः। कियत्कालं, यावज्जीवं। किं कुर्वन्, उद्वहन् प्रकृष्टं धारयन्। किं तद्, व्रतशिरोरत्नं सल्लेखना। तस्या एव सर्वव्रतानां साफ- ल्यसंपादकत्वेनोपरि भ्राजमानत्वाच्चूडामणिरिवाभरणानां। किंविशिष्टं, कृतसं- स्कारं आहितातिशयं। कथमित्यनेन प्रतिपत्तौ सत्रत्रयामित्यादिग्रन्थोक्तप्रका- रेण। किंविशिष्टं सन्निखिलाहारं स त्यजेत्, अनुज्ञातोऽनुमतः। केन, सूरिणा निर्यापकाचार्येण। किंविशिष्टेन, निपुणेक्षिणा निपुणं सूक्ष्मं व्याधिदेशादित- स्वमीक्षते पर्यालोचयतीत्येवंशीलो निपुणेक्षी तेन, व्याधिदेशकालसत्त्वसात्म्यबलप-

रीषहक्षमत्वसंवेगवैराग्यादीनां सूक्ष्मेक्षिकया विचारकेणेत्यर्थः । किं कृत्वा, निवेद्य ज्ञापयित्वा । कस्मै, संघाय चातुर्वर्ण्यश्रमणगणाय । कथमेवं । अयं क्षपक उपवेक्ष्यति निश्चलं स्थास्यति दृढप्रतिज्ञो भविष्यतीत्यर्थः । क्व, प्राये चतुर्विधाहारसंन्यासे । कस्मात्खरपानक्रमत्यागात् खरपानस्य शुद्धोदकमात्रोपयोगस्य क्रमेण शनैः शनैस्त्यागः प्रत्याख्यानं तस्मात् ॥ अत्रायं विधिरार्याद्वयेन—" त्यक्ष्यति सर्वाहारं । यावज्जीवं निरम्बरास्त्रिविधम् । निर्यापकसूरिपर सङ्घाय निवेदयेदेवम् ॥ १ ॥ क्षपयति य क्षपकोऽसौ पिण्ड तस्येति सैयमधनस्य । दर्शयितव्यं नीत्वा सङ्घावसथेषु सर्वेषु " ॥ ६३।६४ ॥

एवमतिशयेन परिषहबाधाक्षमं प्रति चतुर्विधाहारप्रत्याख्यानमुपदिश्ये-दानीमतथाभूतस्य क्षपकस्य पानीयमात्रविकल्पनपूर्वकं त्रिविधप्रत्याख्यानमुपदिश्यँश्चतुर्विधप्रत्याख्यानावसरनिरूपणार्थमाह—

व्याध्याद्यपेक्षयाऽम्भो वा समाध्यर्थं विकल्पयेत् ।
भृशं शक्तिक्षये जह्यात्तदप्यासन्नमृत्युकः ॥ ६५ ॥

टीका—वा अथवा विकल्पयेत् गुरुनियोगेन सेवेतया आतिजानीत क्षपक । किं तदम्भ पानीयं । किमर्थं, समाध्यर्थं । कया, व्याध्याद्यपेक्षया यदि पैत्तिको व्याधिर्वा ग्रीष्मादि कालो वा मरुस्थलादिर्देशो वा पैत्तिकी प्रकृतिर्वा अन्यदप्येवंविधं तृष्णापरिषहोद्रेकासहनकारणं वा भवेत् तदा गुर्वनुज्ञया पानीयमुपयोक्ष्येऽहमिति प्रत्याख्यानं प्रतिपद्येतेत्यर्थ । भृशामत्यर्थं शक्तिक्षये बलनाशे पुनरासन्नमृत्युक प्रत्यासन्नमरण क्षपकस्तदप्यम्भोऽपि जह्यात् प्रत्याख्यायात् ॥ ६५ ॥

तत्कालोचितं क्षपकोपकारि सङ्घस्यावश्यकरणीयमाह—

तदाऽखिलो वर्णिमुखग्राहितक्षमणो गणः ।
तस्याविघ्नसमाधानसिध्द्यै तद्यात्तनूत्सृतिम् ॥ ६६ ॥

टीका—तदा तस्मिन्काले तद्यात्कुर्यात् । कोऽसावखिलः सर्वो गण. सङ्घः । का, तनूत्सृतिं कायोत्सर्गं । कस्यै, अविघ्नसमाधानसिध्द्यै । कस्य, तस्य प्रत्याख्यातचतुर्विधभक्तस्य क्षपकस्य, क्षपकस्योपसर्गो मा भूयत् सिध्यतु चाराधनेत्येवमर्थं । किंविशिष्ट. सन्, वर्णिमुखग्राहितक्षमणः वर्णिनो

महाधारिणो मुखेन माहितो ज्ञापितो यथाकथञ्चित्कृतानपराधान् मम प्रमध्वमहं च भवत्कृतांस्तान् क्षम्ये इति क्षमण य स तथोक्त । एतच्च निवेद्य सधायेति प्रागुक्तमेव विशेष्य पुनरुक्तम् ॥ ६६ ॥

एवमाराधनापताकाग्रहणोद्यतस्य क्षपकस्य निर्यापकाः किं कुर्युरित्याह—

तततो निर्यापकः कर्णे जपं प्रायोपवेशिनः ।
दद्युः संसारभयदं प्रीणयन्तो वचोऽमृतैः ॥ ६७ ॥

टीका—ततो यथोक्तकरणीयकारणानन्तर । दद्यु सम्पादयेयु । निर्यापका समाधिविधायिनो मुनय । क, जप । किंविशिष्ट, संसारभय ससारभय संवेगमुपलक्षणान्निर्वेद च ददान । क्व, कर्णे श्रुतिमार्गे । कस्य प्रायोपवेशिन सन्यासिन । किं कुर्वन्त, प्रीणयन्त सन्तर्पयन्त । कैर्वचोऽमृतै पीयूषसमैर्वाक्यै ॥ ६७ ॥

अथातो निर्यापकाचार्यकार्यां क्षपकस्य महतीमनुशिष्टिमुत्तरत्र प्रबन्धेनोपदिशति—

मिथ्यात्वं वम सम्यक्त्वं भजोर्जय जिनादिषु ।
भक्तिं भावनमस्कारे रमस्व ज्ञानमाविश ॥ ६८ ॥

टीका—भो आराधकराज वम नि शेषय त्व । किं तन्मिथ्यात्व विपरीताभिनिवेश । तथा भज भावय त्व । किं त सम्यक्त्व तत्त्वार्थश्रद्धान । तथा ऊर्जय बलवतीं जीवन्तीं वा कुरु त्व । कां, भक्तिं । केषु जिनादिषु अर्हदादिषु परमेष्ठिषु तच्चैत्येषु व्यवहारनिश्चयरत्नत्रये च । तथा रमस्व रतिं कुरु त्व भावनमस्कारे अर्हदादिगुणाना सानुरागानुध्याने । तथा आविश उपयुङ्क्ष्व त्व। किं तत्, ज्ञान बाह्यमाध्यात्मिक च तत्त्वबोधम् ॥ ६५ ॥

महाव्रतानि रक्षोच्चैः कषायान् जय यन्त्रय ।
अक्षाणि पश्य चात्मानमात्मनाऽऽत्मनि मुक्तये ॥ ६९ ॥

टीका—तथा रक्ष पालय त्व । कानि, महाव्रतानि । तथा जय निगृहाण त्व । कान्, कषायान् क्रोधादीन् । कथमुच्चैरत्यर्थं, तज्जये सुतरां यत्न कुरुष्वेत्यर्थं । तथा यन्त्रय निजनिजविषयेषु प्रवर्तमानानि त्व निरुन्धि । कानि,

अक्षाणि स्पर्शनादीनि । तथा पश्य अवलोकय त्वं । कमात्मानं । केन, आत्मना स्वयं । क, आत्मनि स्वस्मिन् । कस्मै, मुक्तये मोक्षाय न संसारसुखाय ॥ ६९ ॥

मिथ्यात्वस्यापायहेतुत्वं श्लोकद्वयेन स्पष्टयति—

अधोमध्योर्ध्वलोकेषु नाभून्नास्ति न भावि वा ।
तद्दुःखं यन्न दीयेत मिथ्यात्वेन महारिणा ॥ ७० ॥

टीका—तत् दु:खमधोलोके मेरोरधः सप्तसु भूमिषु, मध्यलोके जम्बूद्वीपादिस्वयम्भूरमणसमुद्रान्ते तिर्यग्लोके, ऊर्ध्वलोके मेरुचूलिकान्तत प्रभृति तनुवातवलयपर्यन्ते । नाभूत् न भूतं । नास्ति न भवति । न भावि वा न वा भविष्यति । यन्न दीयेत न सम्पाद्येत जीवस्य । केन, मिथ्यात्वेन । किंविशिष्टेन, महारिणा परमशत्रुणा, तस्मिन् सत्येव बाह्याभ्यन्तरशत्रूणामपकारकत्वोपपत्तेः ॥ ७० ॥

सद्व्यर्थीर्भावयन्भूयो मिथ्यात्वं वन्दकाहितम् ।
धनदत्तसभार्यो द्राक्स्फुटिताक्षोऽभ्रमद्भवम् ॥ ७१ ॥

टीका—अभ्रमत् पर्यटति स्म । कोऽसौ, सद्व्यर्थीर्धनदत्तनृपतिमन्त्री । कं, भवं संसारं । दीर्घसंसारोऽभूदित्यर्थः । कथंभूतो भूत्वा, द्राक् स्फुटिताक्षः झटिति स्फुटितचक्षुः । कया, धनदत्तसभार्या धनदत्तस्य स्वस्वामिनः परिषदि । किं कुर्वन्, भावयन् अभ्यासमनयन्न् । किं तन्मिथ्यात्वं । किंविशिष्टं, भूयो वन्दकेन पुनरारोपितं । इयमत्राप्यत्र कथा कथाकोशादिग्रन्थेषु द्रष्टव्या ग्रन्थगौरवभयादिह नोक्ता ॥ ७१ ॥

सम्यक्त्वस्योपकारकत्वं श्लोकद्वयेनाह—

अधोमध्योर्ध्वलोकेषु नाभून्नास्ति न भावि वा ।
तत्सुखं यन्न दीयेत सम्यक्त्वेन सुबन्धुना ॥ ७२ ॥

टीका—अस्यापि पूर्ववद्व्याख्या सुखपुण्यं पुनः सम्यक्त्वस्य सर्वत्र सर्वदा सर्वेषामुपकारकत्वात्समस्तविनिपातप्रतिबन्धकत्वाच्च निश्चयम् ॥ ७२ ॥

मन्हासितकुदृग्बद्धश्वभ्रायुःस्थितिरेकया।
दृग्विशुध्याऽपि भविता श्रेणिकः किल तीर्थकृत् ॥७३॥

टीका—किल एव ह्यागमे श्रूयते श्रेणिको नाम मगधमहामण्डलेश्वरो भविता भविष्यति। किंविशिष्ट, तीर्थकृत् धर्मतीर्थंकर। कया, दृग्विशुध्या। किंविशिष्टया, एकया असहायया विनयसम्पन्नतादितीर्थंकरत्वकारणान्तररहितया। अपिर्विस्मये। किंविशिष्ट सन्, मेत्यादि श्वभ्रे सप्तमनरकभूमावायुषो भवधारणकारणकर्मण स्थिति कालावधारणेन बन्ध श्वभ्रायु स्थिति कुदृशा तीव्रमिथ्यात्वपरिणामेन बद्धा आत्मसात्कृता श्वभ्रायु स्थिति कुदृग्बद्धश्वभ्रायु स्थिति मन्हासिता त्रयस्त्रिंशत्सागरोपमपरिमाणादपकृष्य रत्नप्रभाया चतुरशीतिवर्षसहस्रपरिमाणा कृता कुदृग्बद्धा श्वभ्रायु स्थितियस्य। एकयाऽपि दृग्विशुध्या स तथोक्त ॥ ७३ ॥

अर्हद्भक्तेर्माहात्म्य द्वाभ्यामाह—

एकैवास्तु जिने भक्तिः किमन्यैः स्वेष्टसाधनैः।
या दोग्धि कामानुच्छिद्य सद्योऽपायानशेषतः ॥ ७४॥

टीका—भो सुविहित साधो। अस्तु भवतु। काऽसौ, भक्तिर्भावविशुद्ध आन्तरोऽनुराग। क्व, जिने भगवदर्हद्देव। किंविशिष्टा, एकैव असहायैव। किं कार्यं। कै, स्वेष्टसाधनै स्वाभिमतार्थसिध्युपायै। किंविशिष्टैरन्यैर्जिनभक्तिव्यतिरिक्तै। सर्वपुरुषार्थसाधनाना तया विना तदाभासत्वनिश्चयात्। या किं, या दोग्धि प्रपूरयति। कान्, कामान् मनोरथान्। किं कृत्वा, उच्छिद्य निरस्य। कानपायान्, अभ्युदयानि श्रेयसप्रभ्रंशिनोऽपायान्। कथमशेषत सर्वत सर्वान्वा। कथ, सद्य स्वाविर्भावनानन्तरमेव ॥ ७४ ॥

वासुपूज्याय नम इत्युक्त्वा तत्संसदं गतः।
द्विर्देवारब्धविघ्नोऽभूत् पद्मः शक्रार्चितो गणी ॥ ७५॥

टीका—अभूत्सम्पन्न। कोऽसौ, पद्म पद्मरथो नाम मिथिलाधिपति। किंविशिष्टो, गणी गणधरदेव। किंविशिष्ट सन्, शक्रार्चित इन्द्रेण पूजित। पुन किंविशिष्ट सन्, द्विर्देवारब्धविघ्न द्वाभ्या देवाभ्यां धन्वन्तरिविश्वानुलोमचराभ्यामारब्धा कर्तुमुपक्रान्ता विघ्ना वाक्येन कारकदुष्पत्तर्पणा

शंखण्डप्रभृतयोऽपशकुना समवसरणगमनान्तराया यस्य स तथोक्त । कथम्भूतो भूत्वा, गत प्राप्त । कां, तत्संसद वासुपूज्यसमवसरण । किं कृत्वा, उक्त्वा उच्चार्य ॥ ७५ ॥

एकोऽप्यर्हन्नमस्कारश्चेद्विशेन्मरणे मनः ।
सम्पाद्याभ्युदयं मुक्तिश्रियमुत्कयति द्रुतम् ॥ ७६ ॥

टीका—चेद्यदि । विशेत् भावरूपतया व्याप्नुयात् । कोऽसावेकोऽपि केवलोऽपि अर्हतो भगवतो नमस्कार प्रणाम । किंतन्मनश्चित्त । क, मरणे प्राणत्यागलक्षणे । तदा द्रुत शीघ्रमुत्कयत्युत्कठयति । का, मुक्तिश्रिय मोक्षलक्ष्मीं । अनन्तरभवेषु द्वित्रिभवेषु वा परमपद सम्पादयतीत्यर्थ । किं कृत्वा, सम्पाद्य सम्पूर्णं प्रापय्य । कमभ्युदय महर्द्धिम् ॥ ७६ ॥

स णमो अरहंताणमित्युच्चारणतत्परः ।
गोपः सुदर्शनीभूय सुभगाह्वः शिवं गतः ॥ ७७ ॥

टीका—गत । कोऽसौ, आगमे प्रसिद्ध सुभगाह्व सुभगो नाम गोपो गोपाल । किं तच्छिव परममुक्ति । किं कृत्वा, सुदर्शनीभूय वृषभदासश्रेष्ठिपुत्र सुदर्शनाख्य सुरूप सुलक्षणश्च भूत्वा । किंविशिष्ट सन्, णमो अरहंताणमित्येतस्यार्हन्नमस्कारस्योच्चारणे सशब्दे तत्परस्तन्निष्ठस्तदेकाग्रमना इत्यर्थ ॥ ७७ ॥

ज्ञानोपयोगमाहात्म्य त्रिभि श्लोकैराह—

स्वाध्यायादि यथाशक्ति भक्तिपीतमनाश्चरन् ।
तत्कालिकाद्भुतफलादुदर्के तर्कमस्यति ॥ ७८ ॥

टीका—अस्यति क्षिपति निवारयतीत्यर्थ । कोऽसौ, पुरुष । क, तर्कं विकल्प संशयरूप विमर्शमित्यर्थ । कस्मिन्विषये, उदर्के उत्तरफले स्वाध्यायाद्यनुष्ठानसाध्यमागमे यदद्भुत फलमुक्त तन्मे भविष्यति न वेति सन्देह । कस्मात्तत्तत्कालिकाद्भुतफलात् क्रियमाणस्वाध्यायाद्याचरणसमयभवासम्भाव्येष्टसाध्यात् दृष्टेनादृष्टस्यासम्भाव्यस्यापि निश्चेतु शक्यत्वात् । किं कुर्वन्, चरन् अनुतिष्ठन् । किं तत्स्वाध्यायादि स्वाध्याय वन्दना प्रतिक्रमणादिकमपि

मुनीनां नित्यमाचरण । कथं, यथाशक्ति अनिगूहितबलवीर्यं यथा भवति । किंविशिष्टः सन्, भक्तिप्रीतमना भक्त्या प्रीतं स्वान्तं प्रीतमनुरञ्जितं वा मनश्चित्तं यस्य स तथोक्तः ॥ ७८ ॥

शूले प्रोतो महामन्त्रं धनदत्तार्पितं स्मरन् ।
दृढशूर्पो मृतोऽभ्येत्य सौधर्मात्तमुपाकरोत् ॥ ७९ ॥

टीका—*अतिनिर्भयमुपाकरोत्* स्वस्वामिनृपतिकार्यमाणोपसर्गनिराकरणपूर्वकसत्कारकरणेनोपाकृतवान् । कोऽसौ, दृढशूर्पो नाम चोरः । कं, तं धनदत्तश्रेष्ठिनं । किं कृत्वा, अभ्येत्य आगत्य । कस्मात्सौधर्मात् सौधर्मकल्पविमानात् । सौधर्मे महर्द्धिकदेवत्वं प्राप्त इत्यर्थादापन्नमत्र बोध्यं । कथम्भूतः सन्, मृतः । किं कुर्वन्, स्मरन् चिन्तयन् । कं, महामन्त्रं पञ्चनमस्कारं तद्रुचितनस्योत्कृष्टस्वाध्यायत्वात् । किंविशिष्टं धनदत्तार्पितं धनदत्ताख्येन श्रेष्ठिना ढौकितं । किंविशिष्टः स्थितः, शूले प्रोतः शूलिकायामारोपितः ॥७९॥

खण्डश्लोकैस्त्रिभिः कुर्वन् स्वाध्यायादि स्वयंकृतैः ।
मुनिनिन्दाप्तमौग्ध्योऽपि यमः सप्तर्द्धिभूरभूत् ॥ ८० ॥

टीका—अभूत् । कोऽसौ यमः यमो नाम राजा, राज्यं त्यक्त्वा प्रव्रजितः । किंविशिष्टः, सप्तर्द्धिभूः । *बुद्धि तवो वि य रिद्धी विउव्वणरिद्धी तहेव ओसहिया । रसबलअक्खीणा वि य रिद्धीओ सत्त पण्णत्ता ॥* इत्यासां सप्तानामृद्धीनां भूः स्थानं सप्तर्धिप्राप्तोऽभूदित्यर्थः । किंविशिष्टोऽपि, मुनिनिन्दाप्तमौग्ध्योऽपि मुनिनिन्दया प्राप्तमूढभावोऽपि । किं कुर्वन् स तथा अभूत् कुर्वन् । किं तत्, स्वाध्यायादि । कैः खण्डश्लोकैः । किंविशिष्टैः, स्वयंकृतैः स्वयमात्मना निर्मितैः । कतिभिस्त्रिभिः । तद्यथा 'कड्डसि पुणु णिक्खेवसि रे गद्दहा । जवं पत्थेसि खादिदुं ॥ १ ॥ अण्णत्थ किं पलोवह तुम्हे पत्थ बुद्धिया छिद्दे । अच्छेद्द इका णिया ॥ २ ॥ अह्मादो णत्थि भयं दिहादो दिस्सदे भयं तुह्म' ॥८०॥

अहिंसाहिंसयोर्माहात्म्यं द्वाभ्यामाह—

अहिंसाप्रत्यपि दृढं भजन्नो जायते रुजि ।
यस्त्वध्यहिंसासर्वस्वे स सर्वाः क्षिपते रुजः ॥ ८१ ॥

टीका—ओजायते ओजस्वीवाचरति दु खेन नाभिभूयत इत्यर्थ । कोऽसौ, पुरुष । कस्या, रजि उपसर्गादिपीडायामुपस्थितायां । किं कुर्वन्, हृद भजन् गाढ सेवमान । किं तद्, अहिंसाप्रत्यपि अहिंसाया स्तोकमहिंसा प्रति । स्तोके प्रतिनैत्यनेनाव्ययीभाव ॥ स्तोकामप्यहिंसामित्यर्थ । यस्तु भवति । कथमपि अधीश्वर । क, अहिंसासर्वस्वे अहिंसाया सर्वस्व साकल्यमहिंसासर्वस्व तस्मिन् । ईश्वरेऽधीत्यनेन सप्तमी । सकलाऽहिंसाया अधीश्वरो भवतीत्यर्थ । स क्षिपते निराकरोति । का, सर्वा समस्ता रजौ दु खानि ॥ ८१ ॥

यमपालो ह्रदेऽहिंसन्नेकाह्र पूजितोऽप्सुरैः ।
धर्मस्तत्रैव मेण्ढघ्नः शिशुमारैस्तु भक्षितः ॥ ८२ ॥

टीका—पूजित । कोऽसौ, यमपाल वाराणस्या मातङ्ग । कै, अप्सुरै जलदेवताभि । क, ह्रदे शिशुमारह्रदे । किं कुर्वन्, एकाह्नमेकदिनमहिंसन् चतुर्दशीदिने हिंसामकुर्वन्नित्यर्थ । धर्मस्तु श्रेष्ठिपुत्रो भक्षित । कै, शिशुमारै । क, तत्रैव तस्मिन्नेव ह्रदे । किंविशिष्ट सन् ? मेण्ढघ्न कृतराजमेण्ढकवध ॥ ८२ ॥

असत्यकृतापाय द्वाभ्यामाह—

मा गां कामदुघां मिथ्यावादव्याघ्रोन्मुखीं कृथाः ।
अल्पोऽपि हि मृषावादः श्वभ्रदुःखाय कल्पते ॥८३॥

टीका—हे क्षपक मा कृथा मा कुरु त्व । कां, गां वाच । पक्षे अनड्वाहीं । किंविशिष्टां, कामदुघां काम प्रार्थ्यमानमर्थ दोग्धि क्षरत्याविर्भावयती सेवरभूतां सत्यवाच कामधेनु धेन्वर्थ । किंविशिष्टां मा कृथा, मिथ्यावाद्व्याघ्रोन्मुखीं मिथ्यावादोऽसत्यजल्प स एव व्याघ्र कामधेनोरिव सत्यवाच सहरणशीलत्वात्, मिथ्यावादव्याघ्रस्य उन्मुखीं समुखीं मिथ्यावाद कर्तुमुद्युक्त्याम च प्रतिवर्तमानां । हि यस्मादल्पोऽपि स्तोकोऽपि किं पुनर्भूयान् । मृषावादो वितथव्याहार श्वभ्रदु खाय कल्पते सम्पद्यते, नरकदु ख सम्पादयतीत्यर्थ ॥ ८३ ॥

अजैर्यष्टव्यमित्यत्र धान्यैस्त्रैवार्षिकैरिति ।
व्याख्यां छागैरिति परावर्त्यागान्नरकं वसुः ॥ ८४ ॥

टीका—अगात् गत । कोऽसौ, वसुर्नाम राजा । किं तन्नरक । किं कृत्वा, परावर्त्य अन्यथा कृत्वा । का, धान्यैस्त्रैवार्षिकैरिति व्याख्या । कथ, परावर्त्य च्छागैरिति । क्व, अजैर्यष्टव्यमित्यत्र परमागमे वाक्ये । अयमर्थ । न जायत इत्यजा वर्षत्रयवृत्तयो व्रीहयस्तैर्यष्टव्य शान्तिकपौष्टिकार्थां क्रिया कार्यति क्षीरकदम्बाचार्यैरिद व्याख्यान परावर्त्य अजैश्छागैर्यष्टव्य हव्यकव्यार्थो विधिर्विधातव्य इत्यन्यथा कृत्वा पर्वतनारदविसंवादे वसुराज श्वभ्रमगमदि त्यर्थ ॥ अजैर्होतव्यमिति क्वचित्पाठ ॥ ८४ ॥

स्तेयानुभाव द्वाभ्यामाह—

आस्तां स्तेयमभिध्याऽपि विध्याप्याऽग्निरिव त्वया ।
हरन् परस्वं तदसून् जिहीर्षन् स्वं हिनस्ति हि ॥ ८५ ॥

टीका—भो समाधिमरणार्थिन् । आस्तां तिष्ठतु । कि तत्कथनेनेत्यर्थ । किं तत्, स्तेय परधनापहरण । विध्याप्या शमयितव्या त्वया । काऽसाव भिध्याऽपि परधनेच्छाऽपि । क इवाग्निरिव वह्निर्यथा तापहेतुत्वात् । हि यस्मात् हिनस्ति हन्ति । कोऽसौ, पुरुष । क, स्वमात्मान । किं चिकीर्षन्, जिहीर्षन् हर्तुमिच्छन् । कान्, तदसून परप्राणान् । किं कुर्वन्, हरन् अदत्त गृण्हन् । किं तत्, परस्व परद्रव्य । अयमत्राभिप्राय —परधन मुष्णत परप्रा णोपघातच्छा अवश्य भाविनी, परजिघासा च आत्मनो हिंसा परमार्थत स्तस्या एव हिंसात्वात् । भावहिंसायामेव हि सत्या द्रव्यहिंसा दुरन्तससा रदु खलक्षण स्वफल प्रयच्छतीति ॥ ८५ ॥

रात्रौ मुषित्वा कौशाम्बीं दिवा पञ्चतपश्चरन् ।
शिक्यस्थस्तापसोऽधोऽगात् तलारकृतदुर्मृतिः ॥ ८६ ॥

टीका—अधोऽगान्नरक गत । कोऽसौ, तापसो भौतिक । किंविशिष्ट सन्, तलारकृतदुर्मृति तलवरेण प्रवर्तितप्रकृष्टरौद्रध्यानाविष्टमरण । किं कुर्वन्, शिक्यस्थ परभूमि न स्पृशामीति लम्बमाने शिक्ये स्थित । पञ्चत-

पश्यन् पञ्चाग्निसाधनं कुर्वन् । क, दिवा दिने । किं कृत्वा, मुषित्वा मुषित-धनां कृत्वा । का, कौशाम्बीं कौशाम्बीसञ्ज्ञनगरीं तन्नगरीवास्तव्यलोकं । क, रात्रौ ॥ ८६ ॥

ब्रह्मचर्यदार्ढ्यविधापनार्थमाह—

पूर्वेऽपि बहवो यत्र स्खलित्वा नोद्गताः पुनः ।
तत्परं ब्रह्म चरितुं ब्रह्मचर्यं परं चरेत् ॥ ८७ ॥

टीका—बहवः प्रभूताः पूर्वे रुद्रादयः किं पुनरद्यतना मुनय इत्यपिशब्दार्थः । यत्र यस्मिन् ब्रह्मचर्याख्ये व्रते, स्खलित्वा अतिचारं प्राप्य, न पुनरुद्गता न तत्रात्मानमुपस्थापितवन्तोऽनाचारं चरितवन्त इत्यर्थः । तद्ब्रह्मचर्यं चतुर्थव्रतं परमुत्कृष्टं मनागप्यतीचाररहितं कृत्वा चर धारय त्वं । किं कर्तुं, चरितुमनुभवितुं । किं तत्परमुत्कृष्टं निर्विकल्पं प्रत्यग्ज्योतिराख्यं, ब्रह्म ज्ञानं, शुद्धस्वात्मानं स्वात्मना संवेदयितुमित्यर्थः ॥ ८७ ॥

नैर्ग्रन्थ्यव्रतं द्रढयितुमाह—

मिथ्येष्टस्य स्मरन् श्मश्रुनवनीतस्य दुर्मृतेः ।
मोपेक्षिष्ठाः क्वचिद् ग्रन्थे मनो मूर्च्छन्मनागपि ॥ ८८ ॥

टीका—भोः सुविहितसाधो मा उपेक्षिष्ठाः, माऽवधीरय त्वं । किं तन्मनः । किं कुर्वत्, मूर्च्छन् मुह्यन् ममेदमिति सङ्कल्पं गच्छत् । क, क्वचित् क्वापि ग्रन्थे परिग्रहे । कथं, मनागपि सर्वस्मिन् संगे चित्तं व्यासजद्व्यावर्तयेत्यर्थः । किं कुर्वन्, स्मरन् । कस्य, श्मश्रुनवनीतस्य कस्यचिच्छ्रेष्ठिपुत्रस्य । किंविशिष्टस्य, मिथ्येष्टस्य वितथमनोरथस्य । पुनः किंविशिष्टस्य, दुर्मृतेः रौद्रध्यान-मृतस्य ॥ ८८ ॥

निश्चयनयेन नैर्ग्रन्थ्यप्रतिपत्त्यर्थमाह—

बाह्यो ग्रन्थोऽङ्गमक्षाणामान्तरो विषयैषिता ।
निर्मोहस्तत्र निर्ग्रन्थः पान्थः शिवपुरेऽर्थतः ॥ ८९ ॥

टीका—भवति । कोऽसौ, बाह्यो बहिरङ्गो, ग्रन्थः परिग्रहः । किमङ्गं शरीरं । तथा आन्तरोऽन्तरङ्गः सङ्गो भवति । किं, अक्षाणां स्पर्शनादीनां

विषयैषिता स्पर्शेन्द्रियविषयेष्वभिलाषः । तत्र द्वयोरपि ग्रन्थयोर्निर्मोहो निर्मूर्च्छः साधुरर्थतः परमार्थेन निर्ग्रन्थो निष्परिग्रहो भवति । तथा शिवपुरे निर्वाणनगरे पान्थो *नित्यं प्रयायी स्यात् निर्ग्रन्थस्यैव मोक्षमार्गेऽविच्छिन्नं* प्रयातुं समर्थत्वात् ॥ ८९ ॥

कषायेन्द्रियतन्त्रापायानुस्मारणमाह--

कषायेन्द्रियतन्त्राणां तत्तादृग्दुःखभागिताम् ।
परामृशन्मास्म भवः शंसितव्रत तद्वशः ॥ ९० ॥

टीका--भोः शंसितानि महद्भिरपि स्तुतानि व्रतानि यस्य स शंसितव्रत *मा स्म भवः मा भूस्त्वं । किं विशिष्टस्तद्वशः कषायेन्द्रियपरतन्त्रः । किं* कुर्वन्, परामृशन् चिन्तयन् । कां, तत्तादृग्दुःखभागितां सा प्रथमाध्याये निर्दिष्टा तादृगनन्यसाधारणीं दुःखभागिता क्लेशानुभूतिस्तां । केषां, कषायेन्द्रियेषु आयत्तानां तदभिभूतानामित्यर्थः ॥ ९० ॥

एवं व्यवहाराराधनानिष्ठतां विधाप्य निश्चयाराधनामुपदिशति—

श्रुतस्कन्धस्य वाक्यं वा पदं वाऽक्षरमेव वा ।
यत्किञ्चिद्रोचते तत्रालम्ब्य चित्तलयं नय ॥ ९१ ॥

टीका—अहो व्यवहाराराधनापरिणत आराधकराज । यत्किञ्चित्किमपि रोचते तुभ्यं रुचिमुत्पादयति च । किं तद्वाक्यं वा वाक्यमात्राभिन्नं वा, णमो अरहंताणमित्यादिकं पदं वा, अर्हमित्यादिकमक्षरमेव वा अ सि आ उ सा इत्यादीनामेकतमं । कस्य सम्बन्धि, श्रुतस्कन्धस्य द्वादशाङ्गप्रविष्टस्य आचाराङ्गादिद्वादशविकल्पस्य अङ्गबाह्यस्य च सामायिकादिभेदस्य प्रकीर्णकाख्यस्य स्कन्धः सद्भावस्तस्य मध्ये यत्किञ्चिद्वाक्यादिकमिदानीं क्षीणकाले-ऽल्पमलानुरागं जनयति । तत्र इदं वाक्यादीनामन्यतमे आलम्ब्य आश्रित्य चित्तं भवतः प्रमाणं श्रुतस्कन्धवाक्यादीनां प्रयाणामपि भवन्त्या भावमा-त्रतो परमार्थाराधनासाधनसामर्थ्यनिर्णयात् । अक्षरमेवेत्यत्र एव शब्दः स्वयोग्यत्वावधारणार्थः ॥ ९१ ॥

शुद्धं श्रुतेन स्वात्मानं गृहीत्वार्य स्वसंविदा ।
भावयंस्तल्लयापास्तचिन्तो मृत्वैहि निर्वृतिम् ॥ ९२ ॥

टीका—हे आर्य आराधनातत्पर। एहि गच्छ त्वं। कां, निर्वृतिं मुक्तिं। किं कृत्वा, मृत्वा प्राणान् विसृज्य। कथम्भूतो भूत्वा, तद्वयापास्तचिन्त तत्र शुद्धस्वात्मनि एय· श्लेषस्तद्वयस्तन्मयीभावस्तेन अपास्ता निराकृता चिन्ता संकल्पश्चित्तं वा मनो यस्य स तथोक्तः। किं कुर्वन्, भावयन्। कं, शुद्धं रागद्वेषमोहरहितं स्वात्मानं निजचिद्रूपं। कया, स्वसंविदा स्वसंवेदनेन। किं कृत्वा, गृहीत्वा निश्चित्य। केन, श्रुतेन 'एगो मे संसदो आदा' इत्यादिश्रुतज्ञानेन। मृत्वेहीत्यत्र ओमाङोरित्यनेन पररूपं। उक्तं च क्षेत्रपाले द्वे ज्ञातव्ये।' "आराधनोपयुक्तः सन् सम्यक्कारं विधाय च। उत्कर्षात्त्रिभवान् गत्वा प्रयाति परिनिर्वृतिम्" ॥ ९२ ॥

उक्तमेवार्थं परमार्थसंन्यासोपदेशद्वारेण समर्थयते—

संन्यासो निश्चयेनोक्तः स हि निश्चयवादिभिः।
यः स्वस्वभावे विन्यासो निर्विकल्पस्य योगिनः॥९३॥

टीका—हि यस्मान्निश्चयवादिभिर्व्यवहारनयसापेक्षनिश्चयनयप्रयोगचतुरै सूरिभिर्निश्चयेन परमार्थेन स संन्यास उक्त· मुमुक्षूणामग्रे प्ररूपित। य· कि, यो विन्यासः विधिपूर्वकमात्मन स्थापन। क, स्वस्वभावे शुद्धचिदानन्दमये स्वात्मनि। कस्य, योगिन समाधिमत। किंविशिष्टस्य, निर्विकल्पस्य अन्तर्जल्पसंपृक्तोत्प्रेक्षाजालनिष्क्रान्तस्य ॥ ९३ ॥

परीषहादिना विक्षिप्यमाणचित्तस्य क्षपकस्य निर्यापकाचार्य· किं कुर्यादित्याह—

परीषहोऽथवा कश्चिदुपसर्गो यदा मनः।
क्षपकस्य क्षिपेज्ज्ञानसारैः प्रत्याहरेत्तदा ॥ ९४ ॥

टीका—यदा यस्मिन्काले क्षिपेद्यत्र तत्र भ्रमयेत्। कोऽसौ, कश्चित् कोऽपि क्षुधादीनामन्यतम· परिषहोऽथवा कश्चिद्चेतनकृतादीनामन्यतम उपसर्गो वा। किं तन्मन। कस्य, आराधकस्य। तदा प्रत्याहरेत् व्यावर्तयेत् शुद्धस्वात्मोन्मुखं तत्कुर्यादाचार्यः। कैः, ज्ञानसारैः श्रुतज्ञानरहस्योपदेशैः ॥९४॥

ज्ञानसारैरित्येतत् प्रपंचयितुमुत्तरप्रबन्धमाह—

दुःखाग्निकीलैराभीलैर्नरकादिगतिष्वहो ।
तप्तस्त्वमङ्गसंयोगात् ज्ञानामृतसरोऽविशन् ॥ ९५ ॥

टीका—अहो श्रावकमवेक तप्त सन्तप्तस्त्व । कैर्दु खाग्निकीलै शारीरमानसाशान्तदहनज्वालाभिः । किंविशिष्टै , आभीलै कष्टै प्रतिकर्तुमशक्यैरित्यर्थ । कासु, नरकादिगतिषु नारकतिर्यग्मनुष्यदेवभवग्रहणेषु । कस्मादङ्गसंयोगात् शारीरमश्लेषात्, शारीरमात्मबुद्ध्याध्यवस्यन्नित्यर्थं । किं कुर्वन्, अविशन् अप्रविशन् अनवगाहमान । किं तत्, ज्ञानामृतसर अन्यच्छरीरमन्योऽहमित्यादिभेदोपलम्भपीयूषतडागम् ॥ ९५ ॥

इदानीमुपलब्धात्मदेहभेदाय साधुभिः ।
सदाऽनुगृह्यमाणाय दुःखं ते प्रभवेत्कथम् ॥ ९६ ॥

टीका—इदानीं सम्प्रति । कथ प्रभवेत् । किं तत्, दु ख । कस्मै, ते तुभ्य । केनाऽपि प्रकारेण त्वामभिभवितु परिषहादिदु ख न शक्नुयादित्यर्थ । किंविशिष्टाय ते, उपलब्धात्मदेहभेदाय निश्चितस्वात्मशरीरान्यत्वविवेकाय । पुन किंविशिष्टाय, अनुगृह्यमाणाय उपक्रियमाणाय । कै, साधुभि सयतै । कथ, सदा नित्यम् ॥ ९६ ॥

दुःखं सङ्कल्पयन्ते ते समारोप्य वपुर्जडाः ।
स्वतो वपु पृथक्कृत्य भेदज्ञाः सुखमासते ॥ ९७ ॥

टीका—सकल्पयन्ति ममेदमिति व्यवस्यन्ति । के, ते जडा बहिरात्मान । किं तत्, दु ख अहं दु खवानस्मीति प्रतिपद्यन्त इत्यर्थ । किं कृत्वा, समारोप्य सम्मुख योजयित्वा । किं तद्वपु शरीर । क, स्व आत्मनि स्वदेह स्वात्मतया निश्चित्येत्यर्थ । भेदज्ञा आत्मशरीरविवेकविद । पुनरासते तिष्ठति । कथ, सुख स्वात्मदर्शनोत्थमानन्दमनुभवन्तीत्यर्थ । किं कृत्वा, पृथक्कृत्य भेदेनाध्यवसाय्य । किं तद्वपुः । कस्मात्स्वत शारीरमात्मनो भिन्न निश्चित्य । तद्भेदभावना यथा—न मे मृत्यु कुतो भीतिर्न मे व्याधि कुतो व्यथा । नाह बालो न वृद्धोऽह न युवैतानि पुद्गले ॥ जीवोऽन्य पुद्गलश्चान्य इत्यादि ॥ ९७ ॥

परायत्तेन दुःखानि बाढं सोढानि संसृतौ ।
त्वयाऽद्य स्ववशः किञ्चित् सहेच्छन्निर्जरां पराम् ॥९८॥

टीका—त्वया समाधिसाधनोद्यतेन भवता बाढमत्यर्थं सोढानि अनुभूतानि। कानि, दुःखानि । क्व, संसृतौ अनादिसंसारे । किंविशिष्टेन सता, परायत्तेन परवशेन । अद्य सम्प्रति प्रत्यासन्नमृत्युसमये सह साम्यभावनयाऽनुभव । कानि, दुःखानि । कथं, किंचित् स्तोकं अल्पकालं । किंविशिष्ट सन्, स्ववशः स्वाधीनः । किं कुर्वन्निच्छन् वांछन् निर्जरामशुभकर्मक्षयं । किंविशिष्टां, परां उत्कृष्टामन्यां वा अलब्धपूर्वां संवरसहभाविनीम् ॥ ९८ ॥

यावद् गृहीतसंन्यासःस्वं ध्यायन् संस्तरे वसेः ।
तावन्निहन्याःकर्माणि प्रचुराणि क्षणे क्षणे ॥ ९९ ॥

टीका—यावत् यावन्तं कालं, गृहीतसन्यास प्रतिपन्नभक्तप्रत्याख्यानस्त्वं स्वमात्मानं ध्यायन्नेकाग्रतया चिन्तयन् सस्तरे प्रस्तरे वसेस्तिष्ठेस्तावत् तावन्तं कालं क्षणे क्षणे प्रचुराणि कर्माणि निहन्या नियतमवश्यं क्षपये ॥९९॥

पुरुमायान् बुभुक्षादिपरीषहजये स्मर ।
घोरोपसर्गसहने शिवभूतिपुरःसरान् ॥ १०० ॥

टीका—किं च बुभुक्षादिपरीषहजये कर्तव्ये स्मर चिन्तय त्वं । कान्, पुरुमायान् वृषभदेवादीन् । तथा घोरोपसर्गसहने कर्तव्ये शिवभूतिप्रभृतीन् स्मर ॥ १०० ॥

अचेतनकृतोपसर्गसहने दृष्टान्त —

तृणपूलवृहत्पुञ्जे संक्षोभ्योपरि पातिते ।
वायुभिः शिवभूतिः स्वं ध्यात्वाऽभूदाशु केवली ॥१०१॥

टीका—अभूत्सम्पन्नः । कोऽसौ, शिवभूति शिवभूतिसंज्ञो मुनि । किंविशिष्ट, केवली केवलज्ञानी । कथमाशु सद्य । किं कृत्वा, ध्यात्वा प्रणिधाय । कं, स्वमात्मानं । क्व सति, तृणपूलबृहत्पुञ्जे लोके गञ्जी इति प्रसिद्धे । किंवि-

शिष्टे, पातिते । कैर्वायुभिः । क, उपरि उपरिष्टात् । किं कृत्वा, सक्षोभ्य समन्तादितस्ततः क्षोभयित्वा सचाल्य ॥१०१॥

मनुष्यकृतोपसर्गसहनोपाख्यानमिदम्—

न्यस्य भूपाधियाऽङ्गेषु सन्तप्ता लोहशृङ्खलाः ।
द्विट्पक्ष्यैः कीलितपदाः सिद्धा ध्यानेन पाण्डवाः ॥१०२॥

टीका—सिद्धा परममुक्तिं गता । के, ते पाण्डवा साक्षाद्युधिष्ठिरभीमसेनार्जुनाख्यः सिद्धा । नकुलसहदेवौ स्वसाक्षात् सर्वार्थसिध्यादिजन्मन व्यवधानात् । केन, ध्यानेन शुद्धस्वात्मप्रसंख्यानेन । किंविशिष्टा सत, कीलितपदा लोहकीलकैर्भूम्या सह यंत्रितपादा । कै, द्विट्पक्ष्यैः द्विषां कौरवाणा पक्षे भवैः तद्भागिनेयादिभिः । किं कृत्वा, न्यस्य निक्षिप्य । का, लोहशृङ्खला । किंविशिष्टा, सप्ता ज्वलज्ज्वालीकृता । केषु अङ्गेषु पाण्डवाना कण्ठादिप्रदेशेषु । कया, भूपाधिया भूषणकल्पनया । युष्मान् हेमाभरणानीमानि परिधापयाम इति कथयित्वेत्यर्थः ॥ १०२ ॥

तिर्यक्कृतोपसर्गसहनोदाहरणमिदम्—

शिरीषसुकुमाराङ्गः खाद्यमानोऽतिनिर्दयम् ।
सृगाल्या सुकुमारोऽसून् विससर्ज न सत्पथम् ॥१०३॥

टीका—विससर्ज त्यक्तवान् । कोऽसौ, सुकुमार सुकुमारस्वामी । कान्, असून् प्राणान् न पुन सत्पथ शुद्धस्वात्मध्यानरूप सिध्युपाय विससर्ज । किं क्रियमाण, खाद्यमान भक्ष्यमाण । कया, सृगाल्या जम्बुकस्त्रिया । कथमतिनिर्दय प्रकाममनिष्कृप । किंविशिष्ट सन्, शिरीषसुकुमाराङ्ग शिरीषकुसुमसमानकोमलकाय ॥ १०३ ॥

सुरकृतोपसर्गसहने निदर्शनमिदम्—

तीव्रदुःखैरतिक्रुद्धभूतारब्धैरितस्ततः ।
भग्नेषु मुनिषु प्राणानौज्झद्विद्युच्चरः स्वयुक् ॥ १०४ ॥

टीका—औज्झत्यजति स्म । कोऽसौ, विद्युच्चर । कान्, प्राणान् । किंविशिष्ट सन्, स्वयुक् आत्मानं समादधान । केषु सत्सु, मुनिषु तपोधनेषु ।

किंविशिष्टेषु, भग्नेषु प्रपलायितेषु । क, इतस्तत यत्र तत्र । कै, तीव्रदु खै नितान्तासह्यबाधाभि । किंविशिष्टैरतिकुद्धभूतारब्धै अत्यन्तकुपिताधमव्यन्तरोपक्रान्तै ॥ १०४ ॥

अचेन्नृतिर्यग्देवोपसृष्टसंक्लिष्टमानसा ।
सुसत्वा बहवोऽन्येऽपि किल स्वार्थमसाधयन् ॥१०५॥

टीका—किल आगम ह्येव श्रूयते । सुसत्त्वा महासात्त्विका अन्येऽपि शिव भूत्यादिभ्योऽपरेऽपि, बहवो भूयास , स्वार्थं पुरुषार्थं प्रकरणान्मोक्षलक्षणमसाधयन् निष्पादितवन्त । कथभूता भूत्वा, अचदित्यादि । अचेतोऽचेतना पृथिव्यादय , नरो मनुष्या तिर्यञ्चो तैर्यग्योना देवा सुरा अचेतश्च नरश्च तिर्यञ्चश्च देवाश्च अचेन्नृतिर्यग्देवास्तैरुपसृष्टा कृतोपसर्गास्ते च ते असंक्लिष्टमानसाश्च रागद्वेषमोहानाविष्टचेतस शुद्धस्वात्मध्यानपरिणता अचेन्नृतिर्यग्देवोपसृष्टसंक्लिष्टमानसा ॥ १०५ ॥

तत्त्वमप्यङ्ग सङ्गत्य नि सङ्गेन निजात्मना ।
त्यजाङ्गमन्यथा भूरिभवक्लेशैर्ग्लपिष्यसे ॥ १०६ ॥

टीका—अग अहो महात्मन् । यत एव महानुभावैर्मुमुक्षुभिर्भगवच्छिवभूतिप्रभृतिभि अत्यन्तविनिपातोपनिपातेऽपि स्वार्थ साधितस्तत्तस्मात्त्वमपि भवानपि त्यज मुञ्च । किं तदङ्ग देह । किं कृत्वा, सङ्गत्य सयुज्य । केन सह निजात्मना अस्मीयेन तेन वा चिद्रूपेण । किंविशिष्टेन, नि सङ्गेन कर्मविविक्तेन । अन्यथा अन्येन सक्लेशावेशप्रकारेण अङ्गत्यागे ग्लपिष्यसे विह्वलीकरिष्यसे त्व । कै कर्तृभिर्भूरिभवक्लेशै प्रचुरससारदु खै । उक्तंच— " विराद्धे मरणे देव दुर्गतिर्दूरचोदिता । अनन्तश्चापि संसार पुनरप्यागमिष्यति ॥ १०६ ॥

श्रद्धा स्वात्मैव शुद्ध प्रमदवपुरुपादेय इत्याञ्जसीदृक्
तस्यैव स्वानुभूत्या पृथगनुभवनं विग्रहादेश्च संवित् ।
तत्रैवात्यन्ततृप्त्या मनसि लयमितेऽवस्थितिः स्वस्य चर्या
स्वात्मानं भेदरत्नत्रयपरपरमं तन्मयं विद्धि शुद्धम् ॥१०७॥

टीका—किं च उपदिश्यते सद्गुरुभिरसौ। दृक् दृष्टिः। किंविशिष्टा, आत्मनी पारमार्थिकी। किं, श्रद्धा अभिनिवेशः। कथं, भवति। कोऽसौ, स्वात्मैव न परात्मा। किंविशिष्टः, शुद्धो द्रव्यभावकर्मरहितः। पुनः किंविशिष्ट, प्रमदवपुरानन्दरूपः। किंविशिष्टो भवन्नुपादेयो मुमुक्षूणामुपेय। इत्येवंरूपा श्रद्धैव निश्चयसम्यक्त्वमाख्यायते। तथा संविदात्मनी निश्चयज्ञानं सद्गुरुभिरुपदिश्यते। किमनुभवनमनुभूतिः। कस्य, तस्यैव शुद्धप्रमदवपुस्त्वेनोपादीयमानस्य स्वात्मन एव। कथं, पृथक् भेदेन। कस्माद्विग्रहादेः कायवाङ्मनसयात्। कया, स्वानुभूत्या स्वसंवित्त्या। तथा सद्गुरुभिरात्मनी चर्या निश्चयचारित्रं चोपदिश्यते। किमवस्थितिरवधानं। कस्य, स्वात्मनः। क, तत्रैव तथाप्रतीयमानेऽनुभूयमाने स्वात्मन्येव। क सति, मनस्यन्तःकरणे। किंविशिष्टे, इते गते प्राप्ते। क, लयं तन्मयीभावं। क, तत्रैव। कया, अत्यन्ततृष्णया अतिमात्रवितृष्णत्वेन। उक्तं च—दर्शनमात्मविनिश्चितिरात्मपरिज्ञानमिष्यते बोधः। स्थितिरात्मनि चारित्रं कुत एतेभ्यो भवति बन्धः ॥ १ ॥ तन्मयं तेन निश्चयरत्नत्रयेण निर्वृत्तं तदात्मकं स्वात्मानं, परमं शुद्धं परमप्रकर्षं शुद्धिप्राप्तं। हे भेदरत्नत्रयपर व्यवहाररत्नत्रयप्रधान आराधकोत्तम विद्धि जानीहि संवेदय त्वं ॥ १०७ ॥

मुहुरिच्छामणुशोऽपि प्रणिहत्य श्रुतपरां श्रुतद्रव्ये ।
स्वात्मनि यदि निर्विघ्नं प्रतपसि तदसि ध्रुवं तपसि ॥१०८॥

टीका—तथा यदि चेत् प्रतपसि दीप्यसे त्वं। क, स्वात्मनि। कथं, निर्विघ्नं निष्प्रत्यूहं। किं कृत्वा, प्रणिहत्य प्रकर्षेण नियतं हत्वा। कां, इच्छां कांक्षां। क, परद्रव्ये पुद्गलादौ। किंविशिष्टामणुशोऽपि स्वल्पामपि। किंविशिष्टः सन्, मुहुरसकृत् श्रुतपरः श्रुतज्ञानभावनापरिणतो भवन्निश्चयं। तदा ध्रुवं निश्चितं तपसि अव्याहतं स्फुरसि त्वं। क, तपसि तप नाम्नि आराधनाभेदे। आभ्यो निश्चयाराधनाश्चतुर्विधमुपदिष्टं प्रतिपत्तव्य ॥ १०८ ॥

इदानीं व्यवहारेणाराधनाभ्यासमात्मसमाधानद्वारेणाविष्करणपूर्वकमाशीर्वाददानेन क्षपकं निर्यापकाचार्यः प्रोत्साहयन्नाह—

नैराश्यारब्धनैःसंग्यात्सिद्धसाम्यपरिग्रहः ।
निरुपाधिसमाधिस्थः पिबानन्दसुधारसम् ॥ १०९ ॥

टीका—भो सुविहित शिरोरत्न । पिब उपयुंक्ष त्वं । क्षमानन्दसुधारसं प्रमोदपीयूषनिर्यासं । किंविशिष्टः सन्, निरुपाधिसमाधिस्थः निरुपाधि-निर्विशेषो ध्यातृध्यानध्येयविकल्पशून्य समाधिर्योगो निरुपाधिसमाधिस्तत्र स्थित । कथम्भूतो भूत्वा, नैराश्येत्यादि । नैराश्येन जीवितधनाद्याकाङ्क्षानि-ग्रहेणारब्धमुपक्रान्तं नैःसंग्यं बहिरङ्गान्तरङ्गपरिग्रहनिष्क्रान्तत्व तेन सिद्धो निष्पन्न साम्यपरिग्रहः परमसामायिकस्वीकारो यस्य स तथोक्तः ॥ १०९ ॥

स्वारब्धमध्यायार्थमशेषमुपसंगृह्णन्नाराधकस्याराधनासहितमरणफलवि-शेषमुपदिशति—

संलिख्येति वपुःकषायवदलङ्कर्मीणनिर्यापक-
न्यस्तात्मा श्रमणस्तदेव कलयंल्लिंगं तदीयं परः ।
सद्रत्नत्रयभावनापरिणतः प्राणान् शिवाशाधर-
स्त्यक्त्वा पञ्चनमस्क्रियास्मृति शिवी स्यादष्टजन्मान्तरे ॥११०॥

टीका—शिवी स्यादशिव शिवः सम्पद्यते परममुक्तो भवेदित्यर्थः । कोऽसौ, शिवाशाधर. मोक्षाद्यभिलाषभृन्मुमुक्षुरित्यर्थ । किं कृत्वा, त्यक्त्वा । कान्, प्राणान् । किंविशिष्ट सन्, सदित्यादि । सत्या यथागुणस्थानं सम्भवन्त्या रत्नत्रयभावनया निश्चयरत्नत्रयाभ्यासेन परिणतो योगी चरमसमयवर्ती समुच्छिन्नक्रियाप्रतिपातिशुक्लध्यानारूढः । किं कुर्वन्, कलयन् धारयन् । किं तल्लिङ्ग जिनरूपता । किं, तदेव पूर्वगृहीतमौत्सर्गिकमेव । किमाख्योऽसौ, श्रमण श्रवण इति व्यपदेशभाक् । कथंभूतो भूत्वा, अलकर्मीणनिर्या-पकन्यस्तात्मा कर्मणे प्रकृतत्वात्मसारार्णवनिस्तारणलक्षणाय अल समर्थोऽलंकर्मीण निर्यापको व्यवहारेण सुस्थिताचार्यो निश्चयेन तु शुद्धस्वात्मानुभूतिपरिणामोन्मुख आत्मैव तस्यैव दु स्वहृतोर्वा आत्मनो निष्कासकत्वोपपत्ते । यदाह—स्वस्मिन्सदभिलाषित्वादभीष्टज्ञापकत्वतः । स्वयं हितप्रयोक्तृत्वा-दात्मैव गुररात्मन ॥ १ ॥ अलंकर्मीणश्चासौ निर्यापकश्च अलंकर्मीणनिर्या पकस्तत्र न्यस्तो निक्षिप्तः समर्पित आत्मा येन स तथोक्त । किं कृत्वा, संलिख्य सम्यक् कृशीकृत्य । किं तद्वपु. शरीर । किंवत्, कषायवत् कषायान् शरीरं च बाह्याभ्यंतरतपोभिस्तनूकृत्य कथमित्येवमुक्तप्रकारेण । तदुत्कृष्टाराधनापक्षे व्याख्यानं ॥ मध्यमाराधनापक्षे संप्रति व्याख्यायते—श्रमणोऽनगार शिवा-

शाधरो मुमुक्षुः सन् तदेव लिङ्गमाचेलक्यादिचतुर्विकल्पं कल्पयन् सत्यां समीचीनायां संवरसहभाविविपाककर्मनिर्जरासमर्थायां रत्नत्रयभावनायां सम्यग्दर्शनादिरत्नत्रयाभ्यासे परिणतः उपयुक्तः सन् प्राणाँस्त्यक्त्वा शिवी स्यात्। शिवं सर्वेन्द्रादिपदप्राप्तिलक्षणोऽभ्युदयः। शिवमस्यास्तीति शिवी अर्श आदेरित्यनेन मत्वर्थीयो अ प्रत्ययः। शेषं पूर्ववद्व्याख्येयं॥ ऐदंयुगीनापेक्षया जघन्याराधनापक्षे तदेवेत्थं व्याख्येयं—श्रमणः प्राग्व्याख्यातार्थविशेषणविशिष्टः पचनमस्क्रियायां पञ्चनमस्कारे स्मृतिः चिंता उच्चारणं यत्र सः पञ्चनमस्क्रियास्मृतिः यथा भवत्येवं प्राणाँस्त्यक्त्वा शिवी स्यात्। क, अष्टजन्मांतरे अष्टानां भवानां मध्ये उत्कृष्टमध्यमजघन्याराधनानुभवादत्र विभागः कर्तव्यः। तथा ह्यागमः। कालाइ अहिऊण छित्तूण अट्ठकम्मसम्मलयं। केवलणाणपहाणा केई सिज्झंति तम्मि भवे॥ १॥ आराहिऊण केई चउव्विहाराहणाय जं सारं। उव्वरियसेसपुण्णो सव्वट्ठणिवासिणो होंति॥ २॥ जेसिं होज्ज जहण्णा चउव्विहाराहणा हु भवियाणं। सत्तट्ठभवे गंतुं ते चिय पावंति णिव्वाणं॥ ३॥ अपि च—येऽपि जघन्यां तेजोलेश्यामाराधनामुपनयंति। तेऽपि च सौधर्मादिषु भवंति देवाः मुक्तस्तथा॥ १॥ अथवा—ध्यानाभ्यासप्रकर्षेण त्रुट्यन्मोहस्य योगिनः। चरमांगस्य मुक्तिः स्यात्तदैवान्यस्य च क्रमात्॥ १॥ तथा ह्यचरमांगस्य ध्यानमभ्यस्यतः सदा। निर्जरा संवरश्च स्यात्सकलाशुभकर्मणां॥ २॥ आस्रवंति च पुण्यानि प्रचुराणि प्रतिक्षणं। यैर्महर्द्धिर्भवत्येष त्रिदशः कल्पवासिषु॥ ३॥ तत्र सर्वेन्द्रियाह्लादि मनसः प्रीणनं परं। सुखामृतं पिबन्नास्ते सुचिरं सुरसेवितः॥ ४॥ ततोऽवतीर्य मर्त्येऽपि चक्रवर्त्यादिसंपदः। चिरं भुक्त्वा स्वयं मुक्त्वा दीक्षां दैगंबरीं श्रितः॥ ५॥ वज्रकायः स हि ध्यात्वा शुक्लध्यानं चतुर्विधं। विधूयाष्टौ च कर्माणि श्रयते मोक्षसंपदम्॥ ६॥ तदेतच्छ्रमणधर्मधारिणं प्रति यत्सूत्रमुपदिष्टं तदितरान् प्रति पुनरिदमुपदिश्यते। तदीयं परं इत्यस्य व्याख्यानेन परः श्रावकोऽन्यो वा सद्दृष्टिस्तदीयं श्रमणसंबंधि लिंगं कल्पयन् पचनमस्क्रियास्मृतिः प्राणाँस्त्यक्त्वा शिवी स्यादिति संबंधः। शेषं पूर्ववत् यथास्वं विकल्प्य व्याख्येयं। यत्र स्वाभा-स्तरपानहापनामपि कृत्वा कृत्वोपवासमपि शक्त्या। पचनमस्कारमनास्तनु त्यजेत्सर्वयत्नेन॥ इति भद्रम्॥ ११०॥

इत्याशाधरविरचितायां स्वोपज्ञधर्मामृतसागारधर्मटीकायां
भव्यकुमुदचंद्रिकासंज्ञायामादितः सप्तदश
प्रक्रमाश्चाष्टमोऽध्यायः॥ ८॥

ग्रन्थकर्तुं प्रशस्ति ।

श्रीमानस्ति सपादलक्षविषयः शाकंभरीभूषण-
स्तत्र श्रीरतिधाम मण्डलकरं नामास्ति दुर्गं महत् ।
श्रीरत्न्यामुदपादि तत्र विमलव्याघ्रेरवालान्वया-
च्छ्रीसल्लक्षणतो जिनेन्द्रसमयश्रद्धालुराशाधरः ॥ १ ॥

श्रीमान् त्रिवर्गसंपत्तियुक्त । शाकंभरी लवणाकरविशेष । श्रीरतिधाम लक्ष्मीक्रीडागृह श्रीरत्न्या रत्नीति कविमातु संज्ञा उदपादि उत्पन्न ॥ १ ॥

सरस्वत्यामिवात्मानं सरस्वत्यामजीजनत् ।
यः पुत्रं छाहडं गुण्यं रञ्जितार्जुनभूपतिम् ॥ २ ॥

व्याघ्रेरवालवरवंशसरोजहंसः
काव्यामृतौघरसपानसुतृप्तगात्र ।
सल्लक्षणस्य तनयो नयविश्वचक्षु-
राशाधरो विजयतां कलिकालिदासः ॥ ३ ॥

इत्युदयसेनमुनिना कविसुहृदा योऽभिनन्दितःप्रीत्या ।
प्रज्ञापुञ्जोऽसीति च योऽभिमतो मदनकीर्तियति-
पतिना ॥ ४ ॥ (युग्मम्)

म्लेच्छेशेन सपादलक्षविषये व्याप्ते सुवृत्तक्षति-
त्रासाद्विन्ध्यनरेन्द्रदोःपरिमलस्फूर्जत्त्रिवर्गौजसि ।
प्राप्तो मालवमण्डले बहुपरीवारः पुरीमावसन्
यो धारामपठज्जिनप्रमितिवाक्शास्त्रे महावीरतः ॥ ५ ॥

म्लेच्छेशेन साहिबुद्दीनतुरुष्कराजेन । सुवृत्तक्षति सदाचारनाश । दो परिमल परिमलो लक्षणावृत्त्या बल बाहुबलातिशय इत्यर्थ । ओज उत्साहोऽन्त सारो वा । जिनप्रमितिवाक्शास्त्रे जैनेन्द्रप्रमाणशास्त्र जैनेन्द्रव्याकरण च । महावीरत वादिराजपण्डितश्रीमद्धरसेनशिष्यात्पण्डितमहावीरात् ॥ ५ ॥

आशाधरत्वं मयि विद्धि सिद्धं निसर्गसौन्दर्यमजर्यमार्य ।
सरस्वतीपुत्रतया यदेतदर्थे परं वाच्यमयः प्रपञ्चः ॥ ६ ॥

अजर्यं मैत्रीं सरस्वतीपुत्रतया निसर्गसौंदर्यं प्रकृत्या सहोदरत्वं ॥ ६ ॥

इत्युपश्लोकितो विद्वद्विल्हणेन कवीशिना ।
श्रीविन्ध्यभूपतिमहासन्धिविग्रहिकेण यः ॥ ७ ॥

इति उपश्लोकित श्लोकेनोपस्तुत । श्रीविंध्यभूपति विजयवर्मा नाम मालवाधिपतिः ॥ ७ ॥

श्रीमदर्जुनभूपालराज्ये श्रावकसंकुले ।
जिनधर्मोदयार्थं यो नलकच्छपुरेऽवसत् ॥ ८ ॥

यो द्राग्व्याकरणाब्धिपारमनयच्छुश्रूषमाणान्न कान्
सत्तर्के परमास्त्रमाप्य न यतः प्रत्यर्थिनः केऽक्षिपन् ।
चेरुः केऽस्खलितं न येन जिनवाग्दीपं पथि ग्राहिताः
पीत्वा काव्यसुधां यतश्च रसिकेष्वापुः प्रतिष्ठां न के ॥९॥

कान्, पंडितदेवचंद्रादीन् प्रत्यर्थिन प्रतिवादिन । के, वादींद्रविशालकीर्त्यादयः अक्षिपन् जयंति स्म । चेरः प्रवृत्ता । के, भट्टारकदेवविनयभद्रादय । अस्खलितं निरतिचारं । जिनवाक् अर्हत्प्रवचनं । पथि मोक्षमार्गे ग्राहिताः स्वीकारिताः । रसिकेषु सहृदयविदग्धेषु मध्ये । आपुः प्राप्ता । के, बालसरस्वतीमहाकविमदनादय ॥ ९ ॥

स्याद्वादविद्याविशदप्रसादः प्रमेयरत्नाकरनामधेयः ।
तर्कप्रबन्धो निरवद्यविद्यापीयूषपूरो वहति स्म यस्मात् ॥१०॥

सिध्यङ्कं भरतेश्वराभ्युदयसत्काव्यं निबन्धोज्ज्वलं
यस्त्रैविद्यकवीन्द्रमोदनमयं स्वश्रेयसेऽरीरचत् ।
योऽर्हद्वाक्यरसं निबन्धरुचिरं शास्त्रं च धर्मामृतं
निर्माय न्यदधान्मुमुक्षुविदुषामानन्दसान्द्रे हृदि ॥ ११ ॥

सिध्यंकं सिद्धि सिद्धिशब्दोऽङ्कश्चिन्हं सर्गप्रांतवृत्तेषु यस्य तत् । निबंधोज्ज्वलं स्वयंकृतनिबंधनेन स्फुटप्रतिभासं । अरीरचत् रचयति स्म । अर्हद्वाक्य-

रसं जिनागमनिर्यासभूतं निबंधरुचिरं । स्वयंकृतज्ञानदीपिकाख्यपंजिकया रमणीयं धर्मामृतं धर्मामृताख्यं न्यदधात् स्थापयति स्म ॥ ११ ॥

आयुर्वेदविदामिष्टां व्यक्तं वाग्भटसंहिताम् ।
अष्टाङ्गहृदयोद्योतं निबन्धमसृजच्च यः ॥ १२ ॥

व्यक्तुं प्रकटीकर्तुं । वाग्भटसंहिता अष्टांगहृदयनाम्नी ॥ १२ ॥

यो मूलाराधनेष्टोपदेशादिषु निबन्धनम् ।
व्यधत्तामरकोशे च क्रियाकलापमुज्जगौ ॥ १३ ॥

आदि आराधनासारभूपालचतुर्विंशतिस्तवनाद्यर्थं । उज्जगौ उत्कृष्टं कृतवान् ॥ १३ ॥

रौद्रटस्य व्यधात्काव्यालङ्कारस्य निबन्धनम् ।
सहस्रनामस्तवनं सनिबन्धं च योऽर्हताम् ॥ १४ ॥

रौद्रटस्य रुद्रटाचार्यकृतस्य । अर्हतां अनंतजिनानां ॥ १४ ॥

सनिबन्धं यश्च जिनयज्ञकल्पमरीरचत् ।
त्रिषष्टिस्मृतिशास्त्रं यो निबन्धालंकृतं व्यधात् ॥ १५ ॥

सनिबन्धं स्वयंकृतेन जिनयज्ञकल्पदीपकाख्येननिबन्धेन सहितं जिनयज्ञकल्पं जिनयज्ञकल्पाख्यं जिनप्रतिष्ठाशास्त्रं अरीरचत् निर्मितवान् । त्रिषष्टिस्मृतिशास्त्रं आर्षमहापुराणशास्त्रोद्धृतत्रिषष्टिशलाकापुरुषवृत्तगोचरं त्रिषष्टिस्मृतिसंज्ञं संक्षिप्तशास्त्रं । निबन्धालङ्कृतं स्वयकृतनिबन्धेन भूषितं ॥ १५ ॥

अर्हन्महाभिषेकार्चाविधिं मोहतमोरविम् ।
चक्रे नित्यमहोद्योतं स्नानशास्त्रं जिनेशिनाम् ॥ १६ ॥

नित्यमहोद्योतं नित्यमहोद्योताख्य ॥ १६ ॥

रत्नत्रयविधानस्य पूजामाहात्म्यवर्णनम् ।
रत्नत्रयविधानाख्यं शास्त्रं वितनुते स्म यः ॥ १७ ॥

सोऽहमाशाधरो रम्यामेतां टीकां व्यरीरचम् ।
धर्मामृतोक्तसागारधर्माष्टाध्यायगोचराम् ॥ १८ ॥

धर्मामृतोक्ता स्वकृतधर्मामृताख्यशास्त्रे निगदिता ॥ १८ ॥

प्रमारवंशवार्धीन्दुदेवपालनृपात्मजे ।
श्रीमज्जैतुगिदेवेऽसिस्थेम्नाऽवन्तीमवत्यलम् ॥ १९ ॥

असिस्थेम्ना खड्गबलेन अवति रक्षति सति ॥ १९ ॥

नलकच्छपुरे श्रीमन्नेमिचैत्यालयेऽसिधत् ।
टीकेयं भव्यकुमुदचन्द्रिकेत्युदिता बुधैः ॥ २० ॥

असिधत् सिद्धा ॥ २० ॥

षण्णवद्व्येकसंख्यानविक्रमाङ्कसमात्यये ।
सप्तम्यामसिते पौषे सिद्धेयं नन्दताच्चिरम् ॥ २१ ॥

समाः संवत्सराः १२९६ वर्षे पौषे मासे असितदिने गुरुदिने इत्यर्थः ॥ २१ ॥

श्रीमान् श्रेष्ठिसमुद्धरस्य तनयः श्रीपौरपाटान्वय-
व्योमेन्दुः सुकृतेन नन्दतु महीचन्द्रो यदभ्यर्थनात् ।
चक्रे श्रावकधर्मदीपकमिमं ग्रन्थं बुधाशाधरो
ग्रन्थस्यास्य च लेखितोऽपि विदधे येनादिमः पुस्तकः ॥२२॥

अल्पमतिश्रमेण ॥ २२ ॥

यावत्तिष्ठति शासनं जिनपतेश्छिन्दानमन्तस्तमो
यावच्चार्कनिशाकरौ प्रकुरुतः पुंसां दृशामुत्सवम् ।
तावत्तिष्ठतु धर्मसूरिभिरियं व्याख्यायमानाऽनिशं
भव्यानां पुरतोऽत्र देशविरताचारप्रचारोद्धुरा ॥ २३ ॥

ग्रन्थसंख्या ।

अनुष्टुप्छन्दसां पञ्चशताग्राणि सतां मतः ।
सहस्राण्यस्य चत्वारि ग्रन्थस्य प्रमितिः स्फुटम् ॥ २४ ॥

अग्राणि ग्रन्थप्रमाणं ४,५०० शुभं भवतु लेखकपाठकयोः ॥ २४ ॥

समाप्तोऽयं ग्रन्थः

स्वर्गीय सेठ माणिकचन्द हीराचन्दजी जे. पी. के स्मारक फंडमें ।

चन्दा देनेवालोंकी सूची ।

[जिन नामोंके साथ * चिन्ह लगा है, उनका चन्दा वसूल नहीं हुआ है ।]

१००१) श्रीमान् सेठ हुकमचन्दजी दानवीर
५०१) गुरुमुखराय सुखानन्दजी
२५१) गुरुमुखराय निहालचन्दजी
२५१) नाथारगजी गांधी
२०१) अनूपचन्द माणिकचन्दजी
१०१) नेमचन्द मोतीचन्दजी
१०१) हीराचन्द नेमचन्दजी, शोलापुर
१०१) रेवचन्द धनजी, गुंजोटीवाला, शोलापुर
१०१) *फीकाभाई किशनदास
१०१) सूरजमल लल्लूभाई जवेरी
५१) चुन्नीलाल हेमचन्द जरीवाला
५१) प्रेमानन्ददास नारायणदास, बोरसदवाला
५१) ठाकुरदास भगवानदास जौहरी
५१) रेवाशंकर जगजीवनदास जौहरी
५१) लल्लूभाई लखमीचन्द चौकसी
५१) *भागमलजी प्रभुदयालजी
५१) पदमचन्दजी भूरामल
५१) डाह्याभाई प्रेमचन्द जवेरी
५१) देवजी रायसी
५१) दोसी जयचन्द मानचन्द पूनावाला
२५) छगनलाल धनजी, भावनगरवाला

२५) *माणिकचन्द लाभचन्द चौकसी
२५) ताराचन्द दामोदरदास
२५) मुकतागिरि नारायण पेन्टर
२५) अमथालाल खीमचन्द , पाडनाकुवा
२१) छगनलाल वेचरदास, मालागाटा
२१) चुनीलाल कालीदास, उजेडिया
२१) मिस्त्री लल्लू खुशाल, वीसनगर
१५) माणिकलाल जक्सी जवेरी
१५) जसकरन मयाचन्द मेहता
१५) वैद्य भरमल्ला बमन्ना उपाध्याय
१५) हीरालाल निहालचन्द मोदी
१५) जैसिंहभाई हरजीवनदास, अहमदाबाद
१५) *उगरचन्द रेवाचन्द शीवराला
१५) नगीनदास माणिकलाल
१५) हीराचन्द उगरचन्द, फतेपुर
१५) रिखबदास मन्नालाल,
१५) उगरचन्द रायचन्द, पाडनाकुवा
१५) मास्टर मगनलाल दामोदरदास दि. गु.जैन.बो.सुपरिन्टेन्ट
११) *उत्तमचन्द रिखबचन्द, अकलेश्वरवाला
११) त्रिभुवनदास रणछोडदास
११) चिरंजीलाल मथुरावाला
११) अमीचन्द दलीचन्द सीवराला
११) अमृतलाल गुलाबचन्द परतानगढवाला
११) *कस्तूरचन्द छारटा इन्दोरवाला
११) घासीराम लखमीचन्द, सनावद
११) कालीदास अमरसी, सेरदलाल

११) केशवलाल वच्छराज जवेरी
११) कस्तूरचन्द अमूल्क नरोडावाला
११) रामचन्द मोतीचन्द, कडेगाव
११) जीवनलाल जेठालाल, सोनासणवाला
११) नारायणदास रणछोडदास, मालवाडावाला
११) जैसिंगभाई मछाचद जवेरी
१०) जसकरण गोदर
११) पंडित लालन
११) तलकचन्द सखाराम जवेरी
५) भाऊ रामचन्द कवाल
५) दुर्लीचन्दजी सिंघई, क्लर्क तीर्थक्षेत्रकमेटी
५) अमृतलाल विठ्ठलदास धामी
५) माणिक्चन्द रायच द ओराणवाला
५) चुन्नीलाल जयचन्द वदराडवाला
५) चुन्नीलाल माणिक्चन्द, फतेपुरवाला
५) जगमोहन चुनीलाल
५) हेमचन्द हरखचन्द ईडरवाला
३) *नारायणराव इन्स्पेक्टर, तीर्थक्षेत्रकमेटी
२) कस्तूरचन्द बेचरदास
१) सेट भापू पूनाजी
५) घेलाभाई नरपत दामावाला, हीराबाग
१५) कालीदास जैसिंगभाई
५१) चुन्नीलाल जवेरचन्द जवेरी
६) शा जीवराज वनमालीदास, नरोटा
५) शिवलाल धर्मचन्द, नरोडावाला
५) छगनलाल गगाद

२५) दूदू हरीचन्द रेवाजी, फलटन
१) कचरादास कालीदास, देल्वाडवाला
१५) बाई जीरकोर, स्वर्गीय प्राणलाल हलोचन्दकी विधवा।
११) रामचद्र त्रिभुवन, घोघा
२) वखरिया जमुनादास कुबेरदास
४) हीरालाल किशनदास, बरोडावाला
१) भाई घासीरामजी, मैनेजर राजगिरिक्षेत्र
१५) सुदासनके समस्त हूमड जैनपच
१५) जोधपुरके समस्त जैनपच
५) मोतीलाल दशरथसा, वडवाहा
५) सेठ मूलचन्दजी सराफ, बरवासागर
१०) धनकुमारसिंह वक्सर
२२॥)आरसीके समस्त पच
२) हीराचन्द गीगा भावनगर
९१) कीलाचद उगनलाल, इन्दौरवाला
५८।=)बड़वानीके समस्त दिगम्बर जैन पच
१२) अमथालाल नारायणजी, नरसीपुर
११) नथूभाई अमथालाल नाराणजी, नरसीपुर
१०) लल्लूभाई नारायणजी
८) हरगोविंददास नारायणजी ,,
४) अबुलेख नारायणजी ,,
५) बालचन्द गुलाबचन्द ,,
२-) पीताम्बरदास देवचन्द, ,,
॥) मलूकचन्द रघुनाथ ,,
५०१) I बालचद उगरचद बम्बई।

I ५०१) सेठजीकी मूर्ति बनवानेके लिए और १००) माणिकचन्दग्रन्थमालाके लिए।

माणिकचन्द्रदिगम्बर-जैनग्रन्थमालाकी

नियमावली।



१. इस ग्रन्थमालामें केवल दिगम्बर जैन सम्प्रदायके संस्कृत और प्राकृत भाषाके प्राचीन ग्रन्थ प्रकाशित होंगे। यदि कमेटी उचित समझेगी तो कभी कोई देशभाषाका महत्त्वपूर्ण ग्रन्थ भी प्रकाशित कर सकेगी।

२. इसमें जितने ग्रन्थ प्रकाशित होंगे उनका मूल्य लागत मात्र रक्खा जायगा। लागतमें ग्रन्थ सम्पादन कराई, संशोधन कराई, छपाई, बँधवाई आदिके सिवाय आफिस खर्च, व्याज और कमीशन भी शामिल समझा जायगा।

३. यदि कोई धर्मात्मा किसी ग्रन्थकी तैयार कराईमें जो खर्च पड़ा है वह, अथवा उसका तीन चतुर्थांश, सहायतामें देंगे तो उनके नामका स्मरणपत्र और यदि वे चाहेंगे तो उनका फोटू भी उस ग्रन्थकी तमाम प्रतियोंमें लगा दिया जायगा। जो महाशय इससे कम सहायता करेंगे उनका भी नाम आदि यथायोग्य छपवा दिया जायगा।

४. यदि सहायता करनेवाले महाशय चाहेंगे तो उनकी इच्छानुसार कुछ प्रतियाँ जिनकी संख्या सहायताके मूल्यसे अधिक न होगी मुफ्तमें वितरण करनेके लिए दे दी जायगीं।

५. इसमें ग्रन्थमालाकी कमेटीद्वारा चुने हुए ग्रन्थ ही प्रकाशित होंगे।

पत्रव्यवहार करनेका पता—

नाथूराम प्रेमी,
हीराबाग, पो० गिरगाव, बम्बई।

माणिकचन्द-दिगम्बर-जैनग्रन्थ-माला समिति।

(प्रबन्धकारिणी सभाके सभ्य)

१. रायबहादुर सेठ स्वरूपचन्द हुकुमचन्द।
२. " " " तिलोकचन्द कल्याणमल।
३. " " " ओंकारजी कस्तूरचन्द।
४. सेठ गुरमुखरायजी सुखानन्द।
५. हीराचन्द नेमीचन्द आ० मजिस्ट्रेट।
६. मि.लल्लूभाई प्रेमानन्द परीख एल.सी.ई.।
७. सेठ ठाकुरदास भगवानदास जौहरी।
८. ब्रह्मचारी शीतलप्रशादजी।
९. पं० धन्नालालजी काशलीवाल।
१०. पं० खूबचन्दजी शास्त्री।
११. नाथूराम प्रेमी (मंत्री)।